यतः श्रोत्रस्य शब्ददेशगमनमत एव नैयायिकप्रक्रिया तु गौरवग्रस्तत्वादुपेक्ष्येत्याह— वीचीति। यथा वीचेस्तरङ्गस्ततोऽपि वीच्यन्तरं ततोऽपि तरङ्गान्तरमिति न्यायः। तथा भेरीदण्डसंयोगान्नभस्युत्पन्नाच्छब्दादसमवायिकारणाच्छब्दान्तरस्योत्पत्तिस्ततोऽन्यस्येति परम्परयाऽन्त्यशब्दस्य श्रोत्रसम्बन्धकल्पनागौरवम्। कदम्बमुकुलन्याय आदिपदाज्ज्ञेयः। प्रदेशे—प्रदेशसम्बन्धार्थम्। परमप्रकृतमुपसंहरति—तदेवमिति।

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंस-रामकुमारसूनुधनपतिसूरिसुतशिवदत्तविरचितायां वेदान्तपरिभाषार्थ-दीपिकायां प्रत्यक्षपरिच्छेदः समाप्तः ॥ १ ॥

अ०—न्याय मत के अनुसार वीचि तरङ्ग न्याय तथा कदम्ब मुकुल न्याय से कर्णशष्कुलि प्रदेश में अनन्त शब्द की उत्पत्ति कल्पना में गौरव है। 'मैंने भेरी का शब्द सुना' इस प्रत्यक्ष ज्ञान में भ्रमत्व की कल्पना रूप गौरव दोष भी है। इस प्रकार हमने प्रत्यक्ष व्याख्यान कर दिया।

सु०—पहले कर आये हैं—परिशेषतः नाक जिह्वा नेत्र त्वक् और श्रोत्र भेद से पाँच ही इन्द्रियाँ ज्ञान जनक हैं। इन्द्रियों के सद्भाव में अनुमान तथा श्रुति प्रमाण हैं। जैसे छेदन क्रिया में क्रियात्व है और वह कुठार रूप करण से जन्य है, इसी प्रकार रूपादि ज्ञान में भी क्रियात्व है और वह किसी न किसी करण से जन्य होना चाहिए। अतः रूप ज्ञान नेत्र करण जन्य है, रस ज्ञान रसनाकरण जन्य, गन्धज्ञान घ्राण करणजन्य है, शब्द ज्ञान श्रोत्र करण जन्य, स्पार्शन ज्ञान त्वक् करण जन्य है। इस प्रकार श्रोत्रादि इन्द्रियों के सद्भाव में अनुमान प्रमाण है। वैसे ही 'तमुत्क्रामन्तं सर्वे प्राणा उत्क्रामन्ति' (बृ० ४-३-३८) (जब जीव शरीर छोड़कर जाता है तो उसके पीछे पीछे सभी इन्द्रियाँ शरीर छेद कर चली जाती हैं) ऐसी श्रुति भी प्रमाण है।

बौद्धों ने विषयों के साथ सम्बन्ध हुए बिना ही श्रोत्रादि इन्द्रियाँ ज्ञान पैदा कर देती हैं; ऐसा माना है—वह ठीक नहीं। क्योंकि फल देखकर ही स्वभाव की कल्पना करनी पड़ती है। अतः सभी इन्द्रियाँ विषयों के साथ सम्बद्ध होकर

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सु०—ही ज्ञानको उत्पन्न करती हैं। अन्तर इतना ही है कि नाकरसना और त्वचा ये तीन इन्द्रियाँ अपने गोलकों में स्थित रहकर ही अपने अपने विषयों के ज्ञान को उत्पन्न करती हैं अर्थात् गन्ध देश में घ्राण नहीं जाता अपितु घ्राणगोलक के पास आश्रय के सहित गन्ध आती है तब अपने से सम्बद्ध गन्ध को घ्राण जान लेता है। वैसे ही रसना विषय देश में नहीं जाती किन्तु रसना के पास इस विषय के आने पर रसना उसका ज्ञान कर लेती है। यदि रसनेन्द्रिय को विषय देश में जाकर रस का अनुभव करना मानो तो दूर में स्थित व्यक्ति हलवाई की दुकान वाली सभी मिठाइयों का रस ग्रहण कर ले; फिर तो रसानुभव के लिए मिष्ठान्न खरीदने की कोई आवश्यकता नहीं। ऐसे ही त्वगिन्द्रिय अपने गोलक में रहकर ही स्वदेश में आए हुए शीतोष्ण को जान पाती है।

केवल चक्षु और श्रोत्र स्वतः विषय देश में जाकर अपने-अपने विषयों को ग्रहण करती हैं। यदि नेत्र को विषय देश में जाना न माना जाए तो विषय के ज्ञान के साथ-साथ दूरत्व का ज्ञान नहीं हो सकेगा, जैसे नाक को गन्ध का ज्ञान तो होता है पर कितने दूर से यह गन्ध आई यह ज्ञान नहीं होता। इसी नेत्र को भी रूप तथा रूपवाले द्रव्य का ज्ञान तो हो जाएगा किन्तु कितने दूरमें किस ओर यह रूप है ऐसा ज्ञान नहीं हो सकेगा। अतएव नेत्र को विषय देश में जाकर विषय का ज्ञान करना माना गया है। आधुनिक वैज्ञानिकों ने नेत्रगोलक में स्थित नेत्र के पास बिषय का आना नहीं माना है किन्तु कैमरे के समान नेत्रगोलक में विषय का प्रतिबिम्ब पड़ना माना है। पर यह युक्ति विरुद्ध है। क्योंकि ऐसा मानने में भी दूरत्व का प्रत्यक्ष ज्ञान न हो सकेगा। दूर से चित्र लेने में चित्र छोटा हो जाता है समीप से लेने पर चित्र बड़ा होता है उस समय केमरे के भीतर छोटे बड़े चित्र को देख फोटोग्राफर दूरत्व का अनुमान कर सकता है पर दूरत्व का प्रत्यक्ष नहीं कर सकता, प्रत्यक्ष करने के लिए कैमरे को छोड़कर पुनः उन व्यक्तियों की ओर उसे देखना पड़ता है जिनका उन्हें चित्र लेना है। वस्तुतः चित्र के छोटे-बड़े दूरत्व समीपत्व कारण नहीं है, किन्तु कैमरे यन्त्र को उस अनुमाप में रखने से चित्र छोटा बड़ा हो जाता है। इसे कैमरा विज्ञान वाले जानते हैं। इसलिए कैमरे का उदाहरण देकर यह सिद्ध नहीं किया जा सकता कि नेत्र में विषय का प्रतिबिम्ब पड़ता है, क्योंकि प्रतिबिम्ब पड़ने पर दूरत्व का ज्ञान कथमपि सम्भव नहीं है। कभी कभी दूरस्थ वस्तु को देखने के लिए नेत्र और मन को सावधानी से विषय की ओर लगाना पड़ता है। यह भी विषय देश में नेत्र का जाना मानने पर ही संगत हो सकेगा। दूर की चीजों को

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सु०—बहुत देर तक देखने से नेत्र में थकावट भी हो आती है। यह भी विषय देश में नेत्र का जाना मानने पर ही सम्भव हो सकता है।

उक्त युक्तियों से नेत्र का विषय देश में जाना सिद्ध हो गया जो कि सभी आस्तिक दर्शनों को मान्य है। श्रोत्र भी चक्षु के समान ही भौतिक एवं परिच्छिन्न है। इसलिए चक्षु के समान ही श्रोत्र भी भेरी आदि बाजे देश में जाकर शब्द को सुनता है। अतः भेरी शब्द को मैंने सुना ऐसा प्रत्येक का अनुभव है। केवल नैयायिकों का आग्रह है कि वीचि तरङ्ग न्याय से कर्ण शष्कुलि प्रदेश में शब्द उत्पन्न होता है। भेरी देश से लेकर श्रोत्र देश पर्यन्त अनन्त शब्द की उत्पत्ति और ध्वंस मानना सर्वथा गौरव है! यह तो उन्हें कर्ण छिद्र से घिरे हुए आकाश को श्रोत्र मान लेने के बाद दुराग्रह करना पड़ता है।

वस्तुतः श्रोत्र को आकाश का कार्य होने से भौतिक है, तथा परिच्छिन्न भी है। फिर शब्द देश में श्रोत्र का जाना मानने में कोई आपत्ति नहीं है।

वीचि तरङ्ग न्याय से नैयायिकों का तात्पर्य यह है कि जैसे तालाब के जल में एक पत्थर फेंकने से एक तरङ्ग पैदा हुई उससे दूसरी, तीसरी, चौथी अपनी वेगशक्ति के अनुसार बनती रहती है। वैसे ही ढोल और डडे का संयोग होते ही आकाश में शब्द उत्पन्न हुआ इससे दूसरा, दूसरे से तीसरा उत्पन्न होकर श्रोत्र देश में जब शब्द पैदा होता है उसी शब्द को श्रोत्र सुनता है।

उसकी यह कल्पना गौरवग्रस्त होने के कारण सर्वथा उपेक्ष्य है। साथ ही 'मैंने भेरी शब्द सुना' इस प्रत्यक्ष को नैयायिक भ्रम कहते हैं। पर इसमें भ्रमत्व की कल्पना निराधार होगी। शुक्ति में 'इदं रजतम्' इस ज्ञान को भ्रम इसलिए कहा है कि कालान्तर में 'यह रजत नहीं है' इस प्रकार के ज्ञान से पूर्व कालीन ज्ञान का बाध हो जाता है। ऐसे ही 'भेरी का शब्द मैंने सुना नहीं। इस प्रकार निषेध ज्ञान से बाधित हो जाए तो उसमें भ्रमत्व की कल्पना युक्ति संगत हो सकती है। किन्तु आजतक किसी भी व्यक्ति को ऐसा निषेध ज्ञान हुआ नहीं तो फिर 'भेरी शब्दो मया श्रुतः' इस प्रत्यक्ष को नैयायिक भ्रम कैसे कहेंगे! शब्दवेधी बाण चलाने का यह क्रम है कि शब्द को सुनते ही कहाँ और कितने दूर पर यह शब्द हो रहा है इस बात का भी ज्ञान श्रोता को हो जाता है। उस शब्द को सुनते ही लक्ष्यभेद के लिए बाण का प्रयोग कर दिया जाता है और लक्ष्य का भेदन भी हो जाता है। इस अनुभव से भी यही सिद्ध होता है कि शब्द देश में श्रोत्र जाता है न कि श्रोत्र देश में शब्द आता है। शब्द के नित्यत्व, अनित्यत्व व्यापकत्व तथा

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सु०–परिच्छिन्नत्व का विचार तो हम आगम परिच्छेद में करेंगे। चाहे शब्द की उत्पत्ति मानो या अभिव्यक्ति, दोनों प्रकार से शब्ददेश में श्रोत्र का जाना ही मानना उचित है।

यदि नैयायिक कहे कि समीप में बैठे हुए आदमी को शब्द अधिक सुनाई देता है और वही शब्द दूरस्थ व्यक्ति को कम सुनाई देता है इससे तो वीचि तरङ्ग न्याय से शब्द का चतुर्दिक में फैलना ही मानना चाहिए। वह शब्द फैलता हुआ दूरस्थ व्यक्ति के पास सूक्ष्म हो जाता है इसी से उसे कम सुनाई पड़ता ? तो ऐसा कहना ठीक नहीं, क्योंकि यह तर्क तो रूप दर्शन के विषय में भी समान ही है। समीपस्थ व्यक्ति को जितना रूप स्पष्ट दीखता है उतना दूरस्थ को नहीं।

इसमें कारण यही कहना होगा कि दूर में स्थित व्यक्ति की नेत्रशक्ति रूप देश में जाते-जाते क्षीण हो जाती है। अतः वह रूप को स्पष्ट नहीं देख पाता और वही दूरबीन से दूरस्थ चीज को भी देख लेता है ठीक वैसे ही श्रोत्र को भी दूरस्थ शब्द सुनने के लिये शब्द देश में जाते-जाते शक्ति क्षीण हो जाती है। अतः शब्द कम सुनाई पड़ता है। इससे भी श्रोत्र का शब्द देश में जाना सिद्ध होता है। अतः चक्षु और श्रोत्र दोनों ही विषय देश में जाकर विषय को ग्रहण करते हैं। इसी प्रकार सभी इन्द्रियों के स्वभाव तथा कार्य को देखकर जाना गया कि पांचों इन्द्रियों में नेत्र तथा त्वक् रूप और रूप के आश्रय दोनों को ग्रहण करते हैं। शेष जिह्वा घ्राण और श्रोत्र गुण मात्र को ग्रहण करती हैं उसके आश्रय द्रव्य को नहीं। यह भी फल बल कल्पनीय है।

इसप्रकार वेदान्तपरिभाषान्तर्गत प्रत्यक्षपरिच्छेद की श्रीविद्यानन्दजिज्ञासु-
विरचित सानुवाद सुबोधिनी व्याख्या समाप्त हुई ॥१॥

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अथानुमानपरिच्छेदः २

अथानुमानं निरूप्यते। अनुमितिकरणमनुमानम्। अनुमितिश्च व्याप्तिज्ञानत्वेनव्याप्तिज्ञानजन्या। व्याप्तिज्ञानानुव्यवसायादेस्तत्त्वेन तज्जन्यत्वाभावान्नानुमितित्वम्।

एवं सर्ववादिसंमतं ज्येष्ठं प्रत्यक्षप्रमाणं प्रथमं निरूप्य बहुवादिसम्मतत्वात्तदनन्तरमनुमाननिरूपणं प्रतिजानीते—अथेति। अनुमीयतेऽनेनेत्यनुमानमनुमितिकरणमिति व्युत्पन्नमनुमानपदं लक्षणमव्युत्पन्नं लक्ष्यमित्याशयेनानुमानं लक्षयति—अनुमितीति। अनुमानलक्षणघटकानुमितेर्लक्षणमाह—अनुमितिश्चेति। व्याप्तिज्ञानत्वेन न तु विषयत्वादिना। व्याप्तिश्च वक्ष्यमाणा तज्ज्ञानं च व्यभिचारज्ञानविरोधिज्ञानमिति पर्यवस्यति। नन्वत्र व्याप्तिपदं व्यभिचारज्ञानविरोधिपरं न तु ग्रन्थकृदभिमतव्याप्तिपरं, तेन तज्जनके अत्यन्ताभावगर्भसाध्याभाववदवृत्तित्वादिरूपव्याप्तिज्ञानेऽन्योन्याभावगर्भसाध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यादिरूपव्याप्तिज्ञाने च कारणतावच्छेदकसत्त्वादनुमितिर्भवति इदानीं तु न स्यादिति चेन्न। अत्यन्ताभावादिगर्भव्याप्तिज्ञानस्यापि व्यभिचारज्ञानविरोधिज्ञान एव पर्यवसानात्, वस्तुतो व्यतिरेकव्याप्तिज्ञानस्यानुमित्यहेतुत्वस्य वक्ष्यमाणत्वाच्च। तादृशावच्छेदकविवक्षायाः फलमावेदयति—व्याप्तिज्ञानेति। तत्त्वेन—व्याप्तिज्ञानत्वेन। आदिपदं तज्जन्यस्मृतिशाब्दज्ञानादिसंग्रहार्थम्। अनुव्यवसायस्मृतिशाब्दज्ञानादिषु विषयत्वसमानविषयानुभवत्वपदार्थज्ञानत्वादिना हेतुत्वात्तत्त्वेनाहेतुत्वमित्यर्थः।

अ०—प्रत्यक्ष निरूपण के अनन्तर अनुमाण का निरूपण किया जाता है। अनुमिति प्रमा के कारण को अनुमान कहते हैं; अनुमिति प्रमा व्याप्तिज्ञानत्व रूप से व्याप्ति ज्ञान जन्य मानी जाती है। व्याप्तिज्ञान के अनुव्यवसायादि व्याप्तिज्ञानत्वेन व्याप्ति ज्ञान जन्य नहीं है अतः अनुमान के लक्षण की व्याप्ति ज्ञान के अनुव्यवसायादि में अतिव्याप्ति नहीं है।

अनुमान का लक्षण

सु०—प्रत्यक्षनिरूपणान्तर अनुमान का निरूपण किया जाता है। प्रत्यक्ष प्रमाण सर्ववादी सम्मत तथा सभी प्रमाणों में ज्येष्ठ है। एवं सभी प्रमाणों

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अनुमितिकरणं च व्याप्तिज्ञानं तत्संस्कारोऽवान्तरव्यापारः, न तु तृतीयलिङ्गपरामर्शोऽनुमितौ करणम्।

ननु व्याप्तिज्ञानस्य किमनुमितिजनकत्वमात्रमुत तत्करणत्वमित्यपेक्षायामाह—अनुमितिकरणं चेति। एतेन व्याप्तिविशिष्टपक्षधर्म्मताज्ञानजन्यं ज्ञानमनुमितिस्तत्करणमनुमानं तच्च लिङ्गपरामर्श इति प्रत्युक्तम्, व्याप्तिज्ञानस्यैव तत्करणत्वसम्भवे तदतिरिक्तपरामर्शाङ्गीकारस्यानौचित्यात्। नाप्यानुमितौ लिङ्गं करणमयोग्यलिङ्गकानुमितौ परामर्शस्य व्यापारत्वासम्भवेन तत्करणत्वासम्भवतया व्यभिचारात्। तस्मादनुमितिकरणत्वाद् व्याप्तिज्ञानमेवानुमानशब्दाभिधेयं, न तु लिङ्गतत्परामर्शाविति भावः। ननु व्याप्तिज्ञानस्य करणत्वे तद्व्यापारो वक्तव्यः, व्यापारवदसाधारणकारणस्यकरणत्वादित्यपेक्षायामाह—तत्संस्कार इति। व्याप्तिज्ञानसंस्कार इत्यर्थः। ननु महानसादौ धूमादिज्ञानं प्रथमम्, पक्षे ततो द्वितीयम्, ततो व्याप्तिं स्मृत्वा पक्षे धूमादिपरामर्शात्मकं तृतीयम्, ततो वह्न्याद्यनुमितिरिति तृतीयलिङ्गपरामर्शात्मकं ज्ञानमनुमितिकरणमिति वदन्ति नैयायिकाः। अतो भवद्भिरपि तथैव किमिति नाभ्युपगम्यते इत्याशङ्क्याह—न तु तृतीयेति। व्याप्तिविशिष्टपक्षधर्म्मताज्ञानं परामर्शः। प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः। व्याप्यस्य पक्षवृत्तित्वं पक्षधर्म्मता। तथा च वह्निव्याप्यधूमवानयमित्यादिज्ञानमुक्तलक्षणपरामर्शात्मकं, तत्तु नानुमितिकरणमित्यर्थः।

अनुवाद०—अनुमिति का करण व्याप्ति ज्ञान है। व्याप्तिज्ञान जन्य संस्कार अवान्तर व्यापार है। तृतीय लिङ्ग परामर्श अनुमिति का करण नहीं है।

सु०—का उपजीव्य है। इसलिए उसका निरूपण पहले किया। अनुमान बहुवादी सम्मत होने पर भी कुछ वादियों को अभिमत न होने के कारण तथा प्रत्यक्ष उपजीव्य होने के कारण पहले नहीं बतलाया। अनुमान उपजीवक है और प्रत्यक्ष उपजीव्य है यह हम प्रत्यक्ष परिच्छेद में कह आये हैं। प्रत्यक्ष प्रमाण में किसी को विवाद नहीं है क्योंकि चार्वाक भी प्रत्यक्ष को मानता है। अतः सर्ववादी सम्मत प्रत्यक्ष प्रमाण को ज्येष्ठ कहा है। ज्येष्ठ का निरूपण पूर्व में होना ही चाहिए। फिर भी अन्य प्रमाणों की अपेक्षा अनुमान बहुवादी सम्मत होने के कारण उपमानादि की अपेक्षा प्रत्यक्ष के अनन्तर अनुमान के ही निरूपण का प्रसङ्ग आता है। अनुमान प्रमाण का नाम है उस प्रमाण से

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indian Philosophic Studies. AAIS(USA)

सु०—जो प्रमा उत्पन्न होती है उसे अनुमिति कहते हैं। अतः अनुमान को अनुमिति का कारण माना है। व्यापारवदसाधारण कारण को करण कहते हैं। अनुमिति प्रमा के प्रति व्यापारवद् असाधारण कारण होने से अनुमान अनुमिति का करण है। यदि इस अनुमान को न मानें तो प्रत्यक्ष प्रमाण से पर्वत में वह्नि का ज्ञान नहीं हो सकेगा। अतः अनुमान प्रमाण भी मान्य है। अनुमान ही लक्ष्य और लक्षण भी है। अन्तर इतना है—जब अनु उपसर्ग पूर्वक मा धातु से करण में ल्युट् प्रत्यय करते हैं, तो उस समय व्युत्पन्न अनुमान शब्द लक्षण परक हो जाता है एवं रूढ़ अनुमान शब्द लक्ष्य परक होता है। अनुमान का सीधा अर्थ व्याप्ति ज्ञान है जिसे आगे स्पष्ट किया जायगा। क्योंकि व्याप्ति ज्ञान से ही अनुमिति प्रमा उत्पन्न होती है। व्याप्ति ज्ञान में जब अनुमान शब्द का प्रयोग किया जाता है तब 'अनुमीयते अनेनेति अनुमानम्' अर्थात् जिससे अनुमिति प्रमा उत्पन्न हो वह अनुमिति का कारण है उसी को अनुमान कहते हैं। व्युत्पत्ति का आश्रय न करें, केवल रूढ़ अनुमान शब्द को रक्खें तो वह लक्ष्य परक हो जाता है।

अनुमान के लक्षण में आए हुए अनुमिति पद का अर्थ यह है—जो व्याप्तिज्ञान से उत्पन्न तो हुआ हो पर व्याप्ति ज्ञान को विषय नहीं करता हो उसे अनुमिति कहते हैं। धूम वह्नि का व्याप्य है ऐसे धूम और वह्नि के साहचर्य ज्ञान को व्याप्ति ज्ञान कहते हैं। इससे 'पर्वतो वह्निमान्' इस आकार वाली अनुमिति उत्पन्न होती है और धूम वह्निव्याप्य है' ऐसे ज्ञान वाला मैं हूँ—यह अनुव्यवसाय होता है। अनुव्यवसाय प्रत्यक्ष माना जाता है, एवं अनुमिति परोक्ष मानी जाती है। अर्थात् अनुव्यवसाय का विषय प्रत्यक्ष होता है और अनुमिति का विषय परोक्ष होता है। जिस ज्ञान से अनुव्यवसाय उत्पन्न हुआ है उसे भी वह जानता है। व्याप्ति ज्ञान के अनुव्यवसाय में व्याप्ति ज्ञान भी विषय पड़ता है तभी तो कहता है धूमगत वह्नि की व्याप्ति को मैं जानता हूँ अर्थात् ऐसे व्याप्ति ज्ञान वाला मैं हूँ। पर अनुमिति व्याप्ति ज्ञान से उत्पन्न होने पर भी व्याप्तिज्ञान को विषय नहीं करती; वह तो केवल पक्ष, साध्य तथा उन दोनों के सम्बन्ध को विषय करती है। 'पर्वतो वह्निमान्' इस अनुमिति ज्ञान में पर्वत वह्नि और उन दोनों का सम्बन्ध ये तीनों दीखते हैं। किन्तु धूम, वह्नि का साहचर्य इसमें नहीं दीखता और न साहचर्य ज्ञान ही दीखता है। तात्पर्य यह कि अनुमिति के प्रति व्याप्ति ज्ञान करण रूप से कारण है, अपने अनुव्यवसाय के प्रति विषय रूप से कारण है। विषय ज्ञान का जनक होता है और करण भी ज्ञानका जनक होता है। घटका ज्ञान घट, नेत्र तथा प्रकाश तीनों के रहने

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तस्यानुमितिहेतुत्वासिद्धयातत्करणत्वस्य दूरनिरस्तत्वात् ।

तत्र हेतुमाह—तस्यानुमितीति । पक्षधर्म्मताज्ञानद्वारोद्बुद्धे संस्कारे व्याप्तिज्ञानस्यान्वयव्यतिरेकाभ्यामनुमितिजनकत्वाभ्युपगमस्यावश्यकतया तद्गहितस्य परामर्शस्य तद्धेतुत्वासिद्धया तत्करणत्वस्य दूरनिरस्तत्वमि[illegible] उपलक्षणमिदम् । अनुमितिकरणं लिङ्गम्, तत्परामर्शोऽवान्तरव्यापा[illegible]ते वैशेषिका मन्वते । तन्न साधु, विनष्टस्यानागतस्य च लिङ्गस्य तदानामभा[illegible]ततोऽनुमित्यनापत्तेरित्यपि द्रष्टव्यम् ।

अ०—क्योंकि उसमें तो अनुमिति का कारणत्व भी सिद्ध नहीं है फिर करणत्व तो दूर ही निरस्त है ।

सु०—पर होता है । अतः घट ज्ञान के जनक उक्त तीनों ही हुए । फिर भी घट ज्ञान में घट तो दीखता है, नेत्र नहीं दीखता और आलोक भी नहीं दीखता । क्योंकि घट, विषयत्वेन घट—ज्ञान का जनक है इसीलिए विषय का तो भान होता है; करण और सहकारी कारण का नहीं । ठीक ऐसे ही व्याप्ति ज्ञान के अनुव्यवसाय के प्रति व्याप्ति ज्ञान विषय रूप से कारण होने से अनुव्यवसाय में दीखता है । अतः 'व्याप्ति ज्ञानवानहम्' ऐसा अनुभव होता है । पर अनुमिति ज्ञान में व्याप्ति ज्ञान करण रूप से जनक है, विषय रूप से नहीं । अतः व्याप्ति ज्ञान अनुमिति का विषय नहीं है । इसीलिये कहा है—अनुमिति व्याप्तिज्ञानत्वेन व्याप्तिज्ञान जन्या है । अनुव्यवसायादि व्याप्तिज्ञान जन्य तो हैं पर उनके प्रति व्याप्तिज्ञान विषयत्वेन कारण है । अतः अनुव्यवसाय में व्याप्तिज्ञान विषय पड़ जाता है । अतएव अनुमिति के लक्षण की अनुव्यवसायादि में अतिव्याप्ति भी नहीं है । जैसे अनुव्यवसाय में अनुमिति लक्षण की अतिव्याप्ति नहीं है वैसे ही स्मृति शाब्द ज्ञान आदि में भी अतिव्याप्ति नहीं, क्योंकि उक्त सभी ज्ञानों में व्याप्ति ज्ञान कारण होते हुए भी व्याप्ति ज्ञानत्वेन कारण नहीं है अपितु अनुव्यवसाय में व्याप्ति ज्ञान विषयत्वेन, स्मृति के प्रति समान विषयानुभवत्वेन और शाब्द ज्ञान के प्रति पदार्थ ज्ञानत्वेन कारण है । अतः उक्त तीनों में व्याप्ति ज्ञान विषय पड़ता है, केवल अनुमिति में विषय नहीं पड़ता ।

व्याप्तिज्ञान को अनुमिति का जनक मात्र मानते हो या करण भी कार्य से नियतपूर्ववृत्ति को कारण कहते हैं, उन कारणों में व्यापार वाले असाधारण कारण को करण कहते हैं । जैसे घट रूप कार्य से नियतपूर्व दण्ड, चक्र कुलालादि हैं । अतः ये सब घट के कारण हैं । इनमें व्यापार वद्असाधारण

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सु०—कारण दण्ड है। इसलिए वह घट का करण माना जाता है। दण्डसे चाक को घुमाने पर भ्रमि रूप व्यापार पैदा होता है। उसके बिना केवल दण्ड घट को उत्पन्न करने में समर्थ नहीं है। अतः घट कार्य और दण्ड के बीच में भ्रमि रूप व्यापार दण्ड से उत्पन्न होता है और वह भ्रमि घट को उत्पन्न भी करती है। 'तज्जन्यत्वे सति तज्जन्यजनको व्यापारः' दण्ड जन्य भ्रमि है और दण्ड जन्य घट का वह जनक भी है, इसी से भ्रमि को व्यापार कहा गया है क्योंकि व्यापार का उक्त लक्षण भ्रमि में घट रहा है।

प्रकृत में जो रूप का चाक्षुष ज्ञान होता है। वह चाक्षुष ज्ञान एक कार्य है; उसका करण चक्षु है क्योंकि चक्षु का रूप के साथ सम्बन्ध होने पर चाक्षुष ज्ञान होता है, सम्बन्ध हुए विना नहीं। अतः जैसे चाक्षुष ज्ञान के लिए चक्षु करण तथा रूप और चक्षु का सम्बन्ध व्यापार है ऐसे ही अनुमिति ज्ञान एक कार्य है उसका कारण आपने व्याप्ति ज्ञान को कहा है। वह अनुमिति का जनक मात्र है अथवा व्यापारवद् असाधारण कारण रूप करण है?

इसका उत्तर यह है कि व्याप्ति ज्ञान अनुमिति का करण है। वहां पर व्याप्ति ज्ञान से उत्पन्न हुआ संस्कार भ्रमि की तरह अवान्तर व्यापार पड़ जाता है।

यहां नैयायिकों का कहना था कि व्याप्ति विशिष्ट पक्षधर्मता ज्ञान को परामर्श कहते हैं उसी का नाम अनुमान है; वही अनुमिति का करण है। वह उक्त-मान्यता से खण्डित हो गया। क्योंकि तृतीय लिङ्ग परामर्श को तो हम अनुमिति का कारण भी नहीं मानते, फिर असाधारण कारण मानना तो दूर ही रहा।

लिङ्गज्ञान को लिङ्गपरामर्श कहते हैं। वह लिङ्ग परामर्श अनुमिति से पूर्व तीन बार नैयायिकों को होता है। प्रथम बार महानस में धूम और वह्नि के व्याप्ति ज्ञान के समय दूसरी बार पक्षधर्मता ज्ञान के समय और तीसरी बार पर्वत में धूम को देखते ही व्याप्ति स्मरण होने के बाद 'वह्निव्याप्य धूम वाला यह पर्वत है' इस ज्ञान में भी धूम दीखा; इसी को तृतीय लिङ्ग परामर्श कहते हैं जिसे नैयायिकों ने अनुमिति का करण माना है। करण के लक्षण में व्यापार पद दिये बिना ही 'असाधारण कारणं करणम्' इस लक्षण के अनुसार तृतीय परामर्श में भी अनुमिति-करणत्व माना है।

यह सारा प्रपञ्च नैय्यायिकों का 'अनुमिति का कारण व्याप्ति ज्ञान है' इस मान्यता से निरस्त हो गया। कहीं २ न्यायशास्त्र में अनुमिति का करण धूमादि लिङ्ग को माना है और परामर्श को व्यापार कहा है। पर यह भी ठीक नहीं क्योंकि प्रत्यक्ष के अयोग्य लिङ्ग जहां होता है वहां अनुमिति में परामर्श को व्यापार भी नही कह सकते। फिर परामर्श या लिङ्ग में करणत्व कहां से आएगा?

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

न च संस्कारजन्यत्वेनानुमितेः स्मृतित्वापत्तिः, स्मृतिप्रागभावस्य संस्कारमात्रजन्यत्वस्य वा स्मृतित्वप्रयोजकतया संस्कारध्वंससाधारण संस्कारजन्यत्वस्य तदप्रयोजकत्वात् ।

ननु संस्कारजन्यं ज्ञानं हि स्मृतिरिति स्मृतिलक्षणं तस्य चानुमितावप्यनुगमात् तस्यापि स्मृतित्वापत्तिरित्याशङ्क्य परिहरति—न चेति । तत्र हेतुमाह—स्मृतीति । नन्वेवं तर्हि तत्तत्प्रागभावजन्यत्वरूपप्रयोजकस्य सर्वत्र सुलभत्वात् तत्र तत्र प्रयोजकान्तराभ्युपगमोऽनर्थकः स्यादित्यरुचेः पक्षान्तरमाह—संस्कारमात्रेति ।

अनु०—अनुमिति को संस्कार जन्य मानने से उसमें स्मृतित्वापत्ति होने लगेगी ? ऐसा कहना ठीक नहीं ।

क्योंकि स्मृतिप्रागभाव अथवा संस्कार मात्र जन्यत्य स्मृतित्व का प्रयोजक है । संस्कारध्वंस अथवा साधारण संस्कारजन्यत्व स्मृतित्व का प्रयोजक नहीं है ।

मु०—अतः व्याप्ति ज्ञान ही अनुमिति का करण है एवं उसी को अनुमान कहते हैं । लिङ्ग तथा तृतीय लिङ्गपरामर्श को अनुमान नहीं कह सकते ।

परामर्श का स्वरूप हमने 'व्याप्तिविशिष्ट-पक्ष-धर्मताज्ञानं परामर्शः'—ऐसा कहा । व्याप्ति का स्वरूप मूलग्रन्थकार स्वयं बतलाएँगे । पक्षवृत्तिता का मतलब है—व्याप्य का पक्ष में रहना । वह्नि की व्याप्ति का आश्रय धूम है । अतः धूम को व्याप्य कहते हैं । वह धूम जब पर्वत में रहेगा तब उसे पक्षवृत्ति कहेंगे । उस समय धूम के ऊपर पक्षवृत्तिता रहेगी । इसी को पक्ष धर्मता भी कहते हैं । अब 'वह्निव्याप्यधूमवानयं पर्वतः' ऐसा एक विशिष्टवैशिष्ट्यावगाहिज्ञान होता है । यही परामर्श है इसे ही नैयायिकों ने अनुमिति का करण माना था जिसका हमने खण्डन किया । खण्डन करते समय मूलकारने कहा कि हम परामर्श को अनुमिति का कारण भी नहीं मानते फिर करण मानना तो दूर रहा । यहां भाव यह है कि कार्य कारण भाव निश्चय के लिए अन्वय-व्यतिरेक रूप युक्ति होती है । दण्डसत्त्वे घटसत्वम् दण्डाभावे घटाभावः' (दण्ड रहने पर घट बनता है और दण्ड के न रहने पर घट नहीं बनता) । इस अन्वय व्यतिरेक रूप युक्ति से घट के प्रति दण्ड को कारण माना है । ऐसे ही पर्वत पक्ष में धूम को देखते ही धूम में पक्ष धर्मता ज्ञान हुआ । उससे पूर्वोक्त व्याप्ति अनुभव जनित संस्कार का उद्बोधन हो गया । व्याप्ति संस्कार उद्बुद्ध होते ही व्याप्ति का स्मरण हो आया । अतः इस व्याप्ति ज्ञान को अनुमिति का जनक तो सब किसीको मानना ही पड़ता है । क्योंकि व्याप्ति ज्ञानके

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

न च यत्र व्याप्तिस्मरणादनुमितिस्तत्र कथं संस्कारो हेतुरिति वाच्यम्। व्याप्तिस्मृतिस्थलेऽपि तत्संस्कारस्यैवानुमितिहेतुत्वात्। न हि स्मृतेः संस्कारनाशकत्वनियमः, स्मृतिधारादर्शनात्। न चानुद्बुद्ध-संस्कारादप्यनुमित्यापत्तिः, तदुद्बोधस्यापि सहकारित्वात्।

ननु व्याप्तिस्मरणादनुमितिस्थले संस्कारजन्यत्वं व्यभिचरितं, व्याप्तिस्मृत्या संस्कारनाशादित्याशङ्क्य परिहरति न चेति। व्याप्तिस्मृतिजन्यानुमितिस्थलेऽपि संस्कारनाशानभ्युपगमेन व्यभिचाराभावादित्याह व्याप्तिस्मृतीति स्मृतिधारा-दर्शनात्स्मृतेः संस्कारनाशकत्वनियमोनास्तीत्याह—न हीति। ननु संस्कारस्यै-वानुमितिहेतुकत्वे अनुद्बुद्धादपि तस्मादनुमितिप्रसङ्ग इत्याशङ्क्य परिहरति—न चेति। तदुद्बोधस्य पक्षधर्म्मताज्ञानजन्यस्य संस्कारोद्बोधस्य।

अ०—किन्तु जहां पर व्याप्ति स्मरण से अनुमिति हो गई, वहां संस्कार को स्मृति का कारण कैसे कहोगे?—ऐसा कहना ठीक नहीं क्योंकि व्याप्ति स्मरण स्थल में भी संस्कार को ही अनुमिति का हेतु (लाघव के कारण एवं अनुभव के आधार पर) माना गया है। स्मृति से संस्कार नष्ट हो जाते हैं—यह नियम नहीं है। क्योंकि एक स्मृति के बाद दूसरी स्मृति, तीसरी स्मृति ऐसी धारा देखी जाती है। यदि कहो—अनुबुद्ध संस्कार से भी अनुमिति होनी चाहिये यह भी ठीक नहीं। संस्कार उद्बोध को भी सहकारी कारण माना गया है।

सु०—बिना अनुमिति हो नहीं सकती। व्याप्ति स्मरण के बाद अनुमिति अवश्य होती है। बीच में परामर्श को बलात् अनुमिति का करण मानने में कोई अन्वय व्यतिरेक रूप तर्क तो है नहीं। केवल नैयायिक, जिज्ञासुओं के मन में बरबस परामर्श का संस्कार भरता है।

ऐसे ही ज्ञानमान लिङ्ग भी अनुमिति का कारण नहीं है अन्यथा विनष्ट और अनागत लिङ्ग से भी अनुमिति नहीं होनी चाहिये। अतः सिद्धान्त दृष्टि से नैयायिकों ने भी उसका खण्डन कर दिया।

आपने अनुमिति का कारण व्याप्तिज्ञान तथा तत्संस्कार को अवान्तर व्यापार कहा। व्यापार भी तो कारण होता ही है। तब तो स्मृति का कारण संस्कार भी हुआ=संस्कार जन्य ज्ञान को स्मृति कहते हैं। यह स्मृति का लक्षण अनुमिति में चला गया?—यह कहना ठीक नहीं। क्योंकि स्मृतित्व का नियामक संस्कार ध्वंस अथवा संस्कार एवं अन्य कारणों से जन्यत्व नहीं है। किन्तु

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सु०—स्मृतित्व का नियामक स्मृति प्रागभाव है अथवासंस्कार मात्र जन्यत्व है। कार्य के प्रति उसका प्रागभाव भी कारण हुआ करता है। घटकार्य के प्रति दण्डादि कारणों के साथ साथ घट प्रागभाव भी कारण है। ऐसे ही स्मृतिरूप कार्य के प्रति स्मृति प्रागभाव कारण है। अनुमिति रूप कार्य के प्रति अनुमिति प्रागभाव कारण है।

प्रकृत में अनुमिति के प्रति संस्कार कारण होने से अनुमिति में संस्कार जन्यत्व आने पर भी स्मृतित्वापत्ति नहीं होगी; क्योंकि अनुमिति कार्य के प्रति अनुमिति प्रागभाव कारण है न कि स्मृति प्रागभाव। यदि अनुमिति कार्य स्मृतिप्रागभाव से उत्पन्न हुआ होता तो अनुमिति में स्मृतित्वापत्ति आसकती थी, पर ऐसी बात है नहीं। अतः अनुमिति में स्मृति लक्षण की अतिव्याप्ति देना असंगत है। दूसरी बात यह है कि स्मृति का लक्षण 'संस्कार जन्यंज्ञानं स्मृतिः' ऐसा नहीं है। किन्तु संस्कारमात्र जन्यं ज्ञानं स्मृतिः' ऐसा है। यहाँ भी मात्र पद का अभिप्राय है कि संस्कार से भिन्न प्रमाणों से जो जन्य न हो और संस्कार से जन्य हो उसी को स्मृति कहते हैं। अनुमिति संस्कार मात्र जन्य है नहीं, इसमें तो व्याप्ति ज्ञान भी कारण है। अतः संस्कार मात्र जन्यत्व रूप स्मृतित्व की आपत्ति अनुमिति में नहीं है।

आप (वेदान्ती) ने 'पक्षधर्मता ज्ञान के बाद व्याप्ति स्मरण से अनुमिति होती है'—ऐसा कहा। व्याप्ति स्मरण के बाद पूर्व का संस्कार नष्ट हो गया और उत्तर क्षण में अनुमिति हुई। बीच में संस्कार तो रहा नहीं फिर संस्कार को आपने अनुमिति का अवान्तर व्यापार कैसे मान लिया? जब कि उसका अस्तित्व ही नहीं है? ऐसा कहना ठीक नहीं, क्योंकि व्याप्ति स्मरण से संस्कार नष्ट हो जाता है; यह मान्यता आपकी युक्ति विरुद्ध है। स्मरण से संस्कार दृढ़ होता है। नहीं तो एक बार अध्ययन अथवा श्रवण कर लेने के बाद पुनरावृत्ति की आवश्यकता नहीं, क्योंकि पुनरावृत्ति रूप स्मृति से पूर्व पूर्व का संस्कार नष्ट ही होता जाएगा। केवल उत्तर उत्तर स्मृति जन्य संस्कार रहेगा; वह भी दुर्बल होता जाएगा। फिर तो 'वृद्धिमिच्छतो मूलमपि नष्टम् हा कष्टतारम्' (व्याज चाहने वाले का मूलधन भी नष्ट हो गया) इस तरह विद्यार्थियों की दुर्दशा हो जाएगी। अतः बार-बार स्मृति से संस्कार दृढ़ होता है, संस्कार नष्ट नहीं होता यह सार्वलौकिकानुभव है। इसलिए व्याप्ति का स्मरण होने पर भी उसका पूर्वकालीन संस्कार बना ही रहता है। अतः उसे अवान्तर व्यापार मानने में कोई आपत्ति नहीं।

दूसरे 'स्मृति में संस्कारनाशकत्व होता तो स्मृति धारा नहीं देखी जाती

CC0. In Public Domain: Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

एवं च अयं धूमवानिति पक्षधर्मताज्ञानेन, धूमो वह्निव्याप्य इत्यनुभवाहितसंस्कारोद्बोधे च सति, वह्निमानित्यनुमितिर्भवति, न तु मध्ये व्याप्तिस्मरणं तज्जन्यवह्निव्याप्यधूमवानित्यादिविशेषणविशिष्टं ज्ञानं वा हेतुत्वेन कल्पनीयम्, गौरवात् मानाभावाच्च।

फलितमाह—एवञ्चेति। व्याप्तिज्ञानस्य करणत्वे व्याप्तिज्ञानसंस्कारस्य तद्व्यापारत्वे पक्षधर्म्मताज्ञानजन्यसंस्कारोद्बोधस्य सहकारित्वे च सिद्धे सति।

धूम-व्याप्य
वह्नि-व्याप्य

अ०—इस प्रकार 'यह पर्वत धूम वाला है' ऐसे पक्षधर्मता ज्ञान से धूम वह्नि का व्याप्य है इस अनुभव से उत्पन्न पूर्व का संस्कार जग जाता है। फिर 'वह्नि वाला पर्वत है' ऐसी अनुमिति होती है; न कि बीच में (व्याप्ति का स्मरण, या तज्जन्य वह्नि व्याप्य धूम वाला पर्वत है–ऐसे' विशेषण विशिष्ट ज्ञान को अनुमिति के करण रूप से कल्पना करना चाहिये, क्योंकि ऐसा मानने में गौरव है तथा कोई प्रमाण भी नहीं है।

सु०—किन्तु सभी का अनुभव है घण्टों तक स्मृति की धारा बनी रहती है। इस स्मृतिधारा को देखकर भी संस्कार को स्थायी न मानना; एवं अनुमिति के लिए व्याप्ति स्मरण के साथ ही व्याप्ति ज्ञान जन्य संस्कार को अवान्तर व्यापार न मानना सर्वथा असंगत है। यदि कहो कि संस्कार को अनुमिति का कारण मानने पर अनुद्बुद्ध संस्कार से भी अनुमिति होने लग जायेगी? तो ऐसा कहना ठीक नहीं, क्योंकि पक्षधर्मता ज्ञान जन्य संस्कार-उद्बोध को भी अनुमिति के प्रति व्याप्ति ज्ञान का सहकारी कारण माना है।

इस प्रकार व्याप्ति स्मरण से जहां अनुमिति होती है, उस स्थल में भी व्याप्ति ज्ञान जन्य संस्कार को ही अवान्तर व्यापार रूप से अनुमिति का कारण मानना चाहिए। तृतीय लिङ्ग परामर्श को कथमपि अनुमिति का कारण नहीं मानना चाहिये।

तृतीय लिङ्ग परामर्श का खण्डन

जब व्याप्तिज्ञान को अनुमिति का करण; व्याप्ति ज्ञान जन्य संस्कार को व्यापार; पक्षधर्मता ज्ञान जन्य संस्कार–उद्बोध को सहकारी कारण मान लिया तो फिर पर्वत में धूम को देखते ही पक्षधर्मता ज्ञान हुआ। इसी पक्षधर्मता ज्ञान से पहले देखी हुई व्याप्ति के अनुभव जन्य संस्कार का उद्बोध हो गया। संस्कार का उद्बोध होते ही तृतीय क्षण में अनुमिति हो गई।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तच्च व्याप्तिज्ञानं वह्निविषयकज्ञानांश एव करणम्, न तु पर्वतविषयकज्ञानांश इति पर्वतो वह्निमानिति ज्ञानस्य वह्न्यंश एवानुमितित्वं न पर्वताद्यंशे, तदंशे प्रत्यक्षत्वस्योपपादितत्वात्।

पर्वतो वह्निमानित्येकमेव ज्ञानमनुमित्यात्मकमिति येऽभिमन्यन्ते तान्निराकर्तुमाह—तच्चेति। सन्निकृष्टपक्षकानुमितिस्थले ज्ञानद्वयस्योपपादितत्वादित्याह—पर्वत इति। पर्वतं पश्यामि वह्निमनुमिनोमीत्यनुभवबलाज्ज्ञानद्वयस्यावश्यकतया जातित्वोपाधित्वपरिभाषायाश्चाप्रामाणिकत्वाद् ज्ञानस्यांशभेदेन परोक्षत्वापरोक्षत्वयोरुपपादितत्वादित्यर्थः।

अ०—'पर्वतो वह्निमान्' इस अनुमिति ज्ञान के वह्नि विषयक ज्ञानांश में ही व्याप्ति ज्ञान करण पड़ता है न कि पर्वत विषयक ज्ञानांश में भी। अतः 'पर्वतो वह्निमान्' यह ज्ञान वह्नि अंश में अनुमिति है; पर्वतादि अंश में नहीं। क्योंकि उस (पर्वत) अंश में प्रत्यक्षत्व का उपपादन हम पहले कर आये हैं।

सु०—यहां तृतीय क्षणमें व्याप्ति स्मरण और उसके बाद परामर्श होता है जो कि अनुमिति का कारण है—ऐसी कल्पना करने में गौरव ही तो होगा तथा इसमें कोई प्रमाण भी नहीं है। यदि कहो कि तीसरे क्षण में अनुमिति होने की अपेक्षा व्याप्ति का स्मरण क्यों नहीं हुआ ? क्योंकि द्वितीय क्षण में पक्षधर्मता ज्ञान से संस्कार का उद्बोध हो चुका है। उद्बुद्ध संस्कार स्मृति का कारण होता है उसे आप भी मानते हो। फिर स्मृति कारण सामग्री के रहते रहते स्मृति क्यों नहीं होती ? तो ऐसा कहना ठीक नहीं—क्योंकि तृतीय क्षण में उत्पन्न होने वाली अनुमिति, व्याप्ति स्मरण की प्रतिबन्धिका है। यदि कहो कि पहले तो व्याप्ति स्मरण से अनुमिति आप कह चुके हो—तो यह ठीक नहीं। हमने तो—व्याप्ति स्मृति स्थल में भी व्याप्ति ज्ञान जन्य संस्कार में अनुमिति कारणत्व कहा है अर्थात् यदि कदाचित् व्याप्ति स्मरण से अनुमिति मानो, फिर भी वहां पर संस्कार को ही अवान्तर व्यापार रूप से अनुमिति का कारण मानना चाहिए। परामर्श को नहीं—ऐसा कहा है। अतः पूर्वापर ग्रन्थ में विरोध नहीं है।

'पर्वतो वह्निमान्' यह एक ही विशिष्ट ज्ञान पर्वत, वह्नि एवं उन दोनों के सम्बन्ध को विषय करता है, इसे नैयायिक अनुमिति कहते हैं। उसका निराकरण करने के लिए विषयभेद स्पष्ट कर रहे हैं। व्याप्ति ज्ञान वह्नि को विषय करने वाले अनुमिति ज्ञान अंश में करण पड़ता है; पर्वतादि अंश

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

व्याप्तिश्च अशेषसाधनाश्रयाश्रितसाध्यसामानाधिकरण्यरूपा। सा च व्यभिचारादर्शने सति सहचारदर्शनेन गृह्यते। तच्च सहचारदर्शनं भूयो दर्शनं सकृद्दर्शनं वेति विशेषो नादरणीयः। सहचारदर्शनस्यैव प्रयोजकत्वात्।

नन्वनुमितिकरणव्याप्तिज्ञाने का व्याप्तिरित्यपेक्षायां व्याप्तिस्वरूपमाह—व्याप्तिश्चेति। अशेषं च तत्साधनं च तस्याश्रयस्तदाश्रितं यत्साध्यं तेन समं हेतोः सामानाधिकरण्यं रूपं यस्याः सा, साधनतावच्छेदकावच्छिन्नसाधनाश्रयाश्रितसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यरूपेति यावत्। एवं च यत्किञ्चिद्वह्न्यादिसाधनाश्रयाश्रितं यत्किंचिद्धूमादिसाध्यसामानाधिकरण्यमादाय पर्वतो धूमवान् वह्नेरित्याद्यसद्धेतौ नातिप्रसङ्गः। नन्वेवंभूता व्याप्तिः केन गृह्यते? न तावत्तर्केण, व्याप्यारोपेण व्यापकारोपरूपस्य तस्य व्याप्त्यधीनत्वात्। नापि सहचारदर्शनेन, सकृद्दर्शने भूयोदर्शने च तस्मिन् क्वचिद्व्यभिचारोपलम्भादित्याशङ्क्याह—सा चेति। तच्च सकृद्दर्शनं भूयोदर्शनं वा इत्यपेक्षायामाह—तच्चेति। गृह तसहचारस्य व्याप्तिग्रहदर्शनादगृहीतसहचारस्य व्याप्तिग्रहादर्शनाच्चेत्यन्वयव्यतिरेकाभ्यां सहचारदर्शनस्य हेतुत्वसिद्धया लाघवात् तस्यैव प्रयोजकत्वं, न तु तद्विशेषस्येत्याह—सहचारेति।

अ०—अब व्याप्ति का स्वरूप बतलाते हैं सम्पूर्ण साधनों के आश्रय के आश्रित जो साध्य; ऐसे साध्य के सामानाधिकरण्य को हीं व्याप्ति कहते हैं उस व्याप्ति का ग्रहण व्यभिचार के अदर्शन तथा सहचार दर्शन से होता है। वह सहचार दर्शन चाहे एक बार हुआ हो अथवा अनेक बार; इसमें कोई विशेष आग्रह नहीं है। केवल सहचार दर्शन ही व्याप्ति ज्ञानका नियामक (प्रयोजक) है।

सु०—में नहीं। एवं पर्वतो वह्निमान् यह ज्ञान भी वह्नि अंश में ही अनुमिति है; पर्वत अंश में नहीं। उस अंश में तो प्रत्यक्ष ही है। इसे दृढ़तर युक्तियों द्वारा उपपादन कर आये हैं। यदि 'पर्वतो वह्निमान्' इस विशिष्ट ज्ञान को पर्वत अंश में भी अनुमिति मानोगे तो 'पर्वतमनुमिनोमि' ऐसा अनुव्यवसाय होने लगेगा। किन्तु ऐसा होता नहीं है। 'पर्वतं पश्यामि वह्निमनुमिनोमि' ऐसा अनुभव सबको होता है।

व्याप्ति का लक्षण

अनुमिति का करण व्याप्ति ज्ञान कह आये हैं उस व्याप्ति ज्ञान का विषय व्याप्ति क्या है? ऐसी अपेक्षा होने पर व्याप्ति का स्वरूप बतला रहे हैं।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

'पर्वतो वह्निमान्, धूमात्' यहाँ धूम साधन है वह एक नहीं अनेक है इन्हीं अनेक साधनों को अशेष साधन पद से कहा गया है। कदाचित् एक व्यक्ति रूप साधन होने पर भी उसमें अशेषत्व रह सकता है इसमें कोई आपत्ति नहीं। सभी साधनों का आश्रय पर्वत, चत्वर महानस गोष्ठ इत्यादि हैं। उन्हीं आश्रयों में पर्वतीयादि वह्नि भी दिखाई पड़ी। इन सभी वह्नि के सामानाधिकरण्य को व्याप्ति कहते हैं। इसे संग्रह करने के लिए साध्य तथा साधन में अवच्छेदक लगा देना चाहिए। अर्थात् धूमत्वावच्छिन्न धूम के आश्रय पर्वतादि के आश्रित जो वह्नि साध्य है वह भी वह्नित्वावच्छिन्न है--ऐसी वह्नित्वावच्छिन्न वह्नि का सामानाधिकरण्य धूम हेतु में रहता है--यही व्याप्ति है। धूम साधन में साधनता रहती है, उस धूमनिष्ठ साधनता का अवच्छेदक धूमत्व है। वह्नि साध्य में साध्यता रहती है उस साध्यता का अवच्छेदक वह्नित्व है अर्थात् साधन धूमत्वावच्छिन्न और साध्य वह्नित्वावच्छिन्न है। ऐसे साधन के आश्रय पर्वतादि के आश्रित वह्नि रहती है जो कि वह्नित्वावच्छिन्न है। उसका सामानाधिकरण्य (एकाधिकरण वृत्तित्व) धूम में रह गया अर्थात् जिस अधिकरण में धूम है उसी में वह्नि है। अतः दोनों एकाधिकरण में रहे एकाधिकरण को ही समानाधिकरण कहते हैं। एकाधिकरण वृत्तित्व को सामानाधिकरण्य कहते हैं ऐसे सामानाधिकरण्य ही धूम में वह्नि की व्याप्ति कही गयी है।

व्याप्ति के इस लक्षण में यदि साधन में अशेष पद न दिया गया होता तो 'धूमवान् वह्नेः' [पर्वत धूमवाला है; वह्नि के रहने में] यहाँ भी वह्नि में धूम का यदाकचित् सामानाधिकरण्य तो है ही। पर्वत, चत्वर, महानस ऐसे कुछ स्थानों में वह्नि है और वहाँ धूम भी है तो धूम का सामानाधिकरण्य वह्नि में रहने से व्याप्ति का लक्षण व्यभिचारी हेतु वह्नि में आ गया [वह्नि सद्धेतु नहीं है क्योंकि अयोगोलक में वह्नि है पर साध्य धूम है नहीं। अतः अयोगोलक में वह्नि हेतु धूम रूप साध्य के बिना रहने से व्यभिचारी माना जाता है। ऐसे व्यभिचारी हेतु में भी—उक्त व्याप्ति में अशेष पद न देने के कारण-व्याप्ति के लक्षण की अतिव्याप्ति हो जाती है उसी अतिव्याप्ति को हटाने के लिए अशेष पद दिया है। उसी अशेष पद का अर्थ साधनतावच्छिन्न साधन होता है। अब तो व्यभिचारी वह्नि हेतु में अतिव्याप्ति होगी नहीं, क्योंकि वह्नित्वावच्छिन्न वह्नि का आश्रय तो अग्नि से तपाया हुआ लौह पिण्ड भी है, पर वहाँ धूम रूप साध्य नहीं है। फिर उसका सामानाधिकरण्य रूप व्याप्ति की चिन्ता तो दूर ही रह गयी। अतः असद्धेतु वह्नि में व्याप्ति का लक्षण न जाने से अतिव्याप्ति नहीं हुई; सद्धेतु धूम में व्याप्ति का लक्षण घट जाने से लक्षण

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तच्चानुमानमन्वयिरूपमेकमेव। न तु केवलान्वयि। सर्वस्यापि धर्मस्यास्मन्मते ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वेन अत्यन्ताभावाप्रतियोगिसाध्यकत्वरूपकेवलान्वयित्वस्यासिद्धेः।

एवं व्याप्तिज्ञानस्यानुमितिकरणत्वेनानुमानत्वं प्रसाध्येदानीमनुमानत्रैविध्यमपि नैयायिकादिवदस्मन्मते नास्तीत्याशयेनाह—तच्चानुमानमिति। न तु केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात्त्रिविधमित्यर्थः। अन्वयिरूपम्—अन्वयमुखव्याप्तिज्ञानरूपम्। ननु परोक्तभेदानां जागरूकत्वे कथमनुमानस्यैकरूपत्वमित्याशङ्क्याद्यभेदं निराचष्टे—न त्विति। तद्धि अत्यन्ताभावाप्रतियोगिसाध्यकम्। न चास्मन्मते ब्रह्मातिरिक्तं किञ्चिदप्यत्यन्ताभावाप्रतियोगि, 'नेह नानास्ति किंचन' क० २-१० इत्यादिश्रुत्या सर्वस्यापि ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वावधारणादिति तथाभूतकेवलान्वयित्वस्यासिद्धिरित्याह—सर्वस्यापीति।

अ०—वह अनुमान अन्वयी रूप एक ही है; केवलान्वयि नहीं है। क्योंकि सभी धर्म हमारे मत में ब्रह्म में रहने वाले अत्यन्ताभाव के प्रतियोगी हैं फिर तो अत्यन्ताभावका अप्रतियोगी साध्यवाला केवलान्वयि पदार्थ तो अप्रसिद्ध ही रहा।

सु०—का समन्वय भी हो गया क्योंकि धूमत्वावच्छिन्न धूम के निखिल अधिकरण में वह्नि रहती है इसका व्यभिचार कहीं नहीं देखा गया है। अतः ऐसे वह्नि रूप साध्य का सामानाधिकरण्य धूम में रह जाने से लक्षण का समन्वय हो गया।

उक्त व्याप्ति का ग्रहण बार बार सहचार दर्शन से तथा तर्क से होता है। ऐसा नैयायिकों का कहना है। व्याप्य के आरोप से व्यापक का आरोप करना तर्क है। यदि यहाँ वह्नि नहीं होती तो धूम भी नहीं होता यहाँ पर वह्न्यभाव व्याप्य है और धूमाभाव व्यापक है इसी को तर्क कहते हैं। इसीके आधान व्याप्ति ज्ञान को न्याय शास्त्र में माना गया है। किन्तु जहाँ जहाँ धूम है; वहाँ वहाँ वह्नि है—ऐसे बार बार सहचार दर्शन से व्याप्ति ज्ञान होता है ऐसा नियम नहीं। यदि व्यभिचार नहीं देखा गया हो तो एक बार के सहचार दर्शन से भी व्याप्ति ज्ञान हो जाता है। अर्थात् वह्नि के अभाव में धूम को यदि कहीं नहीं देखा तो एक बार धूम वह्नि का सहचार दर्शन मात्र से उक्त व्याप्ति का ज्ञान हो जाता है। इसलिए वेदान्त दर्शन में बार बार साहचर्य दर्शन अथवा एक बार सहचार दर्शन हो इस विषय में आग्रह नहीं है। सहचार दर्शन मात्र ही व्याप्ति ज्ञान का प्रयोजक है। बस इतना ही माना गया है।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

नाप्यनुमानस्य व्यतिरेकिरूपत्वम्। साध्याभावे साधनाभावनिरूपितव्याप्तिज्ञानस्य साधनेन साध्यानुमितावनुपयोगात्। कथं तर्हि धूमादावन्वयव्याप्तिमविदुषोऽपि व्यतिरेकव्याप्तिज्ञानादनुमितिः? अर्थापत्तिप्रमाणादिति वक्ष्यामः।

एवं प्रथमभेदं निराकृत्य केवलव्यतिरेकिरूपं द्वितीयभेदं निराचष्टे—नाप्यनुमानस्येति। व्यतिरेकिरूपत्वं—केवलव्यतिरेकिरूपत्वम्। साधनेन हि साध्यमनुमीयते, तत्र च साध्यसाधनयोर्व्याप्तिज्ञानमुपयुज्यते, न तु साध्याभावसाधनाभावयोरित्याह—साध्याभावे इति। तथा च पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वाद् यदितरेभ्यो न भिद्यते न तद्गन्धवद् यथा जलादीत्याद्युदाहरणानि त्वर्थापत्तेर्गन्धवत्त्वस्येतरभेदोपपादकत्वादिति भावः। नन्वन्वयव्याप्तिज्ञानरहितस्य व्यतिरेकव्याप्तिज्ञानादनुमितिर्भवति, भवन्मते सा कथमुपपद्यते इति शङ्कते—कथं तर्हीति। तस्यार्थापत्तिप्रमाणाद् वह्न्यादिज्ञानं, न त्वनुमानादतो नोक्तदोष इत्याह अर्थापत्तेति। वक्ष्यमाणरीत्या अर्थापत्तिप्रमाणस्यावश्यकतया व्यतिरेक्यनुमानस्य तदन्तर्भावसम्भवे तत्पृथक्त्वस्याभ्युपगमो न युक्त इति भावः।

अ०—ऐसे ही अनुमान में केवल व्यतिरेकित्व भी नहीं है क्योंकि साध्याभाव में रहने वाली साधनाभाव की व्याप्ति का ज्ञान साधन से साध्य अनुमिति में अनुपयुक्त ही है। यदि कहो—तब तो धूम में वह्नि की अन्वयव्याप्ति न जानने वाले को व्यतिरेक व्याप्ति ज्ञान से अनुमिति कैसे हो सकेगी? तो यह कहना ठीक नहीं—क्योंकि वहां पर अर्थापत्ति प्रमाण से काम चल जाएगा—ऐसा हम कहेंगे।

अनुमान त्रैविध्य का खण्डन

सु०—इस प्रकार व्याप्ति ज्ञान को अनुमिति का करण रूप से अनुमान सिद्ध कर दिया गया, अब नैयायिकों के त्रिविध अनुमान का खण्डन करना है। वेदान्त में अनुमान के तीन भेद न मानकर एक अन्वयि रूप हीं माना गया है। न केवलान्वयि, न केवल व्यतिरेकी और न अन्वय व्यतिरेकी ही अनुमान माना गया है।

अन्वयि रूप का तात्पर्य है 'अन्वय मुख व्याप्ति ज्ञान रूपम्' यदि कहो कि केवल प्रतिज्ञामात्र से तो किसी अर्थ की सिद्धि होती नहीं। अर्थसिद्धि के लिए तो प्रमाण चाहिये। यदि न्याय सिद्धान्ताभिमत त्रिविध अनुमान आपको इष्ट नहीं

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Institute of Vedic Studies. AAIS(USA)

अत एवानुमानस्य नान्वयव्यतिरेकिरूपत्वं व्यतिरेकव्याप्तिज्ञानस्यानुमित्यहेतुत्वात् ।

तृतीयभेदं निराकरोति—अत एवेति । यतो व्यतिरेकव्याप्तिज्ञानस्य नानुमितिजनकत्वमत एवेत्यर्थः । अन्वयव्यतिरेकिरूपे त्वन्वयव्याप्तिज्ञानस्यैवानुमितिजनकत्वे व्यतिरेकव्याप्तिज्ञानस्य तज्जनकत्वाभ्युपगमस्य वैयर्थ्यादित्याह—व्यतिरेकेति ।

अ०—इसीलिए अनुमान को अन्वय व्यतिरेकि रूप भी नहीं कह सकते क्योंकि व्यतिरेक व्याप्ति ज्ञान को अनुमिति में कारण नहीं माना गया है ।

सु०—है तो उसका निषेध भी करना पड़ेगा, अतः पहले केवलान्वयिका निषेध करते हैं । केवलान्वयि का अर्थ होता है—'अत्यन्ताभावा प्रतियोगि साध्यकत्व' अर्थात् जिस अनुमान के साध्य का अत्यन्ताभाव किसी भी देशकाल में न मिले वह साध्य अत्यन्ताभाव का अप्रतियोगी कहलायगा । ऐसे वाच्यत्व प्रमेयत्वादि धर्म न्यायमत में माने गये हैं; क्योंकि वाच्यत्व प्रमेयत्वादि सर्वत्र हैं उसका अत्यन्ताभाव कहीं भी नहीं मिलता, इसलिए वह अत्यन्ताभाव का अप्रतियोगी हुआ । ऐसे अत्यन्ताभाव के अप्रतियोगी साध्य वाले अनुमान को न्याय मत में केवलान्वयि कहा है ! किन्तु 'नेह नानास्ति किंचन' (इस ब्रह्म में नाना जगत कुछ भी नहीं है) इस श्रुति वाक्य से ब्रह्म में सभी पदार्थों का अत्यन्ताभाव कहा है । अतः सभी वस्तु ब्रह्मनिष्ठ अत्यन्ताभाव की प्रतियोगी हो गई । यहाँ तक कि ब्रह्म में वाच्यत्व और प्रमेयत्व भी नहीं है क्योंकि ब्रह्म को अवाङ्मनसगोचर कहा है । श्रुति भी निषेध मुख से ब्रह्म का प्रतिपादन कर पाती है । विधि मुख से प्रतिपादन करने वाली श्रुति भी जिस किसी प्रकार लक्षणा वृत्ति के द्वारा अधिकारियों को बोध करा पाती है । अतः वाणी का अविषय होने से उसमें वाच्यत्व नहीं; एवं प्रमाण का विषय न होने से प्रमेयत्व भी नहीं । इससे ब्रह्मनिष्ठ वाच्यत्वादि का भी अभाव सिद्ध हुआ । ऐसी स्थिति में वाच्यत्वादि केवलान्वयि पदार्थ भी ब्रह्मनिष्ठ अत्यन्ताभाव का प्रतियोगी ही सिद्ध हो गया अप्रतियोगी नहीं । फिर अत्यन्ताभाव का अप्रतियोगी साध्यवाला केवलान्वयि अनुमान कैसे सिद्ध हो सकेगा ? अतः केवलान्वयित्व का खण्डन हो गया ।

केवलान्वयित्व का खण्डन कर अब अनुमान में केवलव्यतिरेकि रूपत्व का भी खण्डन करते हैं । केवलव्यतिरेकि का स्वरूप नैयायिक बतलाते हैं—'व्यतिरेकमात्रव्याप्तिकं केवल व्यतिरेकि यथा पृथ्वी, इतर-भेदवती, गन्धवत्वात्

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सु०–जलवत्' (पृथ्वी, इतर भेद वाली है, गन्ध वाली होने से, जल के समान)

अब जरा विचार कर देखो कि जलदृष्टान्त में साध्यसाधन का साहचर्य नैयायिक बतलाते नहीं किन्तु 'यत्र इतरभेदो नास्ति तत्र गन्धोऽपि नास्ति' (जहां इतर भेद नहीं है वहां गन्ध भी नहीं है)। इतर शब्द से वे पृथ्वी से भिन्न सभी पदार्थों को मानते हैं और उनका भेद पृथ्वी में सिद्ध करना चाहते हैं गन्ध हेतु से। यहां पर 'जहां गन्ध है वहां इतरभेद है ऐसा कह नहीं सकते क्योंकि गन्ध केवल पृथ्वी में रहती है और पृथ्वी तो इस अनुमान में पक्ष ही है। दृष्टान्त सदा पक्ष से भिन्न हुआ करता है और ऐसा कोई अन्वय दृष्टान्त मिल नहीं रहा है। विवश हो उन्हें व्यतिरेक दृष्टान्त देना पड़ता है जहां इतरभेद नहीं है वहां गन्ध नहीं है जैसे जल' इसमें तो इतरभेदाभाव व्याप्य है और गन्धाभाव व्यापक है अर्थात् इतरभेदाभाव में गन्धाभाव की व्याप्ति है। हमें अनुमान गन्ध से इतरभेद का करना है। गन्ध में तो व्याप्ति ही नहीं फिर भला साध्याभाव में रहने वाली साधना भाव की व्याप्ति के ज्ञान का साधना से साध्य की अनुमिति में क्या उपयोग हो सकेगा। अतः व्यतिरेकि-रूप अनुमान मानना न्याय विरुद्ध है।

यदि कहो कि 'यत्र यत्र धूमः तत्र तत्र वह्निः' ऐसा अन्वय साहचर्य वास्तव में है। पर उस साहचर्य का ज्ञान जिसे नहीं है उस व्यक्ति को 'जहां वह्नि नहीं है वहां धूम नहीं है जैसे जलह्रद' इस प्रकार के व्यतिरेक व्याप्ति ज्ञान से धूम द्वारा वह्नि की अनुमिति अब तक होती थी यदि व्यतिरेक व्याप्ति नहीं मानोगे तो अन्वय व्याप्ति ज्ञान से रहित व्यक्ति को धूम से वह्नि की अनुमिति कैसे हो सकेगी; होती तो है। अतः व्यतिरेक व्याप्ति माननी ही चाहिए ? तो ऐसा कहना ठीक नहीं। वहां पर वह्नि का ज्ञान अनुमान से न करके अर्थापत्ति प्रमाण से वह्नि की कल्पना कर ली जाती है यदि कहो; हम तो अर्थापत्ति प्रमाण ही नहीं मानते हैं तो ऐसा कहना ठीक नहीं अर्थापत्ति प्रमाण का स्वरूप आगे बतलायेंगे जो अवश्य मान्य होगा। जहां जहां व्यतिरेकि अनुमान से साध्य की सिद्धि नैयायिक करना चाहते हैं वहां वेदान्ती अर्थापत्ति प्रमाण से उसकी कल्पना कर लेते हैं। अतः व्यतिरेक व्याप्ति ज्ञान का साधन से साध्य की अनुमिति में उपयोग न होने के कारण एवं व्यतिरेकी अनुमान के विषय की सिद्धि अर्थापत्ति प्रमाण से हो जाने के कारण केवल व्यतिरेकि अनु-मान मानना सर्वथा असंगत है।

अब न्यायशास्त्राभिमत अनुमान के तृतीय भेद का निराकरण किया जाता है। हमने व्यतिरेक व्याप्ति ज्ञान को अनुमिति का कारण नहीं माना

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अत्र केचित् स्ववृत्तिविरोधिवृत्तिमदत्यन्ताभावाप्रतियोगित्वं साध्यस्य केवलान्वयित्वम्। तत्साधकत्वं केवलान्वयिलिङ्गलक्षणं प्रमेयत्वादेश्च स्वसमानाधिकरणपारमार्थिकत्वावच्छिन्नात्यन्ताभावप्रतियोगित्वेऽपि स्ववृत्तिविरोधिवृत्तिमदत्यन्ताभावाप्रतियोगित्वात्केवलान्वयित्वम्। न च श्रुतिविरोधः शङ्क्यः, तस्या अपि पारमार्थिकत्वावच्छिन्नद्वैताभावपरत्वात्। तदुक्तं विवरणे—'आगमेन च द्वैतस्य तत्वांशबाधात्' इति। न च लक्षणे स्ववृत्तिविरोधीति व्यर्थं, तस्याव्याप्यवृत्तिकस्यापि संयोगात्यन्ताभावादिसंग्रहार्थत्वात्। न च ब्रह्मणः स्वप्रकाशत्वेन तत्र स्वरूपेणापि प्रमेयत्वाभावात्कथं केवलान्वयित्वमिति वाच्यम्, ब्रह्मणोऽपि वृत्तिलक्षणप्रमाविषयत्वात्। न चैतावता स्वप्रकाशत्वविरोधः, अनुपहितस्यैव तथात्वात्। न चैवमपि नाभिधेयत्वं केवलान्वयि, ब्रह्मणोऽनभिधेयत्वादिति वाच्यम्। ब्रह्मणो लक्ष्यतया वाच्यत्वाभावेऽपि पदजन्यज्ञानविषयत्वात्, वाच्यत्वस्यापि ग्रन्थकृता वक्ष्यमाणत्वाच्च। न चैवं प्रमेयत्वादिविरोधिवृत्तिमदत्यन्ताभावस्याप्रसिद्धत्वात्तत्र लक्षणाव्याप्तिः, स्ववृत्तिविरोधिवृत्तिमदत्यन्ताभावप्रतियोगिनो घटादयः प्रसिद्धास्तदन्यत्वस्य प्रमेयत्वादावपि सत्वात्। एवं धूमादावन्वयव्याप्तिमविदुषोऽपि व्यतिरेकव्याप्तिज्ञानाद्वह्निज्ञानमित्यविवादम्। तच्चानुमितिरेव वह्निमनुमिनोमीत्यनुव्यवसायात्। न च क्लृप्तकारणव्याप्तिज्ञानस्याभावात् कथमनुमितिरित्युक्तमिति वाच्यम्, व्यतिरेकव्याप्तिज्ञानस्य सत्वात्। न चैतदनुमित्यकरणमिति वाच्यम्, स्वव्यभिचारार्थाविरोधिधर्माविषयव्याप्तिज्ञानत्वेन व्याप्तिज्ञानस्यानुमितिहेतुत्वात्, अस्य च व्यतिरेकव्याप्तिज्ञानसाधारणत्वात्।

नन्वनुमानस्य व्यतिरेकितयाऽपि प्रामाण्याभ्युपगमे तत्रैवार्थापत्तेरन्तर्भावापत्तौ सा पृथक्प्रमाणमिति राद्धान्तो भज्येतेति चेत्तर्ह्यनुमानस्य प्रामाण्ये संशयाद्युत्तरप्रत्यक्षस्थले चक्षुरादेः प्रामाण्यं न स्यात्, तत्रानुमितिसामग्रीसत्वेनानुमितेरेवोत्पत्तेः। तथा शाब्दस्थलेऽपि शब्दो न प्रमाणं स्यात्, एते पदार्थास्तात्पर्यविषयपरस्परसंसर्गवन्त आकाङ्क्षादिमत्पदकदम्बस्मारितत्वादित्यनुमानेनैव क्लृप्तप्रमाणभावेन तात्पर्यविषयसंसर्गप्रतीतेः सम्भवात्। यदि स्थाणुं साक्षात्करोमि शब्दादमुमर्थं जानामीत्यनुव्यवसायात्प्रत्यक्षशब्दयोः पृथक् प्रामाण्यम्, तदा व्यतिरेक-

---

सु०—इसलिए ही अन्वयव्यतिरेकि अनुमान भी अमान्य है। क्योंकि इसमें अन्वयव्याप्ति ज्ञान ही अनुमिति का जनक है फिर व्यतिरेक व्याप्ति ज्ञान को अनुमिति का कारण मानना व्यर्थ ही है। अतः न्यायशास्त्राभिमत केवलान्वयि, केवलव्यतिरेकि तथा अन्वयव्यतिरेकि तीनों ही अनुमानों का खण्डन हो गया। एक मात्र अन्वयी रूप एक ही अनुमान सिद्ध हुआ।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

व्याप्तिज्ञानादिघटितायामनुमितिसामग्र्यां सत्यामपि वह्निज्ञानानन्तरं धूमेन वह्निं कल्पयामीति यदाऽनुव्यवसायः, तदा धूमस्यार्थापत्तिविधया प्रामाण्यमितितुल्यम्।

यद्वा, निरुपाधिव्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते, इति व्यतिरेकिण्यप्यन्वयव्याप्तिज्ञानमेवानुमितिहेतुः। न चैवं सत्यन्वयिव्यतिरेकिणोर्भेदो न स्यादिति वाच्यम्, व्यतिरेकसहचारमात्रज्ञानजन्यान्वयव्याप्तिर्धीर्यत्रानुमितिहेतुः स व्यतिरेकी, यत्रान्वयसहचारमात्रज्ञानजन्यान्वयव्याप्तिधीरनुमितिहेतुः सोऽन्वयी, यत्रोभयविधसहचारज्ञानजन्यान्वयव्याप्तिधीरनुमितिहेतुः सोऽन्वयव्यतिरेकीति विभागोपपत्तेः। अस्मिंश्च पक्षे यदा अन्वयसहचारेणैवान्वयव्याप्तिस्फुरणं, तदा धूमस्य केवलान्वयितया गमकत्वम्। यदा व्यतिरेकसहचारेणैवान्वयव्याप्तिस्फुरणम्, तदा केवलव्यतिरेकितया। यदाऽन्वयव्यतिरेकसहचारेणान्वयव्याप्तिस्फुरणं, तदाऽन्वयव्यतिरेकितया। यदा व्यतिरेकसहचारेण व्यतिरेकव्याप्तेरेव ज्ञानं तदाऽर्थापत्तिविधया धूमस्य प्रामाण्यम्। न च व्यतिरेक्यनुमानस्य पृथक्प्रमाणत्वेऽपसिद्धान्तः, मूलग्रन्थेषु शुक्तिरूप्यमिथ्यात्वादौ तत्र तत्र व्यतिरेक्यनुमानस्यापि प्रमाणत्वेनोपन्यासात्। तस्मात्त्रिविधमेवानुमानमिति युक्तमिति वदन्ति। तत्रेदंवक्तव्यम्—न तावदौपनिषदमतेऽनुमानस्य केवलान्वयित्वं सम्भवति, सर्वस्य प्रपञ्चस्य ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वाभिधानात्। ब्रह्मणि प्रपञ्चात्यन्ताभावो व्यावहारिक इति पक्षे स्ववृत्तिविरोधिवृत्तिमदत्यन्ताभावप्रतियोगित्वं प्रमेयत्वादेरायाति, न तु तदप्रतियोगित्वम्।

नन्वेवं तर्हि निषेधस्य बाध्यत्वेन पारमार्थिकसत्वाविरोधित्वादर्थान्तरमिति चेद्, न, स्वाप्तार्थस्य स्वाप्तनिषेधेन बाध्येनापि बाधदर्शनात्। न च निषेधस्य बाध्यत्व पारमार्थिकसत्वाविरोधित्वे तन्त्रम्, किं तु निषेध्यापेक्षया न्यूनसत्ताकत्वम्। प्रकृते च तुल्यसत्ताकत्वाद्विरोधित्वमविरुद्धम्। तत्र हि निषेधस्य निषेधे प्रतियोगिसत्वमायाति यत्र निषेधस्य निषेधबुद्ध्या प्रतियोगिसत्त्वं व्यवस्थाप्यते निषेधमात्रं तु निषिध्यते, यथा रजते नेदं रजतमिति प्रतीत्यनन्तरमिदं नारजतमिति ज्ञानेन रजतं व्यवस्थाप्यते तन्निषेधमात्रं तु निषिध्यते। यत्र तु प्रतियोगिनिषेधयोरुभयोरपि निषेधस्तत्र न प्रतियोगिसत्त्वम्; यथा ध्वंससमये प्रागभावप्रतियोगिनोरुभयोर्निषेधः। तथा च प्रकृतेऽपि निषेधस्य बाध्यत्वेऽपि प्रपञ्चस्य न तात्त्विकत्वं निषेधबाधकेन प्रतियोगिनः प्रपञ्चस्य तन्निषेधस्य च बाधनात्, उभयोरपि निषेध्यतावच्छेदकस्य दृश्यत्वादेस्तुल्यत्वात्। न चातात्त्विकनिषेधबोधकत्वाच्छ्रुतेरप्रामाण्यं शङ्क्यं, ब्रह्मभिन्नस्यातात्त्विकत्वं बोधयतः शास्त्रस्याप्रामाण्यायोगात्। एतन्निषेधप्रतियोगित्वं च स्वरूपेणैव, न तु सद्विलक्षणस्वरूपानुपमर्दितपारमार्थिकत्वाकारेण, स्वरूपेण त्रैकालिकनिषेधप्रतियोगित्वस्य प्रपञ्चे शुक्तिरज-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तादी चाभ्युपगमात्। रजतभ्रमानन्तरमधिष्ठानसाक्षात्कारे सति रजतस्य रजतं नास्ति नासीद् न भविष्यतीति स्वरूपेणैव, नेह नाना' क० २-१० इति श्रुत्या च प्रपञ्चस्य स्वरूपेणैव निषेधप्रतीतेः। न च तत्र लौकिकपारमार्थिकरजतमेव स्वरूपेण निषेधप्रतियोगीति वाच्यम्, भ्रमबाधयोर्वैयधिकरण्यापत्तेः, अप्रसक्तप्रतिषेधापत्तेश्च। न चैवं विवरणाचार्य्यवाक्यविरोध इति वाच्यम्, तस्य पक्षान्तरपरत्वात् अन्यथाऽबाध्यत्वरूपपारमार्थिकत्वस्य बाध्यत्वरूपमिथ्यात्वनिरूप्यत्वेनान्योन्याश्रयापातात्।

किञ्च नात्र रजतमिति प्रतीतौ, यथा रजतस्य स्वरूपेण पारमार्थिकत्वेन च निषेधो विषयस्तथा 'नेह नानास्ति किञ्चन' क० २-१० इत्यत्रापि प्रपञ्चस्य स्वरूपेण पारमार्थिकत्वेन च निषेधो विषयः। भिन्नविभक्त्यन्तापस्थापिते धर्मिणि प्रतियोगिनि च नञः संसर्गाभावबोधकत्वनियमस्य व्युत्पत्तिसिद्धत्वात्। अस्तु वा पारमार्थिकत्वाकारेणैव निषेधस्तथाऽपि प्रमेयत्वादेर्ब्रह्मरूपधर्मिन्यूनसत्ताकत्वे कथं केवलान्वयित्वम्? तत्वे च समसत्ताकत्वावश्यंभावात् कथं बाध्यत्वम्? तस्माद्ब्रह्मातिरिक्तं सर्वं मिथ्येतिवादिनः केषांचिद्धर्माणां केवलान्वयित्वकथनं केवलसाहसविजृम्भितम्।

एतेन ब्रह्मणि अभिधेयत्वस्थापनमपि निरस्तम्। 'यद्वाचाऽनभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि' के०—१-४ 'अविज्ञातं विजानताम्' के० २-१-१ 'प्रतिबोधविदितं मतम्' के० २-३ इत्यादिश्रुत्या ब्रह्मणि वाच्यत्वादेर्निषिद्धत्वात्। न च ग्रन्थकृता तत्र वाच्यत्वं वक्ष्यमाणमिति भ्रमितव्यम्, लक्षणां विना शक्त्याऽपि महावाक्येनाखण्डार्थो बोधयितुं शक्यते इत्येतत्परोत्तरग्रन्थस्य ब्रह्मणि वाच्यत्वमस्तीत्येतत्कथनपरत्वाभावात्। यदपि व्यतिरेक्यनुमानोपपादनं तदप्यसङ्गतम्। अर्थापत्तिवादिनां तदावश्यकत्वे तद्वादिनामर्थापत्तेरावश्यकत्वापत्तेः।

यत्तु प्रत्यक्षशब्दयोर्यथा पृथक् प्रामाण्यं तथाऽर्थापत्तेरपीत्यादि, तदपि न। व्यतिरेकव्याप्तेरेवार्थापत्तिप्रमाणत्वेन द्वयोः सामग्रीभेदाभावेन वैषम्यात्। तथा च व्यतिरेकव्याप्तिज्ञाने यत्र वह्न्यादिज्ञानं तत्र वह्निं कल्पयामि इत्याकारकानुव्यवसायोपलम्भात् तत्करणमर्थापत्तिरेव न त्वनुमानं, तस्यानुमित्यहेतुत्वात्।

यत्तु व्यतिरेकसहचारमात्रज्ञानजन्यान्वयव्याप्तिधीर्यत्रानुमितिहेतुः स व्यतिरेकीत्यादि, तदपि न। अन्वयसहचारदर्शनस्यान्वयव्याप्तिज्ञानजनकताया व्यतिरेकसहचारदर्शनस्य व्यतिरेकव्याप्तिज्ञानजनकतायाः सर्वलोकानुभवसिद्धतया तद्विरुद्धकार्यकारणभाववर्णनानौचित्यात्। तथा च नास्त्यर्थापत्तिव्यतिरिक्तं व्यतिरेक्यनुमानम्। एतेन तस्यान्वयव्यतिरेकिरूपत्वमपि प्रत्युक्तम्। तस्मादनुमानमन्वयिरूपमेवेति सुष्ठूक्तं मूलकृद्भिः। अन्यथाऽपसिद्धान्तापातः, साम्प्रदायिक-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तच्चानुमानं स्वार्थपरार्थभेदेन द्विविधम्। तत्र स्वार्थं तूक्तमेव, परार्थं तु न्यायसाध्यम्। न्यायो नामावयवसमुदायः। अवयवाश्च त्रय एव प्रसिद्धाः—प्रतिज्ञाहेतूदाहरणरूपाः, उदाहरणोपनयनिगमनरूपा वा, न तु पञ्चावयवरूपाः। अवयवत्रयेणैव व्याप्तिपक्षधर्मतयोरुपदर्शन-सम्भवेनाधिकावयवद्वयस्य व्यर्थत्वात्।

ग्रन्थेषु केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेक्यनुमानानां क्वाप्यनुपन्यासात्। क्वचित्प्रयोगस्तु परमतानुसारेण द्रष्टव्य इत्यास्तां तावत्।

द्रव्यत्वाभ्युपगमेऽपि दोषाभाव इत्यभिप्रेत्य हेत्वन्तरमाह—एकधेति। एकधा ईश्वररूपेण एकः। बहुधा—जीवात्मना नानारूपः। आदिपदेन 'उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा' इति वाक्यशेषो ग्राह्यः। ब्रह्मप्रतिबिम्बाभावानुमानस्य—ब्रह्म न प्रतिबिम्बितुमर्हत्यचाक्षुषत्वाद्गन्धादिवदित्येवंरूपस्यानुमानस्य। तथा च बादरायणस्य सूत्रे 'आभास एव च' (ब्र० सू० २-३-५०) 'अत एव चोपमा सूर्यकादिवत्' (ब्र० सू० ३ २-१८) इति। अत्र विस्तरभयाद् मूलकृता त्यक्तोऽवच्छेदवादोऽपि द्रष्टव्यः। तथा हि घटाकाशवदन्तःकरणावच्छिन्नं चैतन्यं जीवस्तदनवच्छिन्नं तदीश्वरः। आलोकप्रतिबिम्बे गगनप्रतिबिम्बतत्वव्यवहारस्य भ्रममात्रमूलकतया बिम्बस्य प्रतिबिम्बस्थानाभावनियमस्य भङ्गाभावाद् ब्रह्मप्रतिबिम्बो न युक्तः। ननु ब्रह्माण्डान्तरवर्तितत्तदन्तःकरणोपाधिभिस्तदन्तर्वर्तिचैतन्यस्य सर्वात्मना जीवभावेनावच्छेदात्तदवच्छेदरहितचैतन्यात्मकस्येश्वरस्य ब्रह्माण्डान्तरसत्त्वापत्तिरत्रापि समानेति चेन्न। अविद्याश्रयत्वान्तःकरणसंवलितत्वाद्युपाधिकाज्जीवाद्भिन्नस्याविद्याविषयत्वान्तःकरणासंवलितत्वाद्युपाधिकस्यान्तर्यामिण ईश्वरस्य ब्रह्माण्डान्तरवस्थानसम्भवात्। न च कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इति वाक्यविरोधः। तस्य पक्षद्वयेऽपि तुल्यत्वात्। कारणावच्छिन्नस्य कार्यानवच्छिन्नत्वे बाधकाभावात्। न चास्मिन्पक्षे श्रुतिसूत्रविरोधः। भाष्यकारैरेवात एव चेति सूत्रं व्याख्याय सूर्यादिवदात्मनः प्रतिबिम्बो न युज्यत इति तदाक्षेपकत्वेन 'अम्बुवदग्रहणात्तु न तथात्वम्' (ब्र० सू० ३-२-१९) इति सूत्रं व्याख्याय 'वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्' (ब्र० सू० ३-२-२०) इति सूत्रे उक्तानुपपत्तिमङ्गीकृत्यैव श्रुत्युक्तदृष्टान्तस्य सोपाधिकस्यात्मनो वृद्धिह्रासादिभाक्त्वं न निरुपाधिकस्येति प्रदर्शनार्थं न चात्मा प्रतिबिम्बत इत्यभिहितत्वात्। बृहदारण्यकभाष्यादौ प्रति-

---

अ०—"जिस प्रकार ज्योतिरूप सूर्य एक होता हुआ भी भिन्न भिन्न जल के भेद से बहुधा प्रतीत होता है" इत्यादि वाक्य में एक ब्रह्म की उपाधि भेद से अनेक रूपता सिद्ध हो जाती है। अतः उक्त श्रुति वाक्य से ब्रह्म प्रतिबिम्ब अभाव का साधक अनुमान बाधित हो जाता है। इस प्रकार तत्पदार्थ का निरूपण हुआ।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

बिम्बरूपेण प्रवेशो न सम्भवतीत्युक्तत्वाच्चेति सङ्क्षेपः। विस्तरस्त्वन्यत्र द्रष्टव्यः। मूलकर्तुरप्ययमेव पक्षोऽभिप्रेतः। प्रत्यक्षपरिच्छेदे ईश्वरसाक्षीत्यादि-प्रकरणे एतत्पक्षस्य स्वसम्मतत्वेन सूचितत्वात्। तत्पदार्थनिरूपणमुपसंहरंस्त्व-पदार्थनिरूपणं प्रतिजानीते – तदेवमिति।

सु०–चैतन्य अन्तःकरण प्रदेश में नहीं है। ऐसा पूर्वोक्त दृष्टान्त से मानना ही पड़ेगा, फिर तो परमेश्वर में सर्वान्तर्यामित्व सिद्ध होना कठिन हो जायगा ?— ऐसा कहना ठीक नहीं–परिच्छिन्न ग्रीवास्थ मुख का दर्पण प्रदेश में रहना सम्भव नहीं है। फिर भी अपरिच्छिन्न बिम्ब आकाश, प्रतिबिम्ब प्रदेश जलादि में भी है ही। अर्थात् जलादि में बादल तारे इत्यादि के सहित आकाश का प्रतिबिम्ब का बिम्ब भूत व्यापक महाकाश जलप्रदेश में भी है। वैसे ही अन्तःकरण में जिस अपरिच्छिन्न चैतन्य का प्रतिबिम्ब पड़ता है वह व्यापक होने के कारण प्रतिबिम्ब प्रदेश अन्तःकरण में भी रहता ही है। ऐसा माननेमें विरोध नही है।

आपने जल में आकाश का प्रतिबिम्ब बतलाया, किन्तु विचार दृष्टि से अभ्रादि का ही उसमें प्रतिबिम्ब दीखता है। नीरूप आकाश का नहीं। ठीक वैसे ही नीरूप ब्रह्म का भी प्रतिबिम्ब सम्भव नहीं है, क्योंकि सर्वत्र रूप वाले पदार्थ का ही रूप वाले पदार्थ में प्रतिबिम्ब देखा गया है। स्वल्प जल में अनन्तयोजन गाम्भीर्यरूप प्रतिबिम्ब आकाश का कथंचित् मान भी लें, फिर भी प्रतिबिम्ब का आश्रय तो वहाँ रूपवद् द्रव्य जल ही है। अतः नीरूप अविद्या में रूपरहित ब्रह्म का प्रतिबिम्ब कथमपि सम्भव नहीं है ? ऐसा कहना ठीक नहीं। क्योंकि 'गुणे गुणानङ्गीकारात्' इस नियम से रूप में रूप आप भी नहीं मानते, फिर भी उसका प्रतिबिम्ब दर्पणादि में दीखता है। एवं नीरूप शब्द की प्रतिध्वनि रूप प्रतिबिम्ब नीरूप आकाश में देखा गया है। वैसे ही नीरूप ब्रह्म का रूपरहित अन्तःकरणादि में प्रतिबिम्ब हो सकता है। यदि कहो कि रूप रहित गुण का प्रतिबिम्ब हो सकता है, किन्तु रूपरहित द्रव्य का प्रतिबिम्ब नहीं हो सकता ? तो ऐसा कहना ठीक नहीं, क्योंकि आत्मा निर्गुण होने से गुणाश्रय रूप द्रव्य नहीं है। एवं समवाय की सिद्धि न होने के कारण सम-वायिकारणत्व रूप द्रव्यत्व भी आत्मा में नहीं है। इसे हम बहुधा कह आये हैं। अतः बिम्ब ईश्वरवाद में कोई दोष नहीं। ईश्वर बिम्ब है, यह बात उक्त श्रुति से सिद्ध हो चुकी है। महर्षि बादरायण ने भी ब्रह्मसूत्र में 'आभास एव च' (आभास ही जीव है) इत्यादि सूत्रों से जीव को प्रतिबिम्ब तथा ईश्वर को बिम्ब सिद्ध कर चुके हैं।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

इदानीं त्वं पदार्थो निरूप्यते।

एकजीववादेऽविद्याप्रतिबिम्बो जीवः, अनेकजीववादे अन्तःकरण-प्रतिबिम्बः। स च जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयवान्। तत्र जाग्रद्दशानामेन्द्रियजन्यज्ञानावस्था। अवस्थान्तरे इन्द्रियाभावान्नातिव्याप्तिः। इन्द्रियजन्यज्ञानं चान्तःकरणवृत्तिः। स्वरूपज्ञानस्यानादित्वात्।

तत्रैकजीववादे तत्स्वरूपमाह—एकेति। अविद्याया एकत्वेन तत्प्रतिबिम्बस्य जीवस्याप्येकत्वौचित्यादिति भावः। 'तद्यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्' (बृ० १-४-१०) 'यथाग्नेः क्षुद्राविस्फुलिङ्गा व्युच्चरन्ति एवमेवैतस्मादात्मनः सर्व एत आत्मानः' (बृ० २-१-२०) इत्यादिश्रुतेः 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' (भ० गी० ७ १४) इत्यादिस्मृतेः 'भोगेन त्वितरे क्षपयित्वा सम्पद्यन्ते' (ब्र० सू० ४-१-१९) इत्यादिसूत्रात्। स च स्वात्मभूतानिव घटाकाशस्थानीयानविद्योपस्थापितनामरूपकृतकार्यकरणसङ्घातानुरोधिनो जीवाख्यान् विज्ञानात्मनः प्रतीष्ट इत्यादिभाष्यादनन्तजीवनिर्भासास्पदमेकरसं ब्रह्मेति पद्मपादाचार्योक्तेश्चैकजीववादोऽयुक्त इत्यभिप्रेत्याह—अनेकेति। इदमुपलक्षणमविद्यावच्छिन्नो जीव इति मतस्यापि, मायाभिरिति बहुवचनादविद्यायास्तच्छक्तेर्नानात्वाज्जीवनानात्वम्। अजामित्येकवचनं तु जात्यभिप्रायकम्। न च कार्योपाधिरयं जीव इति वाक्यविरोधः। समाहितत्वात्। स्वमपीतो भवति' (छा० ६-४-१) इति श्रुतिस्तु तदानीमन्तःकरणलये कर्तृत्वाद्यभावादुपपन्ना। गत्यादिकमप्यातिवाहिकशरीरगमनादिप्रयुक्तमित्यविरोधः। तस्योपाधिगतावस्थावत्त्वमाह—स चेति। तुरीयावस्थातूपाधितादात्म्याध्यासनिवृत्तिकालीना। तदुपहितचैतन्यस्य जीवस्य जाग्रदाद्यवस्थात्रयवत्त्वं लक्षणमुक्तम्, तत्र जाग्रदवस्थां लक्षयति—जाग्रदिति। इन्द्रियजन्यज्ञानयोग्यसमय इत्यर्थः। इन्द्रियजन्येति पदकृत्यमाह—अवस्थान्तर इति। स्वप्नसुषुप्त्य-

---

अ०—अब त्वं पदार्थ का निरूपण करते हैं। एक जीववाद में अविद्या में प्रतिबिम्ब एवं अनेक जीववाद में अन्तःकरण में प्रतिबिम्ब को जीव कहते हैं। वह जीव जाग्रत् स्वप्न और सुषुप्ति रूप तीन अवस्था वाला है।

अ०—उक्त तीनों अवस्थाओं में इन्द्रियजन्य ज्ञानकी अवस्थाको जाग्रत कहते हैं दूसरी अवस्थाओं में इन्द्रियों का अभाव होने से जाग्रत के लक्षण की अतिव्याप्ति नहीं है। इन्द्रिय जन्य ज्ञान अन्तःकरण की वृत्ति रूप है, क्योंकि स्वरूप ज्ञान तो अनादि होने से इन्द्रिय जन्य नहीं है।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

वस्थयोरित्यर्थः। इन्द्रिजन्यज्ञानस्वरूपं किमित्याकाङ्क्षायामाह—इन्द्रियजन्येति। चैतन्यरूपं ज्ञानं कुतो नेत्यत आह—स्वरूपेति।

सु०—जिस प्रकार गन्ध चाक्षुष ज्ञान का विषय नहीं है। अतएव गन्ध का प्रतिबिम्ब भी नहीं होता। वैसे ही परमेश्वर का प्रतिबिम्ब नहीं हो सकता। यह ब्रह्म में बिम्बत्वाभाव का साधक अनुमान पूर्वोक्त श्रुति एवं सूत्र प्रमाण से बाधित जानना चाहिये। पूर्वोक्त ग्रन्थ से परिभाषाकार को प्रतिबिम्ब जीव तथा बिम्ब ईश्वर पक्ष ही अभीष्ट प्रतीत होता है। इसमें अर्थतः आभासवाद एवं अवच्छेदवाद का खण्डन भी जान लेना चाहिये।

त्वंपदार्थ निरूपणं

अविद्या के एक होने से उसमें प्रतिबिम्ब रूप जीव भी एक है किन्तु एक जीववाद पक्ष में बन्धमोक्षादि की व्यवस्था संभव न होने के कारण एक जीववाद श्रुति, स्मृति, भाष्य तथा आचार्य पद्मपाद को सम्मत नहीं है। अतः अनेक जीववाद समुचित प्रतीत होता है। यद्यपि अविद्या तथा उसकी शक्ति को नाना मानकर उसमें प्रतिबिम्बित जीव में नानात्व सिद्ध होता है। फिर भी अन्तःकरण में प्रतिबिम्ब को जीव मान कर जीव नानात्व का प्रतिपादन परिभाषाकार कर रहे हैं। वह जीव जाग्रत् स्वप्न और सुषुप्ति रूप तीन अवस्था वाला है। अतः जाग्रदादि अवस्थात्रयवत्वम् जीवत्वम् ऐसा जीव का लक्षण बन जाता है। तुरीयावस्था उपाधि तादात्म्य अध्यास निवृत्ति काल में होती है। उसे जीवत्व का प्रयोजक नहीं, बल्कि जीवभाव की निवृत्ति का प्रयोजक माना है। इसीलिये जीव के लक्षण में तुरीयावस्था को नहीं गिनाया।

जाग्रदवस्था

जीव की तीन अवस्थाएँ बतलायी गयी। इनमें इन्द्रियजन्य ज्ञान के योग्य अवस्था को जाग्रत् अवस्था कहते हैं। स्वप्न सुषुप्ति में इन्द्रियों का अभाव रहता है इसलिये उनमें जाग्रदवस्था के लक्षण की अतिव्याप्ति नहीं है। इन्द्रिय जन्य ज्ञान पद से अन्तःकरण की वृत्ति को समझना चाहिये, स्वरूप ज्ञान को नहीं, क्योंकि स्वरूप ज्ञान तो अनादि है, उसे इन्द्रियजन्य कहना ठीक नहीं—अतः स्वरूप ज्ञान को लेकर स्वप्नादि में जाग्रत के लक्षण की अतिव्याप्ति नहीं दे सकते। अन्तःकरण की वृत्ति में ज्ञान शब्द का प्रयोग गौणरूप से किया है। ऐसे इन्द्रिय जन्य अन्तःकरण की वृत्ति रूप ज्ञानवाली अवस्था को जाग्रत कहते हैं—

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सा चान्तःकरणवृत्तिरावरणाभिभवार्थेत्येकं मतम्। तथा हि—अविद्योपहितचैतन्यस्य जीवत्वपक्षे घटाद्यधिष्ठानचैतन्यस्य जीवरूपतया जीवस्य सर्वदा घटादिभानप्रसक्तौ घटाद्यवच्छिन्नचैतन्यावरकमज्ञानं मूलाविद्यापरतन्त्रमवस्थापदवाच्यमभ्युपगन्तव्यम्। एवं सति घटादेर्न सर्वदा भानप्रसङ्गः, अनावृतचैतन्यसम्बन्धस्यैव भानप्रयोजकत्वात्। तस्य चावरणस्य सदातनत्वे कदाचिदपि घटभानं न स्यादिति तद्भङ्गे वक्तव्ये, तद्भङ्गजनकं न चैतन्यमात्रम्। तद्भासकस्य तदनिवर्तकत्वात्। नापि वृत्त्युपहितचैतन्यम्, परोक्षस्थलेऽपि तन्निवृत्त्यापत्तेरिति परोक्षव्यावृत्तवृत्तिविशेषस्य, तदुपहितचैतन्यस्य वाऽऽवरणभङ्गजनकत्वमित्यावरणाभिभवार्था वृत्तिरित्युच्यते।

ननु स्वरूपज्ञानेनैव सर्वदा सिद्धेन विषयप्रकाशसिद्धौ तज्जन्या वृत्तिः किमर्थेत्यत आह - सा चेति। नन्वावरणभङ्गोऽपि चैतन्येनैव भविष्यतीत्याशङ्क्याह—तथा हीति। अविद्योपहितस्य तत्प्रतिबिम्बस्य तदवच्छिन्नस्य वा सर्वदा भानप्रसक्तिवारणायावरणरूपमूलाज्ञानशक्तिविशेषस्यावश्यकत्वे तद्भङ्गं विना कदाऽपि भानं न स्यादतस्तद्भङ्ग आवश्यक इत्यर्थः। आवरणभङ्गोऽपि चैतन्येनेत्यत्र किं चैतन्यमात्रेण किं वोपहितेनेति विकल्प्याद्यं प्रत्याह—नेति। तद्भासकस्य तत्सत्तास्फूर्तिप्रदस्य। तन्निवर्तकत्वे कदाऽप्यावरणस्यावस्थानं न स्याद्। एतेन तृणादिप्रकाशकस्याप्यग्नेस्तन्नाशकत्वदर्शनान्न भासकत्वनिवर्तकत्वयोर्विरोध इति प्रत्युक्तम्। वह्नेस्तृणादेः सत्तास्फूर्तिप्रदत्वरूपभासकत्वाभावात्। द्वितीयं निरस्यति - नापीति। वृत्तिविशेषस्य—घटाद्याकारायास्तत्तद्वृत्तेः। वृत्तेर्जडत्वात्कथं तयाऽऽऽवरणनिवृत्तिरिति चेत्तत्राह—तदुपहितेति। तादृशवृत्तेरभिव्यञ्जिकाया आवश्यकत्वेन वृत्तिरेव तथेत्याह—इतीति।

अ० - वह अन्तःकरण की वृत्ति आवरण अभिभव के लिये मानी गयी है, ऐसा एक मत है। इसमें अविद्या-उपहित चैतन्य को जीव मानने पर जीव रूप से घटादि के अधिष्ठान चैतन्य जीव को सदा घटादि का भान होना चाहिये। अतः घटादि से अवच्छिन्न चैतन्य को आवरण करने वाली मूलाविद्या के परतन्त्र तूलाविद्या को भी मानना चाहिये। इस तूलाविद्या से आवृत होने के कारण जीव रूप घटाद्यवच्छिन्न चैतन्य को सदा घटादि के भान का प्रसङ्ग नहीं आयगा, क्योंकि अनावृत चैतन्य के साथ विषय का सम्बन्ध ही विषय भान का प्रयोजक है। उस आवरण को नित्य मानने पर

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अ०—कभी भी घटादिका भान न हो सकेगा। अतः आवरणका भङ्ग,विषय भान के लिये मानना होगा। उस आवरण का नाशक चैतन्य मात्र नहीं है, क्योंकि आवरण का प्रकाशक उसका नाशक नहीं होता, नहीं तो परोक्ष स्थल में भी आवरण निवृत्ति का प्रसङ्ग आ जायगा। अतः परोक्ष स्थल से भिन्न वृत्त विशेष या उस वृत्ति विशेष से उपहित चैतन्य आवरण का नाशक है। अतएव आवरण अभिभव के लिये वृत्ति मानी गयी है।

वृत्ति का प्रयोजन आवरणाभिभव

सु०—निखिल प्रपञ्च का अधिष्ठान ब्रह्म चैतन्य में कल्पित प्रपञ्च का सदा सम्बन्ध होने से स्वरूप ज्ञान से ही विषय का प्रकाश हो सकता है। पुनः वृत्ति मानने की क्या आवश्यकता। इसका उत्तर विभिन्न आचार्यों ने भिन्न भिन्न प्रकार से दिया है। जिसे दिखलाया जाता है। आवरण अभिभव के लिए अन्तःकरण की वृत्ति की आवश्यकता कुछ आचार्यों ने मानी है। उनका कहना है, कि अविद्या उपहित चैतन्य जीव व्यापक होने से घटादि देश में भी सदा विद्यमान है, फिर भी घटादि का भान जीव को सदा इसलिये नहीं होता कि घटावच्छिन्न चैतन्य का आवरक एक अज्ञान है जिसे तूलाविद्या कहते हैं। वह शुद्ध चैतन्य को आवरण करने वाली मूला विद्या के आधीन अवस्था विशेष है। उस आवरण का घटाकार अन्तःकरण की वृत्ति के बिना नाश हो नहीं सकता। अतः घटाकार वृत्ति से आवरण का नाश हो जाने के बाद, अनावृत अविद्या उपहित जीव चैतन्य घट का प्रकाश करने लग जाता है। घटाकार वृत्ति से पूर्व घटावच्छिन्न चैतन्य आवृत होने के कारण घट का प्रकाश नहीं कर रहा था। इस आवरण को नित्य नहीं मान सकते, नहीं तो घटादि विषय का कभी भान ही नहीं हो सकेगा। अतः आवरण का नाश न तो चैतन्य और न उपाधि से हो सकता है। सामान्य चैतन्य उस आवरण का साधक होने से उसका बाधक नहीं हो सकता, जिस प्रकार सामान्य अग्नि काष्ठ का दाहक नहीं होती किन्तु इन्धन आदि से प्रकट हुई विशेष अग्नि काष्ठादि को जलाती है। यदि सामान्य अग्नि काष्ठ की विरोधी हो, तो, कहीं भी काष्ठ का दर्शन न हो सकेगा। वैसे ही अविद्योपहित चैतन्य आवरण का विरोधी हो, तो आवरण की स्थिति न बन सकेगी। अतः उक्त चैतन्य आवरण का विरोधी नहीं है, किन्तु विषयाकार अन्तःकरण की वृत्ति से आवरण के नाश हो जाने के बाद अनावृत जीव चैतन्य विषय का प्रकाश करता है। उपाधि को आवरण का नाशक मानने पर परोक्ष स्थल में भी आवरण निवृत्ति का प्रसङ्ग आ

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सम्बन्धार्था वृत्तिरित्यपरं मतम्। तत्राप्यविद्योपाधिकोऽपरिच्छिन्नो जीवः। स च घटादिप्रदेशे विद्यमानोऽपि घटाद्याकारापरोक्षवृत्तिविरह-दशायां न घटादिकमवभासयति, घटादिना तस्य सम्बन्धाभावात्। तदाकारवृत्तिदशायां तु भासयति, तदा सम्बन्धसत्त्वात्।

इत्येकं मतमित्युक्तिसूचितं द्वितीयं मतं दर्शयति–सम्बन्धार्थेति। तत्र—तस्मिन्मते। अविद्योपाधिकोऽपरिच्छिन्नो जीव इति मत इत्यर्थः।

अ०—दूसरे आचार्य विषय के साथ सम्बन्ध के लिये अन्तःकरण की वृत्ति को मानते हैं। इसमें अविद्या रूप उपाधि वाला जीव तो अपरिच्छिन्न होने से घटादि विषय देश में भी वर्तमान ही है। फिर भी घटाद्याकार अपरोक्ष वृत्ति का अभाव होने पर घटादि को जीव नहीं जान पाता, क्योंकि जीव का घटादि के साथ सम्बन्ध नहीं। विषयाकार वृत्ति दशा में जीव विषय को प्रकाशता है, क्योंकि उस समय उसका विषय के साथ सम्बन्ध हो गया है।

सु०—जायेगा। अतः परोक्ष वृत्तिसे भिन्न विषय सन्निकर्षसे जन्य विषयाकार वृत्ति विशेष है, अथवा ऐसी वृत्ति से उपहित चैतन्य ही आवरण का नाशक है। उभयथा विषय सन्निकर्ष जन्य वृत्ति आवरण भङ्ग के लिये मानना आवश्यक है। ऐसा उक्त आचार्य का अभिप्राय है।

सम्बन्धार्था वृत्ति

विषयाकार वृत्ति का प्रयोजन आवरण अभिभव के लिये कुछ आचार्यों ने बताया। दूसरे आचार्य विषय के साथ जीव के सम्बन्ध के लिये वृति मानते हैं। यद्यपि अविद्या उपाधि वाला जीव व्यापक है। अतः विषय प्रदेश में सदा विद्यमान ही है। फिर भी जब तक घटादि विषयाकार अपरोक्ष वृत्ति नहीं बन जाती, तब तक घटादि को वह जान नहीं सकता, क्योंकि वृत्ति की विरह दशा में विषय के साथ जीव का सम्बन्ध नहीं रहता। विषयाकार वृत्ति दशा में विषय के साथ सम्बन्ध हो जाने के कारण जीव उसे प्रकाशता है। अतः विषय के साथ सम्बन्ध के लिये वृत्ति मानना आवश्यक हो जाता है।

आपने अविद्या उपहित चैतन्य को जीव कहा। वह तो व्यापक है, अतः वृत्ति के बिना भी सम्पूर्ण दृश्य प्रपञ्च के साथ उसका सदा सम्बन्ध स्वाभाविक ही है। फिर सम्बन्धाभाव कहां है? जिसके लिये वृति मानते हो। क्या विषय के साथ जीव का सम्बन्ध कराने वाला नहीं है? अथवा असङ्ग

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

नन्वविद्योपाधिकस्यापरिच्छिन्नस्य जीवस्य स्वत एव समस्तवस्तु-सम्बद्धस्य वृत्तिविरहदशायां सम्बन्धाभावाभिधानमसङ्गतम्। असङ्गत्व-दृष्ट्या सम्बन्धाभावाभिधाने वृत्त्यनन्तरमपि सम्बन्धो न स्यादिति चेत्? उच्यते; न हि वृत्तिविरहदशायां जीवस्य घटादिना सह सम्बन्धसामान्यं निषेधामः; किं तर्हि, घटादिभानप्रयोजकं सम्बन्ध-विशेषम्। स च सम्बन्धविशेषो विषयस्य जीवचैतन्यस्य च व्यङ्ग्य-व्यञ्जकतालक्षणः कादाचित्कः तत्तदाकारवृत्तिनिबन्धनः।

ननु सम्बन्धाभावः सम्बन्धप्रयोजकाभावादुच्यते? किं वाऽऽत्मनोऽसङ्ग-त्वात्?। नाद्यः, परिच्छेदशून्यस्य घटादिसम्बन्धे प्रयोजकाकाङ्क्षाभावात्। न द्वितीयः, वृत्त्यनन्तरमपि तस्य दुर्घटत्वादिति शङ्कते—नन्विति। असङ्गत्वेति। 'असङ्गो न हि सज्जते' इतिश्रुत्युक्तपारमार्थिकासङ्गत्वदृष्ट्येत्यर्थः। त्वदापादित-सम्बन्धसामान्यं नास्माकं निषेध्यमतो नास्मदुक्तिरसङ्गतेत्याह—न हीति। पृच्छति—किं तर्हीति। उत्तरमाह—घटादीति। निषेधाम इत्यनुषज्यते। ननु स च सम्बन्धः संयोगः समवायो वा?। नाद्यः, अपरिच्छिन्ने जीवे घटादेः सर्वदा संयुक्तत्वेन सर्वदा भानप्रसङ्गात्। न द्वितीयः, अनङ्गीकाराद्। अङ्गीकारे च तस्य नित्यत्वेनोक्तदोषादित्याशङ्क्याह—स चेति। घटाद्याकारवृत्तिसमये तदुपहितजीवचैतन्यस्य व्यङ्ग्यत्वं तद्विषयस्य घटादेर्व्यञ्जकत्वमिति तादृशवृत्तिरेव तत्र कारणमित्यर्थः।

अ०-शंका—अविद्या उपाधि वाला अपरिच्छिन्न जीव स्वयं ही समस्त विषयों के साथ सम्बद्ध है, तो फिर विषयाकार वृत्ति विरह दशा में जीव का विषय के साथ सम्बन्धाभाव कहना असंगत है। असंगत्व दृष्टि से सम्बन्धाभाव कहने पर तो विषयाकार वृत्ति के बाद भी विषय के साथ जीव का सम्बन्ध नहीं ही होगा। समा०—विषयाकार वृत्ति विरह दशा में जीव का घटादि विषय के साथ सम्बन्ध सामान्य का हम निषेध नहीं करते हैं, किन्तु घटादि प्रतीति के योग्य सम्बन्ध विशेष का निषेध करते हैं। वह सम्बन्ध विषय तथा जीव चैतन्य का व्यङ्ग्य व्यञ्जक भाव रूप है और विषयाकार वृत्ति होने पर ही वह सम्बन्ध होता है, इसलिये कादाचित्क है।

सु०—होनेसे जीव का विषयोंके साथ सम्बन्ध ही नहीं है। इसीलिये सम्बन्धाभाव कह रहे हो। प्रथम पक्ष में व्यापक जीव का घटादि विषय के साथ सम्बन्ध के लिये किसी भी प्रयोजक की आवश्यकता नहीं है। विषयाकार वृत्ति हो या न

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तथा हि तैजसमन्तःकरणं स्वच्छद्रव्यत्वात् स्वत एव जीवचैतन्याभिव्यञ्जनसमर्थम्, घटादिकं तु न तथा, अस्वच्छद्रव्यत्वात्। स्वाकारवृत्तिसंयोगदशायां तु वृत्त्यभिभूतजाड्यधर्मकतया वृत्त्युत्पादितचैतन्याभिव्यञ्जनयोग्यताश्रयतया च वृत्त्युत्थानानन्तरं चैतन्यमभिव्यनक्ति।

ननु घटादेरस्वच्छस्य स्वाकारवृत्तिदशायामपि कथमभिव्यञ्जकत्वमित्यपेक्षायामाह—तथा हीति। न तथा—स्वतः जीवचैतन्याभिव्यञ्जनसमर्थं न भवति। कथं तर्हि तत्समर्थमित्यत्राह—स्वाकारेति। वृत्त्या अभिभूतस्तिरस्कृतो जाड्यधर्मो यस्य तत्तथा। वृत्त्या उत्पादिता या चैतन्याभिव्यञ्जनयोग्यता तदाश्रयतया चेत्यर्थः। अभिव्यनक्ति—घटादिकमिति कर्तृपदमनुषज्यते।

अ०—उसीको समझाते हैं, कि तैजस अन्तःकरण स्वच्छ द्रव्य होने से स्वतः ही जीव चैतन्य की अभिव्यक्ति में समर्थ है। पर अस्वच्छ द्रव्य होने से घटादि वैसा नहीं है। घटाकार वृत्ति का संयोग जब घटादिकों से होता है, तब वृत्ति से घटादि का जाड्यधर्म अभिभूत हो जाता है। अतः वृत्ति से उत्पन्न की गई चैतन्य की अभिव्यक्ति की योग्यता का आश्रय होने से वृत्ति उत्पन्न होने के बाद घटादि विषय भी चैतन्य को अभिव्यक्त कर देता है।

सु०—हो व्यापक जीव का सभी विषयों के साथ सम्बन्ध है ही। द्वितीय पक्ष में विषयाकार वृत्ति होने पर भी असङ्ग जीव का विषय के साथ सम्बन्ध नहीं ही होगा। अतः सम्बन्धार्था वृत्ति कहना असंगत प्रतीत होता है!

अविद्या उपाधि वाला व्यापक जीव का विषय के साथ सामान्य सम्बन्ध वृत्ति विरह दशा में भी है। उस सम्बन्ध का निषेध हम भी नहीं करते हैं। हम तो सम्बन्ध विशेष का निषेध करते हैं। जिस सम्बन्ध से घटादि का भान हो सके, ऐसा सम्बन्ध घटादि विषयाकार वृत्ति के अभाव दशा में नहीं है। वह सम्बन्ध नैयायिक अभिमत संयोग अथवा समवायादि रूप नहीं है, किन्तु व्यङ्ग्य व्यञ्जक भाव रूप है। घटादि विषयाकार वृत्ति के समय विषयाकार उपहित जीव चैतन्य में व्यङ्ग्यत्व और वृत्ति के विषय घटादि में व्यञ्जकत्व रहता है। इस प्रकार की वृत्ति द्वारा विषय का जीव के साथ सम्बन्ध होने पर विषय का भान होता है। व्यङ्ग्य व्यञ्जक भाव सम्बन्ध केवल विषयाकार वृत्ति दशा में रहता है, सदा नहीं। इसलिये इसे कादाचित्क भी कहते हैं।

अन्तःकरण में चैतन्य की अभिव्यक्ति सदा होती है, क्योंकि अन्तःकरण स्वच्छ द्रव्य है। स्वच्छ होने से ही अन्तःकरण जीव चैतन्य को अभिव्यक्त

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Vedic Studies. AAIS(USA)

तदुक्तं विवरणे–अन्तःकरणं हि स्वस्मिन्निव स्वसंसर्गिण्यपि घटादौ चैतन्याभिव्यक्तियोग्यतामापादयतीति। दृष्टं चास्वच्छद्रव्यस्यापि स्वच्छद्रव्यसंबन्धदशायां प्रतिबिम्बग्राहित्वम्। यथा कुड्यादेर्जलादि-संयोगदशायां मुखादिप्रतिबिम्बग्राहिता। घटादेरभिव्यञ्जकत्वं च तत्प्रतिबिम्बग्राहित्वम्, चैतन्याभिव्यक्तत्वं च तत्र प्रतिबिम्बितत्वम्।

तत्र सम्मतिमाह—तदुक्तमिति। नन्वस्वच्छद्रव्यस्य प्रतिबिम्बग्राहित्वं न दृष्टचरमित्याशङ्क्याह—दृष्टं चेति। ननु घटादेरस्वच्छद्रव्यस्य चैतन्याभिव्यञ्जकत्वदृष्टान्तस्य वक्तव्यत्वे प्रतिबिम्बग्राहिकुड्यादिनिदर्शनप्रदानमसङ्गतमित्याशङ्क्याह—घटादेरिति।

अ०—विवरण नामक ग्रन्थ में भी ऐसे ही कहा गया है, कि अन्त करण अपने के समान अपने से संसर्ग रखने वाले घटादि में भी चैतन्य की अभिव्यक्ति की योग्यता पैदा कर देता है। लोक में भी देखा गया है, कि मलिन द्रव्य में भी स्वच्छ द्रव्य के साथ सम्बन्ध होते ही प्रतिबिम्ब ग्राहकत्व आ जाता है। जिस प्रकार जलादि की संयोग दशा में दीवार आदि मलिन द्रव्य में भी मुखादि प्रतिबिम्ब ग्राहकता आ जाती है। घटादि में चैतन्य का अभिव्यञ्जकत्व उसके प्रतिबिम्ब को ग्रहण करना ही है। चैतन्य की अभिव्यक्ति का मतलब उसमें प्रतिबिम्बित हो जाना है।

सु०–करने में स्वतः ही समर्थ है। उसे जीव चैतन्य की अभिव्यक्तिके लिये किसी की सहायता नहीं लेनी पड़ती। अतः 'अहं' इस वृत्ति में जीव चैतन्य सदा भासता रहता है। वही जीव घटादि विषय प्रदेश में भी है, फिर भी घटादि प्रदेश में जीव चैतन्य भाग की सदा अभिव्यक्ति नहीं होती है, क्योंकि घटादि मलिन होने से स्वतः स्वप्रदेश वाले चैतन्य को अभिव्यक्त नहीं कर सकता। जब घटाकार वृत्ति होती है, उस समय घटादि में भी स्वावच्छिन्न चैतन्य जीव भागकी अभिव्यक्ति की योग्यता आ जाती है और घटाकार वृत्ति के बाद घटादि विषय भी स्वप्रदेश स्थित चैतन्य भाग को अभिव्यक्त करने लग जाता है। तात्पर्य यह कि चैतन्य व्यङ्ग्य तथा विषयादि व्यञ्जक तभी होते हैं जब विषयाकार वृत्ति होती है। इसी वृत्ति से जीव तथा विषय में व्यङ्ग्य व्यञ्जक भाव सम्बन्ध होता है अन्यथा नहीं। अतः ऐसे सम्बन्ध के लिये वृत्ति को मानना आवश्यक हो जाता है।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

एवंविधाभिव्यञ्जकत्वसिद्ध्यर्थमेव वृत्तेरपरोक्षस्थले बहिर्निर्गमनाङ्गीकारः। परोक्षस्थले तु वह्न्यादेर्वृत्तिसंसर्गाभावेन चैतन्यानभिव्यञ्जकतया न वह्न्यादेरपरोक्षत्वम्। एतन्मते च विषयाणामपरोक्षत्वं चैतन्याभिव्यञ्जकत्वमिति द्रष्टव्यम्। एवं जीवस्यापरिच्छिन्नत्वेऽपि वृत्तेः सम्बन्धार्थत्वं निरूपितम्। इदानीं परिच्छिन्नत्वपक्षे सम्बन्धार्थकत्वं निरूप्यते।

इदं च वृत्तिं विना न सिद्ध्यतीति तादृसम्बन्धप्रयोजकता तस्या इत्याह—एवमिति। ननु वृत्तेरेवंविधसम्बन्धार्थत्वाभ्युपगमे कथं घटादेरपरोक्षत्वम्? विषयस्य प्रमातृचैतन्याभिन्नत्वमपरोक्षत्वमित्युक्तत्वादित्याशङ्क्याह—एतन्मत इति। इदमुपसंहरन्मतान्तरे सम्बन्धार्थत्वोपपादनं प्रतिजानीते—एवमिति।

अ०—इस प्रकार के अभिव्यञ्जकत्व की सिद्धि के लिए प्रत्यक्ष स्थल में अन्तःकरण की वृत्ति को बाहर जाना स्वीकार किया है। परोक्ष स्थल में वह्न्यादि विषय के साथ वृत्ति का संयोग न होने के कारण वह्नि आदि विषय में चैतन्य की अभिव्यञ्जकता नहीं है। अतएव वहाँ पर वह्नि आदि का अपरोक्ष नहीं होता। इस मत में विषय के अपरोक्ष होने का अर्थ है—चैतन्य को अभिव्यक्त कर देना। ऐसा समझना चाहिए। अतः जीव को अपरिच्छिन्न होने पर भी सम्बन्धार्था वृत्ति का निरूपण किया गया है।

अभिव्यञ्जनार्था वृत्तिः

सु०—अब तक विषय में चैतन्य की अभिव्यक्ति की योग्यता तदाकार वृत्ति होने पर ही आती है—ऐसा कहा। इस विषय में विवरणाचार्य की सम्मति भी है। जैसे चैतन्य की अभिव्यक्ति की योग्यता अन्तःकरण में स्वभाव से है, वैसे ही अन्तःकरण के साथ घटादि का सम्बन्ध होने पर घटादि मलिन द्रव्य में भी चैतन्य की अभिव्यक्ति की योग्यता का आपादन अन्तःकरण कर देता है। लोक में भी देखा गया है जलादि में मुख का प्रतिबिम्ब पड़ता है दीवारादि में नहीं। किन्तु वही दीवार जलादि के संयोग से मुख के प्रतिबिम्ब को ग्रहण करने लग जाती है।

"घटादि विषय चैतन्य को अभिव्यक्त करता है इसका तात्पर्य यह है कि घटादि विषय, अन्तःकरण का संयोग होने पर चैतन्य के प्रतिबिम्ब को ग्रहण करता है।" एवं "घटाकार वृत्ति दशा में घट में चैतन्य अभिव्यक्त होने का अर्थ है कि घटादि विषय में चैतन्य प्रतिबिम्बित हो जाता है। अतः व्यङ्ग्य व्यञ्जक भाव की कल्पना अन्य प्रकार से पाठक न करें।"

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Institute of Vedic Studies. AAIS(USA)

तथा हि-अन्तःकरणोपाधिको जीवः। तस्य न घटाद्युपादानता, घटादिदेशासम्बन्धात्। किन्तु ब्रह्मैव घटाद्युपादानम्। तस्य मायोपहितस्य सकलघटाद्यन्वयित्वात्। अत एव ब्रह्मणः सर्वज्ञता। तथा च जीवस्य घटाद्यधिष्ठानब्रह्मचैतन्याभेदमन्तरेण घटाद्यवभासासम्भवे प्राप्ते, तदवभासाय घटाद्यधिष्ठानब्रह्मचैतन्याभेदसिद्ध्यर्थं घटाद्याकारा वृत्तिरिष्यते।

अन्तःकरणोपाधिकः—तत्प्रतिबिम्बस्तदवच्छिन्नो वा। तर्ह्यस्मिन्मते घटाद्युपादानं किमिति पृच्छति—किं त्विति। उत्तरमाह—ब्रह्मैवेति। ननु तस्य व्यापकत्वेऽपि केवलस्यासङ्गितया कथं घटादिदेशसम्बन्ध इत्याशङ्क्य केवलस्य तदसम्भवेऽपि मायोपाधिकस्य मायाद्वारकसम्भवादित्याह—तस्येति। मायोपहितस्य—तदवच्छिन्नस्य तत्प्रतिबिम्बस्य तद्बिम्बस्य वा। एतेन प्रकृते किमायातमित्यत आह—तथा चेति। अन्तःकरणोपाधिकचैतन्यस्य घटादिदेशानवस्थितस्य तदधिष्ठानचैतन्याभिन्नत्वाभावे।

अ०—अब परिच्छिन्न जीव पक्ष में सम्बन्धार्था वृत्ति का निरूपण किया जाता है—अन्तःकरण उपाधिवाले चैतन्य को जीव कहते हैं। वह घटादि विषय का उपादान कारण नहीं है, क्योंकि उसका घटादि देश के साथ सम्बन्ध ही नहीं है। किन्तु ब्रह्म ही घटादि विषय का उपादान कारण है, क्योंकि माया उपहित चैतन्य का सभी घटादि विषय के साथ सम्बन्ध है। इसीलिये ब्रह्म में सर्वज्ञता है। इस प्रकार घटादि के अधिष्ठान ब्रह्म चैतन्य के साथ जीव का अभेद हुए बिना घटादि का भान असम्भव है। अतः घटादि भान के लिए घटादि के अधिष्ठान ब्रह्म चैतन्य के साथ जीव को अभेद सिद्ध्यर्थ घटादि के आकार की वृत्ति मानना इष्ट है।

सु०—विषय के अपरोक्ष स्थल में अन्तःकरण की वृत्ति को बाहर जाना इसलिये स्वीकार किया है कि विषय स्वावच्छिन्न चैतन्य को अभिव्यक्त कर सके। परोक्ष स्थल में वह्न्यादि विषय के साथ अन्तःकरण की वृत्ति का सम्बन्ध न होने के कारण वह्नि आदि विषय स्वप्रदेश वाले जीव चैतन्य भाग को अभिव्यक्त नहीं कर पाते इसीलिये उन विषयों का प्रत्यक्ष भी नहीं होता। अतः स्वप्रदेशस्थ चैतन्य भाग की अभिव्यञ्जकता को ही विषयगत अपरोक्षता कहते हैं। इतने से यह बात स्पष्ट हो जाती है, कि अपरिच्छिन्न भी जीवचैतन्य वृत्ति के बिना विषय देश में अभिव्यक्त नहीं होता। अतएव जीव को उस

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

ननु वृत्त्यापि कथं प्रमातृचैतन्यविषयचैतन्ययोरभेदः सम्पाद्यते, घटान्तःकरणरूपोपाधिभेदेन तदवच्छिन्नचैतन्ययोरभेदासम्भवादिति चेत् ? न; वृत्तेर्बहिर्देशनिर्गमनाङ्गीकारेण वृत्त्यन्तःकरणविषयाणामेकदेशस्थत्वेन तदुपधेयभेदाभावस्योक्तत्वात्। एवमपरोक्षस्थले वृत्तेर्मतभेदेन विनियोग उपपादितः।

उक्तं विस्मृत्य शङ्कते—नन्विति। प्रोक्तं स्मारयति—वृत्तेरिति। वृत्तिविनियोगोपपादनमुपसंहरति—एवमिति।

अ०—वृत्ति से भी प्रमातृ चैतन्य तथा विषय चैतन्य का अभेद कैसे हो सकता है। घट तथा अन्तःकरण उपाधि के भेद होने से घटावच्छिन्न चैतन्य तथा वृत्त्यावच्छिन्न चैतन्य का अभेद होना असम्भव है। ऐसा कहना ठीक नहीं, क्योंकि अन्तःकरण की वृत्ति को बाहर जाना हमने स्वीकार कर लिया है। वृत्ति, अन्तःकरण तथा विषय इन तीनों के एक देश में स्थित हो जाने के कारण उनसे उपहित चैतन्य के भेद का अभाव कहा गया है। इस प्रकार अपरोक्ष स्थल में मतभेद से वृत्ति का विनियोग बतलाया गया है।

सु०—विषय का भान नहीं होता है, क्योंकि जीव को विषय का भान होने का अर्थ-विषय में विषय देशस्थ जीवचैतन्य का प्रतिबिम्ब पड़ जाना है। अतः सम्बन्धार्था वृत्ति मानी गयी है।

अविद्या प्रतिबिम्बित जीव चैतन्य के व्यापक होने पर भी विषय के साथ सम्बन्ध के लिये वृत्ति बतलायी गयी थी, अब अन्तःकरण उपाधि वाले परिच्छिन्न जीवपक्ष में भी विषय के साथ सम्बन्ध के लिए वृत्ति मानना आवश्यक है। कार्य कारण का सम्बन्ध स्वभाव से रहता है। ब्रह्म चैतन्य घटादि व्यावहारिक विषय का उपादान कारण है। अतः उसका कार्य जगत् के साथ सम्बन्ध सदा है इसीलिये वह सर्वज्ञ कहा जाता है। जीव का सम्बन्ध विषयों के साथ सदा नहींहै, क्योंकि घटादि विषय का उपादान कारण जीव नहीं है। अतः घटादि विषय के अधिष्ठान ब्रह्म चैतन्य के साथ अभेद के लिए घटाकार वृत्ति मानना आवश्यक हो जाता है। अभेद हुए बिना कभी भी जीव विषय का प्रकाश नहीं कर सकता, क्योंकि परिच्छिन्न जीव का विषय के साथ सम्बन्ध ही नहीं है। अतः घटादि विषय के ज्ञान के लिए उनके अधिष्ठान ब्रह्म चैतन्यके साथ जीवका अभेद सम्बन्ध कराने वाली विषयाकार वृत्ति ही है।

एक अखण्ड चैतन्य में उपाधि भेदक तभी तक होते हैं; जबतक

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सु०—वे भिन्न देशमें हैं। अन्तःकरण शरीरमें है,घटादि विषय बाहर हैं तो दोनों से उपहित चैतन्य में भी भेद हो रहा है। किन्तु जब नेत्र द्वारा अन्तःकरण की वृत्ति निकल कर विषय देश में विषयाकार बन जाती है। तो वृत्ति के आश्रय परिणामी अन्तःकरण को भी बाहर विषय देश में जाना स्वीकार करते हैं। अतः वृत्ति, वृत्ति का आश्रय-अन्तःकरण एवं उसके विषय घटादि, ये तीनों बाहर एक ही देश में स्थित हैं। ऐसी दशा में इन तीन उपाधियों से उपहित विषय चैतन्य, विषयाकार वृत्ति उपहित चैतन्य तथा प्रमातृ चैतन्य में भेद नहीं रह गया। ऐसा हम पहले भी कह आये हैं। अतः प्रमातृ चैतन्य तथा विषय चैतन्य के अभेद रूप सम्बन्ध के लिए विषयाकार वृत्ति इस पक्ष में मानी गयी है। वृत्ति के विषय में मतभेद होनेपर भी, विषय अपरोक्ष के लिए वृत्ति की आवश्यकता का उपपादन किया गया।

स्वप्नावस्था

स्वप्न में इन्द्रियों का व्यापार समाप्त हो जाता है और वे अपने-अपने कारण में लीन हो जाती हैं। अतः स्वप्न में विषय को जाननेवाली अपरोक्ष अन्तःकरण की वृत्ति तो है, किन्तु वह इन्द्रियों की सहायता के बिना ही होने के कारण इन्द्रिय जन्य नहीं है फिर भी स्वप्न दृश्य को विषय करने वाली अन्तःकरण की वृत्ति अपरोक्ष ही होती है। जिसमें विषय को अपरोक्ष रूप से जाननेवाली अन्तःकरण की वृत्ति तो है, किन्तु वह इन्द्रियजन्य नहीं है, तो ऐसी अवस्था को स्वप्नावस्था कहते हैं। जाग्रत् में विषय को जानने वाली अन्तःकरण की अपरोक्ष वृत्ति इन्द्रियों से जन्य होती है। अतः जाग्रत में स्वप्न के उक्त लक्षण की अतिव्याप्ति नहीं है। सुषुप्ति में 'मैं सुख से सोया और कुछ भी नहीं जाना, ऐसे सुख और अज्ञान को विषय करने वाली अविद्या की वृत्ति होती है, अन्तःकरण की नहीं। अतः सुषुप्ति में स्वप्न के लक्षण की अतिव्याप्ति नहीं है।

सुषुप्ति अवस्था

'न किञ्चिदवेदिषम्' इस अनुभव में अविद्या को विषय करने वाली अविद्या की ही वृत्ति है। ऐसी अवस्था को सुषुप्ति कहते हैं। जाग्रत् और स्वप्न में भी अविद्याकार वृत्ति होती है तभी तो 'मैं अमुक चीज को नहीं जानता' ऐसा जाग्रत् तथा स्वप्न का अज्ञान विषयक सार्वलौकिक अनुभव है। किन्तु अविद्या को विषय करने वाली वह वृत्ति अन्तःकरण की है, अविद्या की नहीं। अतः उसमें सुषुप्ति के लक्षण की अतिव्याप्ति नहीं है। यदि

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

इन्द्रियाजन्यविषयगोचरापरोक्षान्तःकरणवृत्त्यवस्थास्वप्नावस्था जाग्रदवस्थाव्यावृत्त्यर्थम् इन्द्रियाजन्येति। अविद्यावृत्तिमत्यां सुषुप्तौ अतिव्याप्तिवारणायान्तःकरणेति। सुषुप्तिर्नामाविद्यागोचराविद्यावृत्त्यवस्था। जाग्रत्स्वप्नयोरविद्याकारवृत्तेरन्तःकरणवृत्तित्वान्न तत्रातिव्याप्तिः। अत्र केचिन्मरणमूर्च्छयोरवस्थान्तरत्वमाहुः। अपरे तु सुषुप्तावेव तयोरन्तर्भावमाहुः। तत्र तयोरवस्थात्रयान्तर्भावबहिर्भावयोस्त्वं पदार्थनिरूपणे उपयोगाभावान्न तत्र प्रयत्यते।

अथ स्वप्नावस्थां लक्षयति—इन्द्रियेति। इन्द्रियाजन्या विषयगोचरा अन्तःकरणवृत्तिर्यस्मिन्समये सा तथाभूतवृत्त्यवस्था। सुषुप्तिं लक्षयति—सुषुप्तिरिति। अविद्या—अज्ञानं सा गोचरो विषयो यस्याः साक्षादविद्यावृत्तेस्तदवस्था। अविद्यापदं नित्यसुखस्याप्युपलक्षणम्। ननु मरणमूर्च्छयोरपि निरूपणीयत्वात्किमित्यवस्थात्रयमेव निरूपपितमित्याशङ्क्याह—अत्रेति। अवस्थानिरूपणप्रसङ्गे भवत्सम्मतं किमित्यपेक्षायामाह—तत्रेति। तयोर्मतयोरित्यर्थः।

अ०—इन्द्रियों से अजन्य जो विषय को जाननेवाली अपरोक्ष अन्तःकरण वृत्ति की अवस्था है उसे स्वप्नावस्था कहते हैं। इस लक्षण में जाग्रदवस्था की व्यावृत्ति के लिए इन्द्रियों से अजन्य कहा गया है। अविद्या वृत्ति वाली सुषुप्ति में अतिव्याप्ति वारणार्थ उक्त लक्षण में अन्तःकरण विशेषण दिया है।

अविद्या को विषय करने वाली अविद्या की वृत्ति वाली अवस्था को सुषुप्ति कहते हैं। जाग्रत् और स्वप्न में अविद्याकार अन्तःकरण की वृत्ति होने से सुषुप्ति के लक्षण की अतिव्याप्ति नहीं है। यहाँ पर कुछ लोग मरण और मूर्च्छा को इनसे पृथक् अवस्था मानते हैं और दूसरे सुषुप्ति में ही इन दोनों का अन्तर्भाव कर देते हैं। इन दोनों अवस्थाओं को सुषुप्त्यादि में अन्तर्भाव करना या नहीं, इन बातों का त्वं पदार्थ निरूपण में उपयोग न होने से तदर्थ प्रयत्न नहीं किया जा रहा है।

सु०—कहो मरण और मूर्च्छा भी सर्वलोकानुभव सिद्ध है। फिर उनका निरूपण न कर तीन ही अवस्था का निरूपण क्यों किया है?

ठीक है कुछ लोग इन दोनों को सुषुप्ति में अन्तर्भाव कर देते हैं और कुछ लोग पृथगवस्था मानते हैं। फिर भी त्वं पदार्थ के निरूपण में उनका कोई उपयोग तो है नहीं। अतः मरण एवं मूर्च्छा के प्रतिपादन के लिए प्रयत्न नहीं किया गया।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तस्य च मायोपाध्यपेक्षयैकत्वम्, अन्तःकरणोपाध्यपेक्षया च नानात्वं व्यवह्रियते। एतेन जीवस्याणुत्वं प्रत्युक्तम्। 'बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोपि दृष्टः' (श्वे० ५-८) इत्यादौ जीवस्य बुद्धिशब्दवाच्यान्तःकरणपरिमाणोपाधिकपरमाणुत्वश्रवणात्।

अवस्थात्रयवाञ्जीव इत्युक्तं तत्रावस्थास्वरूपमभिधाय तद्वान् जीव एक उत अनेक इत्यपेक्षायामाह तस्येति। तस्य—उक्तावस्थावतो जीवस्य। तथा च विभुर्मध्यमपरिमाणो वा जीव इत्यर्थः। एतेन—जीवस्य विभुत्वादिप्रदर्शनेन। अणुत्वं रामानुजाद्युक्तम्। ननु 'वालाग्रशतभागस्य शतधा कल्पितस्य च। जीवो भागः स विज्ञेयः स चानन्त्याय कल्प्यते' (श्वे० ५-९) इत्यादिश्रुतिविरोधःस्यादित्याशङ्क्य 'महतो महीयान्' (क० १-२-२०) इत्यादिश्रुत्या सर्वाङ्गीणसुखाद्युपलब्ध्या च शुद्धस्य दुर्लक्ष्यत्वाभिप्रायमेवाणुत्वम्, सोपाधिकस्य त्वन्तःकरणवृत्त्युपाधिकृतमित्यविरोध इत्याशयेनाह—बुद्धेरिति।

अ०—माया उपाधि की अपेक्षा से जीव में एकत्व और अन्तःकरण उपाधि की अपेक्षा से जीव में नानात्व व्यवहार होता है। जीव में विभुत्वादि प्रदर्शन से जीवाणुत्ववाद का खण्डन समझना चाहिए। इसी को—'बुद्धि के गुण तथा आत्मगुण के कारण से जीव आराग्र मात्र परिच्छिन्न देखा गया है।' इत्यादि श्रुति में जीव की बुद्धि शब्द वाच्य अन्तःकरण के परिणाम रूप उपाधि के कारण तत्परिमाणत्व का श्रवण हो रहा है।

सु०—जाग्रदादि अवस्थावाले को जीव कहा, वह माया उपाधि के एक होने से एक और अन्तःकरण रूप नाना उपाधि होने के कारण नाना माना जाता है। कुछ आचार्यों ने जीवाणुत्व प्रतिपादक श्रुति का तात्पर्य न समझने के कारण परमार्थतः जीव को अणु परिमाण मान लिया है। वह जीवाणुत्ववाद पूर्वोक्त ग्रन्थ से निरस्त हुआ समझना चाहिए, क्योंकि माया उपाधि के कारण से जीव में विभुत्व है एवं अन्तःकरण उपाधि के कारण मध्यमपरिमाणवत्व कहा गया है।

'बुद्धेर्गुणेन...' इत्यादि श्वेताश्वेतर श्रुति का तात्पर्य यह है, कि जीव अपने चैतन्य स्वरूप गुण के कारण अवर (सर्वश्रेष्ठ होता हुआ भी बुद्धि के गुणों से आराग्र मात्र देखा गया है। अवर का अर्थ छोटा नहीं है किन्तु वर (महान्) जिससे कोई दूसरा न हो, उसे अवर कहते हैं अर्थात् अपने स्वभाव से जीव सर्वश्रेष्ठ होता हुआ भी परिच्छिन्न बुद्धि के गुणों से आराग्र (आरा

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

स च जीवः स्वयंप्रकाशः। स्वप्नावस्थामधिकृत्य 'अत्रायं पुरुषः स्वयंज्योतिः' (बृ० ४-३-८) इति श्रुतेः। अनुभवरूपश्च 'प्रज्ञानघनः' (मा० ५) इत्यादिश्रुतेः। अनुभवामीति व्यवहारस्तु वृत्तिप्रतिबिम्बित-चैतन्यमादायोपपद्यते। एवं त्वंपदार्थो निरूपितः।

अधुना तत्त्वंपदार्थयोरैक्यं महावाक्यप्रतिपाद्यमभिधीयते।

नैयायिकादिमतनिरासायाह—स चेति। तत्रबृहदारण्यकश्रुतिं प्रमाणयति—स्वप्नावस्थामिति। अयं पुरुष इत्यनेन परमात्माऽभिहित इति भ्रमव्यवच्छेदार्थं मुक्तं स्वप्नेति। वृत्त्यादिवज्जडत्वमाशङ्क्याह—अनुभवरूपश्चेति। अत्रापि प्रमाणमाह—प्रज्ञानेति। विज्ञानमूर्तिरित्यर्थः। 'योऽयं विज्ञानघनः' इत्यादि-श्रुतिरादिपदादादेया। आत्मनः स्वप्रकाशत्वं ज्ञानरूपत्वं च साधितं विवरणे। ननु तस्यानुभवरूपत्वेऽनुभवामीत्यनुभवाश्रयत्वव्यपदेशानुपपत्तिरित्याशङ्क्याह—अनुभवामीति। त्वं पदार्थनिरूपणमुपसंहरन्नखण्डार्थप्रतिपादनं प्रतिजानीते—एवमिति। 'प्रज्ञानं ब्रह्म' 'अहं ब्रह्मास्मि' (बृ० १-४ १०) 'तत्त्वमसि' (छा० ६-८ ७) 'अयमात्मा ब्रह्म' (बृ० ४-४-५) इत्येवंरूपैर्ऋग्वेदादिमहावाक्यैः प्रतिपाद्यं—तात्पर्यविषयत्वेन बोधनीयम्।

अ० वह जीव स्वयं प्रकाश है, क्योंकि स्वप्नावस्था को उद्देश्य कर "स्वप्न में यह पुरुष स्वयं ज्योति है" इस श्रुति में स्वप्रकाशत्व बताया गया और वह जीव अनुभव रूप भी है, इस विषय में प्रज्ञानघनः' इत्यादि श्रुति प्रमाण है। 'मैं अनुभववाला हूँ' ऐसा व्यवहार तो वृत्ति में प्रतिबिम्बित चैतन्य को लेकर उपपन्न हो जाता है। इस रीतिसे त्वं पदार्थका निरूपण समाप्त हुआ।

अब महावाक्य के प्रतिपाद्य तत् त्वं पदार्थ की एकता को कहते है।

सु०—के अग्र भाग के बराबर) देखा गया है। इससे वस्तुतः आराग्रमात्रता उसमें नहीं है। परमार्थतः तो उसमें विभुत्व है, किन्तु बुद्धि उपाधि के कारण आराग्रमात्रत्व प्रतीत होता है।

'बालाग्रशतभागस्य शतधा कल्पितस्य च।
जीवो भागः स विज्ञेयः स चानन्त्याय कल्पते॥ श्वे० ५।६॥

इस श्रुति में जीव के परिमाण को विलक्षण ढंग से बतलाया गया है। श्रुति कहती है बाल के अग्रभाग को सीधे सौ टुकड़ों में चीरो ! उस शतांश भाग को पुनः सौ टुकड़ों में चीर डालो, पुनः उस शतांश भाग को भी सौ टुकड़ों में चीर डालो। इसतरह शतांश शतांश को सौ बार चीरनेपर जो सूक्ष्मा-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सु०—तिसूक्ष्म शेष रहे; ऐसी ही सूक्ष्मताकी कल्पना जीवके विषयमें की गयी है वह अन्त में अनन्त हो जाता है।" अतः उक्त श्रुति से जीवाणुत्व की कल्पना असङ्गत है। तद्विपरीत 'महतो महीयान्' श्रुति भी है। अतः उक्त श्रुति से एवं सर्वाङ्गीण सुखादि को उपलब्धि से विशुद्ध चैतन्य को दुर्लक्ष्य बताने में उनका तात्पर्य है, अणुत्व प्रतिपादन में नहीं। अतः श्रुतियों में कोई विरोध नहीं है; समझ में विरोध है। सोपाधिक जीव में अणुत्व का कथन अन्तःकरण वृत्तिरूप उपाधि के कारण से है, परमार्थतः नहीं है।

जीव की स्वप्रकाशतां

नैयायिकों ने आत्मा को स्वरूप से जड़ तथा ज्ञान गुण वाला माना है ज्ञान स्वरूप नहीं। उनकी यह मान्यता श्रुति विरुद्ध है, क्योंकि श्रुति में आत्मा को स्वयं प्रकाश कहा गया है। यहां पुरुष में स्वयं ज्योतिष्ट्व के कथन से न्यायशास्त्र की मान्यता निरस्त हो जाती है।

'अयं पुरुषः' पद से उक्त श्रुति में परमात्मा को कहा गया है, ऐसा नहीं कह सकते क्योंकि स्वप्न के अधिकार में उक्त वाक्य आया है। आत्मा को प्रज्ञान घन, विज्ञान घन इत्यादि बहुत सी श्रुतियों में स्वप्रकाशत्व का कथन स्पष्ट ही है। 'अनुभवामि' इस प्रतीति में आत्मा में अनुभव के आश्रयत्व व्यवहार तो वृत्ति में प्रतिबिम्बित चैतन्य को लेकर होता है। स्वरूप से आत्मा अनुभव रूप ही है। इस प्रकार त्वं पद के अर्थ जीव का स्वरूप सप्रमाण निरूपण किया गया।

ऋग्वेद में प्रज्ञानं ब्रह्म (ऐत ५.३।,) यजुर्वेद में 'अहं ब्रह्मास्मि' (बृ. १.४.१०) सामवेद में तत्वमसि (छा.६-८ ७) अथर्ववेद में अयमात्मा (मा. २) महावाक्य आये हैं। उनका तात्पर्य रूप से प्रतिपाद्य विषय तत् त्वं पदार्थ की एकता ही है। उसी तत् त्वं पदार्थ की एकता को बतलाते हैं क्योंकि पदार्थ ज्ञान के बाद वाक्यार्थ ज्ञान करना शेष रह जाता है। अन्य वाक्यों के समान महावाक्य पदार्थों का संसर्ग बोध नहीं कराता, क्योंकि संसर्ग बोधक मानने पर महावाक्य में महाविशेषण व्यर्थ हो जाता है, ऐसा पहले कहा गया है। ये महावाक्य तो तत् त्वं पदार्थों का अभेद बोधन कराते हैं। इसीलिये इन्हें महावाक्य कहा गया है।

जीव ब्रह्म की एकता में प्रमाणान्तर विरोध तथा परिहार

आपने महावाक्य के आधार पर जीव ब्रह्म की एकता का प्रतिपादन किया किन्तु यहाँ पर प्रत्यक्षादि अनेक प्रमाणों से जीव ब्रह्म का भेद स्पष्ट प्रतीत हो रहा है। ऐसी दशा में तत्त्वमस्यादि वाक्य को औपचारिक मानना पड़ेगा।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

ननु नाहमीश्वर इत्यादिप्रत्यक्षेण, किंचिज्ज्ञत्वसर्वज्ञत्वविरुद्धधर्माश्रयत्वादिलिङ्गेन, द्वासुपर्णेत्यादिश्रुत्या।

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥ (भ० १५-१६)

इत्यादिस्मृत्या चजीवपरभेदस्यावगतत्वेन तत्त्वमस्यादिवाक्यमादित्यो यूपः, यजमानः प्रस्तर इत्यादिवाक्यवद् उपचरितार्थमेवेति चेत्?

तत्प्रतिपादनार्थमादौ शङ्कामुद्भावयति—नन्विति। आदिपदेन दुःख्यहं संसार्यहमित्यादिप्रत्यक्षं ग्राह्यम्। तत्त्वंपदार्थौ परस्परभिन्नौ विरुद्धधर्माश्रयत्वाद्विरुद्धस्वभावत्वाच्च, तेजस्तिमिरवत्। 'द्वासुपर्णा सयुजा सखाया समान वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' (मु० ३-१) 'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे। छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेता' 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः' (भ० गी० १५-१७)। सत्यभेदं विनाऽनुपपद्यमानमुपलभ्यमानं जीवस्य संसारित्वं श्रूयमाणं चेश्वरस्यासंसारित्वम् सत्यं भेदं कल्पयति। यदि जीवस्य परमात्मनाऽभेदः स्यात् तद्युपलभ्येत नोपलभ्यतेऽतो नास्तीति निश्चीयते इति प्रत्यक्षादिप्रमाणैर्जीवेश्वरभेदस्यावगतत्वात्तत्वमस्यादिवाक्यमुपचरितार्थं गौणार्थमेव, 'आदित्यो यूपः' 'यजमानः प्रस्तर' इत्यादिवाक्यवत्। यथाऽनादित्ये यूपे आदित्यत्वस्य, अयजमानभूतायां मुष्टौ च यजमानत्वस्योपचारस्तद्वदित्यर्थः। व्यावहारिकभेदावेदकप्रत्यक्षादिप्रमाणैस्तात्विकाभेदावेदकश्रुतिविरोधायोगान्नैवमित्याह—नेति। स्याद्विरोधस्तथाऽपि श्रुत्या प्रत्यक्षादेर्बाध इत्याशये-

---

अ०—शंका—"मैं ईश्वर नहीं हूँ' इत्यादि प्रत्यक्ष से किंचिज्ज्ञत्व, सर्वज्ञत्व रूप विरुद्ध धर्मों के आश्रयत्व आदि लिङ्ग से "द्वा सुपर्णा···" इत्यादि श्रुति से और "लोक में क्षर-अक्षर ऐसे दो पुरुष कहे गये हैं उनमें सभी भूतक्षर हैं और कूटस्थ को अक्षर कहा जाता है।" इत्यादि स्मृति से जीव और परमेश्वर में भेद अवगत हो रहा है ऐसी स्थिति में "यूप आदित्य है" 'प्रस्तर यजमान है' इत्यादि वाक्य की भांति तत्त्वमस्यादि वाक्य को भी औपचारिक अर्थ वाला ही मानना उचित होगा?

सु०—सर्वप्रथम ज्येष्ठ प्रमाण प्रत्यक्ष से ही उक्त वाक्य जन्य ब्रह्मात्मैक्य बोध का विरोध हो रहा है। प्रत्यक्ष से "मैं ईश्वर नहीं हूँ किन्तु संसारी कर्ता भोक्ता जीव हूँ।" ऐसा ईश्वर तथा जीव में स्पष्ट भेद दीख रहा है, जीवात्मा तथा

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सु०—परमात्मा परस्पर भिन्न हैं, क्योंकि एक में किंचिज्ज्ञत्व तथा दूसरे में सर्वज्ञत्वरूप विरुद्ध धर्माश्रयत्व है, एवं स्वभाव भी विरुद्ध है। जैसे प्रकाश तथा अन्धकार का स्वभाव विरुद्ध है। इस अनुमान से भी तत्त्वंपदार्थ ब्रह्म तथा आत्मा में परस्पर भेद सिद्ध हो रहा है—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति॥ (मुण्डक ३-१)

इस श्रुति में तथा 'द्वाविमौ पुरुषो लोके' इस गीता स्मृति में भी जीव, परमेश्वर में भेद बतलाया गया है। उक्त भेद के बिना श्रुति वाक्यादि अनुपपन्न होकर जीव में संसारित्व तथा ईश्वर में असंसारित्व रूप से सत्य भेद की कल्पना करायेगी। इस अर्थापत्ति प्रमाण से भी जीवात्मा परमात्मा में भेद सिद्ध होता है। यदि जीव का परमेश्वर से अभेद होता, तो जीव की भांति परमेश्वर भी दीखता। परमेश्वर का निश्चय नहीं हो पाता है। अतः जीव से परमात्मा भिन्न है। इस अनुपलब्धि प्रमाण से भी जीवात्मा परमात्मा में भेद ही निश्चित हो रहा है। अतः उक्त सभी प्रमाणों से भेद अवगत होने के कारण 'आदित्यो यूपः यजमानः प्रस्तरः' इत्यादि वाक्य की भांति तत्त्वमस्यादि वाक्य को गौणार्थक मानना चाहिये। यूप यज्ञ मण्डप में रहने वाले एक स्तम्भ विशेष का नाम है। वह आदित्य नहीं है, फिर भी शास्त्र कहता है। अतः जैसे उस वाक्य को गौणार्थक मान लिया जाता है, एवं दर्भ मुष्टि में यजमानत्व भी औपचारिक ही है। ठीक वैसे ही जीव तथा ईश्वर में अभेद बतलाने वाले महावाक्य को भी औपचारिक मानना चाहिये?

तात्त्विक अभेद बतलाने वाली श्रुति के साथ व्यावहारिक भेद ग्राहक प्रत्यक्षादि प्रमाणों का विरोध कहना असंगत है। क्योंकि वेद को असम्भावित दोष और प्रत्यक्ष को सम्भावित दोष वाला मानते हैं। इसलिये वेद जन्य ब्रह्मात्मैक्य ज्ञान से भेद प्रत्यक्ष का बाध मानना उचित ही है। यदि कहो कि प्रत्यक्ष प्रमाण ज्येष्ठ है और आगम कनिष्ठ है, इसलिये ज्येष्ठ प्रत्यक्ष प्रमाण से कनिष्ठ आगम प्रमाण का हीं बाध मानना चाहिए? तो ऐसा कहना ठीक नहीं। 'इदं रजतम्' यह ज्ञान पहले तथा नेदं रजतम् शुक्तिरियं ये ज्ञान पीछे होते हैं। रजत ज्ञान ज्येष्ठ है और रजत निषेध एवं शुक्ति ज्ञान कनिष्ठ हैं। फिर भी शुक्ति ज्ञान से रजतज्ञान का हीं बाध देखा गया है। ठीक ऐसे ही पूर्वभावी प्रत्यक्ष भेद ग्रह का भी पश्चाद्भावी आगम जन्य अभेद ज्ञान से बाध हो जायगा। अन्यथा चन्द्र में प्रादेश मात्र ग्रहण करने वाले प्रत्यक्ष से चन्द्रगत अधिक परिमाण ग्राहक ज्योतिष शास्त्र का ही बाध होने लगेगा।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

न; भेदप्रत्यक्षस्य सम्भावितकरणदोषस्यासम्भावितदोषवेदजन्य-ज्ञानेन बाध्यमानत्वात्। अन्यथा चन्द्रगताधिकपरिमाणग्राहिज्योतिः-शास्त्रस्य चन्द्रप्रादेशग्राहिप्रत्यक्षेण बाधापत्तेः। पाकरक्ते घटे रक्तोऽयं न तु श्याम इति वत्सविशेषणे होति न्यायेन जीवपरभेदग्राहिप्रत्यक्षस्य विशेषणीभूतधर्मभेदविषयत्वाच्च।

नादौ प्रत्यक्षस्य बाध्यत्वयोग्यतामाह—भेदेति। सम्भावितः करणानामिन्द्रियाणामपाटवत्वादयो दोषा यस्मिन् तत्तथा तस्येत्यर्थः। ननु ज्येष्ठेन प्रत्यक्षेणैव तद्बाध उचित इत्याशङ्क्य ज्येष्ठत्वं हि बाध्यत्वे हेतुर्न तु बाधकतायां, कनीयसा शुक्तिज्ञानेन ज्येष्ठस्य रजतज्ञानस्य बाधदर्शनात्, अन्यथा तदुत्पत्त्यसम्भवाच्चन्द्रादिपरिमाणग्राहिशास्त्रबाधापत्तेश्चेत्याशयेनाह—अन्यथेति। न चोपजीव्य-विरोधः, धर्मभेदबोधकप्रत्यक्षस्य धर्म्यभेदज्ञानं प्रत्यनुपजीव्यत्वादित्याशयेनाह—पाकेति। तथा चैवंभूतज्ञाने सत्यपि धर्म्यभेदमादाय सोऽयं घट इति ज्ञानं यथाऽविरुद्धं तद्वन्नाहमीश्वर इति ज्ञानानन्तरमहं ब्रह्मेतिज्ञानमित्यर्थः।

अ०—समा०—ऐसा न कहें—क्योंकि असम्भावित दोष वाले वेद वाक्य जन्य ज्ञान से, सम्भावित-करण दोष वाले प्रत्यक्षादि का बाध हो जाता है। अन्यथा चन्द्रमा में अधिक परिमाण बतलाने वाले ज्योतिष शास्त्र का, चन्द्र में प्रादेशिकत्व ग्राहक प्रत्यक्ष से बाध होने लग जायगा। पकने से रक्त हुए घट में 'वह घड़ा लाल है' श्याम नहीं। जैसे यहां पर विशेषण रक्त रूप का ही निषेध होता है, विशेष्य घड़े का नहीं, वैसे ही 'सविशेषणे हि विधिनिषेधौ-विशेषणमुपसंक्रामतः सति विशेष्यबाधे' (विशिष्ट में विधि निषेध हो रहे हों, उनका विशेष्य अंश में बाध हो तो, विशेषण अंश में समझना चाहिये)। इस न्यायसे जीव तथा परमेश्वरमें भेद ग्राहक प्रत्यक्ष जीव, परमेश्वरके विशेष-णीभूत उपाधि के धर्म गत भेद को ही विषय करता है, धर्मीगत भेद को नहीं।

सु०—यदि कहो कि प्रत्यक्ष उपजीव्य है और आगम उपजीवक है। आगम से प्रत्यक्ष का बाध मानने पर उपजीव्य विरोध होने लगेगा? तो ऐसा कहना भी ठीक नहीं, क्योंकि धर्मी के अभेद ज्ञान के प्रति प्रत्यक्ष में उपजीव्यत्व नहीं है। वह तो केवल धर्ममें भेद बतला रहा है। अभेद ज्ञानकी उत्पत्तिमें कथंचित् शब्द तथा श्रोत्र में उपजीव्यत्व मानें भी, फिर भी आगम प्रमाण जन्य जीव, ब्रह्म का अभेद ज्ञान, अपने विषय जीव, ब्रह्म की एकता के प्रकाशन में प्रत्यक्ष की

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy Of Indic Studies. AAIS(USA)

सु०—आवश्यकता नहीं रखता। अतः उत्पत्ति अंश में प्रत्यक्ष उपजीव्यत्व होने पर भी स्वविषय प्रकाशन में आगम प्रमाण में प्रत्यक्ष उपजीव्यत्व नहीं है। इसलिए प्रत्यक्ष जीव, परमेश्वर के विशेषण (अन्तःकरणादि) के ही भेद को विषय करता है। विशेष्य चैतन्य अंश के भेद को बतलाने में प्रत्यक्ष समर्थ नहीं है। उस अंश में आगम जन्य ज्ञान से प्रत्यक्ष बाधित माना जाता है। जैसे पकने से रक्त हुए घड़े में श्यामत्व का निषेध घट के विशेषण (रूप) मात्र में ही है; विशेष्य (घट) में नहीं। एवं विशेषणगत 'यह घड़ा लाल है श्याम नहीं' इस प्रतीति को मान लेने पर धर्मी अंश के अभेद को लेकर 'सोऽयं घटः' ऐसी प्रत्यभिज्ञा भी हो जाती है, वैसे ही "मैं ईश्वर नहीं हूँ" यह भेद प्रत्यक्ष ईश्वर तथा जीव के उपाधि रूप विशेषण के भेद को विषय करता है और 'अहं ब्रह्मास्मि' यह ज्ञान दोनों में विशेष्य चैतन्य की एकता को बताता है। अतः प्रत्यक्ष तथा आगम में विरोध नहीं है।

जब सर्व प्रमाण का उपजीव्य ज्येष्ठ (प्रत्यक्ष) का ही बाध हो जाने से भेद के विषय में तद्गत प्रामाण्य न रहा, तो जीव, परमेश्वर में पूर्वोक्त भेद का साधक अनुमान में प्रामाण्य कैसे रह सकेगा ! क्योंकि तत्त्वमस्यादि (अभेद प्रतिपादक) आगम प्रमाण से भेद साधक अनुमान का बाध हो जाता है। जैसे सस्नेह नरशिर रूप अस्थि, पवित्र है, अस्थि होने के कारण, शङ्ख के समान। इस अनुमान से कापालिकों ने मनुष्यों की खोपड़ी रूप हड्डियों में शुचित्व सिद्ध करना चाहा था। उनका उक्त अनुमान, 'स्पृष्ट्वा नरास्थि सस्नेहं सवासा जलमाविशेत्' (मनुष्य की स्निग्ध खोपड़ी का स्पर्श कर सचैल स्नान करे।) इस आगम से बाधित हो जाता है। 'यथा वा मेरुः पाषाणमयः पर्वतत्वात् विन्ध्यवत्' (सुमेरु पर्वत पत्थर का है, क्योंकि उसमें पर्वतत्व है विन्ध्य के समान) सुमेरु में पाषाणमयत्व का अनुमान 'सौवर्णः कुलगिरिराजो मेरुः' इस आगम से बाधित हो जाता है। वैसे ही जीव तथा ईश्वर में भेद साधक अनुमान का भी अभेद बोधक आगम से बाध हो जायगा।

आपने 'द्वा सुपर्णा सयुजा ..." इत्यादि वाक्य से जीव, ईश्वर में भेद सिद्ध करना चाहा था, किन्तु किसी एक वाक्य से ग्रन्थ का तात्पर्य नहीं समझा जा सकता। ग्रन्थ के तात्पर्य निर्णयार्थ—छः लिङ्ग माने गये हैं।

उपक्रमोपसंहारवभ्यासोऽपूर्वताफलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥

१. उपक्रमोपसंहार २. अभ्यास ३. अपूर्वता।
४. फल ५. अर्थवाद ६- उपपत्ति।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अत एव नानुमानमपि प्रमाणम्, आगमबाधात्, मेरुपाषाणमयत्वानुमानवत्। नाप्यागमान्तरविरोधः। तत्परातत्परवाक्ययोः तत्परवाक्यस्य बलवत्त्वेन लोकसिद्धभेदानुवादिद्वासुपर्णादिवाक्यापेक्षया उपक्रमोपसंहाराद्यवगताद्वैततात्पर्यविशिष्टस्य तत्त्वमस्यादिवाक्यस्य प्रबलत्वात्।

यतः सर्वप्रमाणोपजीव्यस्य ज्येष्ठस्य प्रत्यक्षस्य बाध्यत्वाद्भेदेऽप्रमाणता अत एवानुमानस्यापीत्याह—अत एवेति। आगमेन तत्त्वमस्यादिना बाधात्। मेरुः पाषाणमयः पर्वतत्वाद्विन्ध्यादिवदित्याद्यनुमानं यथा सर्वतः सौवर्णः कुलगिरिराजो मेरुरित्याद्यागमेन बाधितं तद्वदित्यर्थः। आगमविरोधोऽपि नास्तीत्याह—नापीति। भेदस्य प्रत्यक्षादिप्रमाणैर्ज्ञातत्वाच्छास्त्रस्य वाऽज्ञातज्ञापकत्वाद्भेदवाद्यागमस्य तत्र तात्पर्याभावेनातत्परत्वात्तत्पराभेदवाद्यगमाद्दौर्बल्यादित्याह—तत्परेति।

अ०—इसीलिये जीव, ईश्वर में भेद साधकानुमान भी प्रमाण नहीं माना जा सकता, क्योंकि अभेद बोधक आगम से भेदानुमान का बाध हो जाता है। जिस प्रकार सुमेरु में पाषाणमयत्व अनुमान 'सौवर्णः कुलगिरिराजो मेरुः' (सुमेरु पर्वतराज सोने का है) इस आगम से बाधित हो जाता है।

अन्य आगमों के साथ भी जीवब्रह्मैक्य प्रतिपादक आगम का विरोध नहीं है, क्योंकि तत्परक और अतत्परक वाक्यों में तत्परक वाक्य बलवान् होने से लोक सिद्ध भेद का अनुवादक "द्वा सुपर्णा" इत्यादि वाक्य की अपेक्षा उपक्रम उपसंहारादि से अवगत अद्वैत तात्पर्य विशिष्ट तत्त्वमसि इत्यादि वाक्य में प्रबलत्व माना गया है।

सु०—इन लिङ्गों से श्रुति का तात्पर्य अद्वैत प्रतिपादन में है। अतः लोकसिद्ध जीव, ब्रह्म के भेद की अनुवादिका "द्वा सुपर्णा" श्रुति की अपेक्षा पूर्वोक्त छः लिङ्गों से विशिष्ट अभेद बोधक तत्त्वमसि इत्यादि महावाक्य को प्रबल माना गया है, क्योंकि भेदानुवादी श्रुति का स्वार्थ में तात्पर्य नहीं है, अपितु महावाक्य के तत् तथा त्वं पदार्थ बोधन में तात्पर्य है। अतः आगम विरोध नहीं है।

जीव में संसारित्व ईश्वर में असंसारित्व रूप विरुद्धधर्म के आश्रयत्व की अन्यथा अनुपपत्ति से सत्य भेद की कल्पना की शङ्का की गयी थी, वह ठीक नहीं है, क्योंकि यथा जलादि में परमार्थतः शीतलता है। अतः अग्निसंयोग से औपाधिक उष्णता मानने में कोई विरोध नहीं है। वैसे ही स्वभावतः जीव निर्गुण अकर्ता, अभोक्ता है। उसमें अन्तःकरण उपाधि के कारण कर्तृत्वादि

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

न च जीवपरैक्ये विरुद्धधर्माश्रयत्वानुपपत्तिः। शीतस्यैव जलस्यौपाधिकौष्ण्याश्रयत्ववत् स्वभावतो निर्गुणस्यैव जीवस्यान्तःकरणाद्युपाधिककर्तृत्वाद्याश्रयत्वप्रतिभासोपपत्तेः। यदि च जलादौ औष्ण्यमारोपितं, तदा प्रकृतेऽपि तुल्यम्। न च सिद्धान्ते कर्तृत्वस्य क्वचिदप्यभावादारोप्यप्रमाहितसंस्काराभावे कथमारोप इति वाच्यम्। लाघवेनारोप्यविषयसंस्कारत्वेनैव तस्य हेतुत्वात्।

न चार्थापत्तिविरोध इत्याह—न चेति। औपाधिकविरुद्धधर्माश्रयत्वेनान्यथासिद्धत्वादित्याह—शीतस्यैवेति। नन्वग्निधर्मस्यौष्ण्यस्य जलादावारोपात्प्रीतिरत्र कस्य धर्मस्येत्याशङ्क्याह—यदीति। अन्तःकरणधर्मस्य कर्तृत्वादेर्भानसम्भवात्प्रकृतेऽप्येतत्तुल्यमित्यर्थः। नन्वात्मतादात्म्यापन्नस्यैवान्तःकरणस्यापि कर्तृत्वादिधर्मकत्वात् तद्व्यतिरिक्तेऽनात्मनि क्वापि कर्तृत्वादेरप्रमितत्वात्कथमारोप इत्याशङ्क्य परिहरति—न चेति। यथा सूर्यादिकिरणसम्पर्कात्प्रतीयमानमपि जलादिकं घटादिनिष्ठं न तु सूर्यादिनिष्ठं, तथाऽऽत्मसम्बन्धात्प्रतीयमानमपि कर्तृत्वादिकमन्तःकरणनिष्ठमेव, न त्वात्मनिष्ठम्। तस्य कूटस्थत्वात्। ततः पृथक् क्वाप्यप्रमितस्य कर्तृत्वादेरात्मन्यारोपे नास्ति बाधकम्। तत्रारोप्यगोचरसंस्कारमात्रस्यैवहेतुत्वादित्याह—लाघवेनेति।

अ०—जीव और परमात्मा के ऐक्य मानने में विरुद्धधर्माश्रयत्व की अनुपपत्ति रूप अर्थापति प्रमाण से भी विरोध नहीं है। शीतल जल में औपाधिक उष्णता आश्रयत्व के समान ही स्वभाव से निर्गुण जीव में ही अन्तःकरणादि उपाधि के कारण कर्तृत्वादि का आश्रयत्व प्रतीत हो रहा है। यदि जलादि में उष्णता आरोपित है, तो प्रकृत में निर्गुण जीव में कर्तृत्वादि आश्रयत्व भी आरोपित है।

सिद्धान्त में कहीं भी कर्तृत्वादि नहीं है, फिर आरोप्य वस्तु के प्रमा जन्य संस्कार का अभाव होने के कारण आत्मा में कर्तृत्व का आरोप भी कैसे होगा? ऐसा कहना ठीक नहीं। आरोप्य विषयक संस्कार को हीं आरोप के हेतु मानने में लाघव है।

सु०—भासता है। अतः विरुद्ध धर्मके आधारत्व की उपपत्ति हो जानेसे अर्थापत्ति प्रमाण भी ब्रह्मात्मैक्य प्रतिपादक आगमका विरोधी नहीं कहा जा सकता। यदि अग्नि का औष्ण्य धर्म जल में आरोपित है, तो अन्तःकरण का कर्तृत्वादि धर्म भी जीव में आरोपित है। उभयत्र कल्पना समान है।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

न च प्राथमिकारोपे का गतिः, कर्तृत्वाद्यध्यासप्रवाहस्यानादित्वात्। तत्त्वंपदवाच्ययोर्विशिष्टयोरैक्यायोगेऽपि लक्ष्यस्वरूपयोरैक्यमुपपादितमेव।

नन्वस्त्वस्मिन्कर्तृत्वारोपे पूर्वप्रतीतकर्तृत्वादिसंस्कारो हेतुस्तत्रापि तथाभूतस्तत्रापि तथाभूतः, तथाऽपि प्राथमिकारोपो दुर्घट इत्याशङ्क्य परिहरति—न चेति। प्राथमिकारोपे काऽपि गतिर्नास्तीति न चेत्यर्थः। कर्तृत्वाद्यध्यासप्रवाहस्यानादित्वेन कस्याप्यारोपस्य प्राथम्यासिद्धया तत्र पृथग्गतेरवक्तव्यत्वादित्याह – कर्तृत्वेति। नन्वस्त्वेवं तथाऽपि कथं विरुद्धधर्माक्रान्तयोर्जीवेश्वरयोरैक्यमित्याशङ्क्याह—तत्त्वमिति। यतो लक्ष्यस्वरूपैक्यम् अत एव सोऽयं देवदत्तः प्रकृष्टप्रकाशश्चन्द्र इत्यादिवाक्यवत् 'तत्त्वमसि' 'सत्यं ज्ञानमनन्तम्' (तै० २-१-१) इत्यादिवाक्यानामखण्डार्थत्वमिति। न चास्त्यनुपलब्धिविरोधस्तमसाऽऽवृतस्य

अ०–अध्यास में पूर्वपूर्व संस्कार को कारण मानने पर सर्वप्रथम अध्यास की क्यागति होगी ?–ऐसा कहना ठीक नहीं, क्योंकि कर्तृत्वादि अध्यास का प्रवाह अनादि काल से आ रहा है। तत्, त्वं पद के वाच्यार्थ विशिष्ट चैतन्य की एकता न होने पर भी दोनों के लक्ष्य स्वरूप की एकता का उपपादन तो हम कर ही आए हैं।

सु०— रज्जु में सर्प की कल्पना तभी होती है, जब सच्चे सर्प का अनुभव जन्य संस्कार मन में हो। पर वेदान्त सिद्धान्त में आत्मा में जिस प्रकार पारमार्थिक कर्तृत्व नहीं है, वैसे ही आत्मा से भिन्न कहीं भी कर्तृत्व आप मानते नहीं। ऐसी दशा में कर्तृत्व का आरोप आत्मा में कैसे हो सकेगा ?—ऐसा न कहो, क्योंकि आरोप्य वस्तु का संस्कार प्रमा जन्य हो, अप्रमा जन्य या उभय साधारण हो, इसमें कोई आग्रह नहीं है। आरोप्य वस्तु का अनुभवजन्य संस्कार मात्र को कल्पना में कारण मानने में लाघव है एवं प्रमाज्ञान जन्य संस्कार को कल्पना का हेतु मानने में गौरव है। अतः आत्मा में अन्तःकरणादि के सम्बन्ध से कर्तृत्व प्रतीत होता है, वह अन्तःकरण का ही धर्म है, आत्मा का नहीं, क्योंकि आत्मा निर्विकार कूटस्थ रूप है। रज्जुसर्प भ्रान्ति में भी सर्प के अनुभव जन्य संस्कार मात्र को ही कारण मानना उचित है. सच्चे सर्प के अनुभव जन्य संस्कार को नहीं। अतः ऐन्द्रजालिक से दिखाये गये सर्प के अनुभव जन्य संस्कार से भी रस्सी में सर्प का भ्रम हो जाता है। सच्चे सर्प के अनुभव जन्य संस्कार को सर्पभ्रान्ति में कारण मानने की कोई आवश्यकता नहीं है।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अत एव तत्प्रतिपादकतत्त्वमस्यादिवाक्यानामखंडार्थत्वम्, सोऽयमित्यादिवाक्यवत्। न च कार्यपराणामेव प्रामाण्यम्? चैत्र! पुत्रस्ते जात इत्यादौ सिद्धेऽपि सङ्गतिग्रहात्। एवं सर्वप्रमाणाविरुद्धं श्रुति स्मृतीतिहासपुराणप्रतिपाद्यं जीवपरैक्यं वेदान्तशास्त्रस्यविषयइतिसिद्धम्।

इति श्रीवेदान्तपरिभाषायां विषयपरिच्छेदः॥ ७॥

घटस्यानुपलब्धेस्तदभावानिश्चायकत्ववदज्ञानवतोऽभेदस्यानुपलम्भस्य तदभावानिर्णायकत्वादित्यपि द्रष्टव्यम्। ननु सिद्धे प्रयोजकप्रवृत्त्यादेरभावात्सङ्गतिग्रहायोगात् क्रियाऽन्वितस्वार्थपराणामेव प्रामाण्यान्न सिद्धं ब्रह्म वेदान्तप्रमेयमिति प्राभाकरमतमाशङ्क्य परिहरति—न चेति। पुत्रपदाङ्कितवसनं चैत्रपुरतो निधाय हे चैत्र! पुत्रस्ते जात इत्युक्ते विकसितवदनकमलं चैत्रमवलोक्यास्य पुत्रपदस्य सुतरूपेऽर्थे सङ्गतिं तटस्थो गृह्णातीति पुत्रस्ते जातः कन्या ते गर्भिणी इत्यादौ सङ्गतिग्रहादित्यर्थः। उपसंहरति—एवमिति। उक्तप्रकारेण। सर्वैः प्रत्यक्षादिप्रमाणैरविरुद्धम्। 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' (ई० ७) इत्यादिश्रुतिभिः, 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत' (भ० गी० १३-२) इत्यादिस्मृतिभिः, 'सर्वभूतान्तरस्थाय नित्यशुद्धचिदात्मने। प्रत्यक्चैतन्यरूपाय मह्यमेव नमोनमः॥' इत्यादीतिहासैः, 'विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति॥' इत्यादिपुराणैश्च तात्पर्यतया प्रतिपाद्यम्।

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिसूरिसुतशिवदत्तकृतायां वेदान्तपरिभाषार्थदीपिकायां विषयपरिच्छेदः समाप्तः॥ ७॥

अ०—अतएव जीव ब्रह्मैक्य प्रतिपादक तत्त्वमस्यादि महावाक्य में "सोऽयम् देवदत्तः" इत्यादि वाक्य के समान अखण्डार्थ बोधकत्व है। यदि कहो कि कार्य परक वाक्य में ही प्रामाण्य है? तो ऐसा कहनाठीक नहीं—हे चैत्र! तुम्हें पुत्र हुआ है, इत्यादि सिद्ध वाक्य में भी शक्तिग्रह होता हुआ देखा गया है। इस प्रकार श्रुति स्मृति पुराण तथा इतिहास के प्रतिपाद्य जीव ब्रह्म की एकता सभी प्रमाणों से अविरुद्ध वेदान्त शास्त्र का विषय है यह सिद्ध हुआ।

कर्तृत्वादि अध्यास अनादि है।

सु०—मान लेते हैं, कि आज आत्मा में कर्तृत्व के आरोप का हेतु इससे पूर्व

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सु०—कर्तृत्व के अनुभव जन्य संस्कार है, किन्तु सर्व प्रथम कर्तृत्वारोप का प्रतिपादन कैसे कर सकोगे ? ऐसा कहना ठीक नहीं—क्योंकि संसार के अनादि होने से कर्तृत्वादि अध्यास की परम्परा भी अनादि है। अनादि मान लेने पर प्रथम आरोप का प्रश्न ही नहीं उठता। सभी दार्शनिकों ने संसार को अनादि माना है। एवं अनुपलब्धि प्रमाण से भी विरोध नहीं कह सकते, क्योंकि अन्धकार से आवृत घट की अनुपलब्धि होने पर भी उसके अभाव का निश्चय नहीं हो पाता, वैसे ही तत्त्वज्ञान शून्य व्यक्ति को जीवात्मा परमात्मा के अभेद का अनुभव न होने पर भी उस अभेद के अभाव का निश्चय नहीं किया जा सकता। इस प्रकार पूर्वपक्षी से कहे गये सर्व प्रमाण विरोध का परिहार कर देने पर महावाक्य से जीव ब्रह्म की एकता का निश्चय हो जाता है।

यदि कथञ्चित तत् पद के वाच्य अर्थ सर्वज्ञत्वादि, विशिष्ट चैतन्य तथा त्वं पद के वाच्यार्थ अल्पज्ञत्वादि विशिष्ट चैतन्य में अभेद न भी हो सके, तो कोई बात नहीं है। दोनों के वाच्यार्थ में औपाधिक धर्म का परित्याग कर भाग त्याग लक्षणा से लक्षित केवल लक्ष्य स्वरूप चैतन्य मात्र का अभेद तो सम्भव ही है। 'सोऽयं देवदत्तः' 'प्रकृष्टप्रकाशश्चन्द्रः' इन वाक्यों में जिस प्रकार अखण्डार्थ बोधकत्व है, वैसे ही तत्त्वमस्यादि महावाक्यमें भी अखण्डार्थ बोधकत्व है। जहां पर पदार्थों का संसर्ग न दीखे, किन्तु फलतः पदार्थों का अभेद दीखे, ऐसे संसर्गानवगाहि यथार्थ ज्ञान को अखण्डार्थ बोध कहते हैं। एवं संसर्गानवगाहि यथार्थ ज्ञान का 'जनक' होने से तत्त्वमस्यादि महावाक्य को भी सोऽयं देवदत्त. इस वाक्य के समान ही अखण्डार्थ बोधक माना है।

'आम्नायस्य क्रियार्थत्वात्' इस नियम के अनुसार कार्य बोधक वाक्य में ही प्राभाकरों ने प्रामाण्य माना था, सिद्धार्थ बोधक वाक्य में नहीं, किन्तु यह मान्यता उनकी असंगत है, क्योंकि पुत्र के पद से चिह्नित (अंकित) वस्त्र को चैत्र के सामने रखकर दूत के 'पुत्रस्ते जातः' ऐसा कहने पर चैत्र के विकसित मुखकमल को देख उस भाषा से अनभिज्ञ तटस्थ व्यक्ति को भी पुत्र पद का अपने अर्थ में शक्तिग्रह हो जाता है। ऐसे ही 'कन्या ते गर्भिणी' इत्यादि सिद्धार्थ बोधक वाक्य में भी शक्तिग्रह होता है। फिर कार्य परक वाक्य मात्र में शक्तिग्रह का कथन दुराग्रह मात्र है। अतः सर्वप्रमाणाविरुद्ध ब्रह्मात्मैक्य वेदान्त का विषय सिद्ध हुआ।

इस प्रकार वेदान्तपरिभाषान्तर्गत विषय परिच्छेद की श्री विद्यानन्द जिज्ञासु विरचित सानुवाद सुबोधिनी व्याख्या समाप्त हुई ॥७॥

———

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अथ प्रयोजनपरिच्छेदः ॥८॥

इदानीं प्रयोजनं निरूप्यते। यदवगतं सत्स्ववृत्तितयेष्यते तत्प्रयोजनम्। तच्च द्विविधम्—मुख्यं गौणं चेति। तत्र सुखदुःखाभावौ मुख्यं प्रयोजनम्। तदन्यतरसाधनं गौणं प्रयोजनम्। सुखं च द्विविधम्—सातिशयं निरतिशयं चेति। तत्र सातिशयं सुखं विषयानुषङ्गजनितान्तःकरणवृत्तितारतम्यकृतानन्दलेशाविर्भावविशेषः।

'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' (बृ० ४-३-३२) इत्यादिश्रुतेः। निरतिशयं सुखं च ब्रह्मैव। 'आनन्दो ब्रह्मेति व्यजानात्' (तै० ३-६) 'विज्ञानमानन्दं ब्रह्म' (बृ० ३-१८) इतिश्रुतेः।

अथ प्रयोजननिरूपणं प्रतिजानीते—इदानीमिति। यज्ज्ञातं सन्ममेदं स्यादिति स्वसम्बन्धितयेष्यते तत्प्रयोजनम्, तद्विभजति—तच्चेति। तत्र—तयोर्द्वयोर्मध्ये। तदन्यतरसाधनं—तयोः सुखदुःखाभावयोरन्यतरस्य सुखस्य दुःखाभावस्य वा साधनं सुखादिरूपप्रयोजनगुणत्वाद्गौणम्। सुखस्यापि द्वैविध्यमाह—सुखं चेति। उपलक्षणमेतत्। दुःखाभावोऽपि द्विविधः—यत्किञ्चिद्दुःखाभावो यावद्दुःखाभावश्चेति। तत्र संसारदशायामाद्यो मोक्षावस्थायां द्वितीय इत्यपि बोध्यम्। विषयेति। विषयतारतम्याद्विषयेन्द्रियसन्निकर्षजनितान्तःकरणवृत्तितारतम्यं तत्कृतानन्दलेशाविर्भावविशेषः। तथा भूतवृत्त्याविषयावच्छिन्नाज्ञाननिवृत्तौ तदवच्छिन्नानन्दस्यैव प्रतिबिम्बनादानन्दसमुद्रस्य ब्रह्मण आनन्दलेशाविर्भावविशेष इत्यर्थः। अत्र श्रुतिं प्रमाणयति—एतस्यैवेति। आदिपदेन 'एष ह्येवानन्दयति' (तै० २-७) इत्याद्या श्रुतिरुपादेया। द्वितीयं सुखं लक्षयति—निरतिशयसुखमिति। चकारात्सातिशयसुखमप्यानन्दात्मब्रह्मलेशात्मकत्वात् ब्रह्मैवेत्यर्थः। अत्रापि श्रुतिं प्रमाणयति—आनन्द इति।

अ०—अब प्रयोजन का निरूपण किया जाता है। जो वस्तु अवगत होती हुई स्ववृत्ति रूप से इष्ट हो, उसे प्रयोजन कहते हैं। वह गौण एवं मुख्य भेद से दो प्रकार का है। उनमें सुख तथा दुःखाभाव मुख्य प्रयोजन है और सुख के साधन एव दुखाभाव के साधन गौण प्रयोजन हैं। सातिशय और निरति-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अ०—शय भेद से सुख भी दो प्रकार का है। उनमें विषय के सम्बन्ध से उत्पन्न अन्तःकरण की वृत्ति के तारतम्य से होने वाले आनन्द विशेष के आविर्भाव को सातिशय सुख कहते हैं। इस विषय में 'अन्य सभी प्राणी इसी आनन्द अंश के लेश से जीवित हैं' ऐसी श्रुति प्रमाण है। निरतिशय सुख ब्रह्म स्वरूप ही है। क्योंकि 'आनन्द ही ब्रह्म है ऐसा जाना' 'विज्ञान आनन्दरूप ब्रह्म है' ऐसी श्रुति निरतिशय सुख स्वरूप ब्रह्म के विषय में प्रमाण है।

भेद सहित प्रयोजन का निरूपण

सु०—अब वेदान्त शास्त्र के प्रयोजन निरूपण की प्रतिज्ञा करते हैं। 'वह वस्तु ज्ञात होकर मेरी होवे' इस प्रकार स्वसम्बन्धी रूप से इष्ट को प्रयोजन कहते हैं। प्रत्येक वस्तु का ज्ञान होना एक बात है और उसका अपने साथ सम्बन्ध हो जाना दूसरी बात है। शत्रु का सुख ज्ञात है किन्तु स्वसम्बन्धी न होने के कारण प्रयोजन नहीं कहा जाता। अपना सुख ज्ञात तथा स्वसम्बन्धि रूप से इष्ट होने के कारण प्रयोजन पद से कहा जाता है। अपना दुःख ज्ञात तथा स्वसम्बन्धी भी है, किन्तु उसे प्रयोजन नहीं कहते, क्योंकि वह इष्ट नहीं है। शत्रु का सुख हमें ज्ञात भी है और शत्रु को इष्ट भी है, किन्तु आत्म सम्बन्धी रूप से इष्ट न होने के कारण वह हमारा प्रयोजन नहीं कहा जायगा। अतः धर्मार्थकाममोक्ष इन चारों पदार्थों का यथावत् बोध हो और वे मुझे प्राप्त हों, इस रूपसे सभी को इष्ट होनेके कारण वे प्रयोजन कहे जाते हैं।

प्राणियों के सारे प्रयत्नों के पीछे सुख प्राप्ति तथा दुःखाभाव की आकांक्षा बनीं रहती है। अतः इन्हें मुख्य प्रयोजन और इनके साधनों को गौण प्रयोजन कहते हैं। साधन सुख के लिए हैं किन्तु सुख साधन के लिए नहीं है। वैसे ही दुःख निवृत्ति के लिए साधन है, साधन के लिए दुःखनिवृत्ति नहीं है। इस प्रकार अन्वय व्यतिरेक से सुखप्राप्ति एवं दुःखाभाव को मुख्य प्रयोजन और इनके साधनों को गौण प्रयोजन कहा गया है।

सुख और दुःखाभाव भी दो-दो प्रकार के हैं। जिससे बड़ा कोई सुख न हो, उसे निरतिशयसुख कहते हैं। एवं सम्पूर्ण दुःखों की आत्यन्तिक निवृत्ति को निरतिशय दुःखाभाव कहते हैं। थोड़ा सुख हो और वह भी सीमित काल तक रहे; तो उसे सातिशय कहेंगे। विषय सुख भी सुख रूप आत्मा का प्रतिबिम्ब है, किन्तु विषय सङ्ग से उत्पन्न होनेवाली अन्तःकरण की वृत्ति के द्वारा आनन्दलेश का आविर्भाव होने के कारण वह स्थिर नहीं रहता। अन्य वस्तु की अभिलाषा होते ही उस आनन्द अंश का तिरोधान हो जाता

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सु०—है। साथ ही इसमें न्यूनाधिक्य भी है। विषय के तारतम्य से विषय इन्द्रिय सन्निकर्ष जन्य अन्तःकरण की वृत्ति में तारतम्य रहता है। ऐसी वृत्ति से आनन्द लेश के आविर्भाव में भी तारतम्य बना रहता है। यह सातिशय सुख पश्वादि से लेकर हिरण्यगर्भ तक को होता है। पश्वादि को भी अभीष्ट वस्तु की प्राप्ति दशा में आनन्द के लेश का आविर्भाव होता ही है। अतः इसी सातिशय सुख की मीमांसा बृहदारण्यक तथा तैत्तिरीय श्रुति में की गयी है और यह आनन्द समुद्र ब्रह्म के आनन्द लेश ही विषय संसर्ग से जन्य अन्तःकरण की वृत्ति द्वारा आविर्भूत होता है। वैसे ही आधिभौतिक, आधिदैविक तथा आध्यात्मिक दुःखों की आत्यन्तिक निवृत्ति प्राणीमात्र को इष्ट है, किन्तु ऐसे त्रिविध दुःखो की आत्यन्तिक निवृत्ति मोक्ष में ही सम्भव है। ऐसा मोक्ष विद्वदनुभव सिद्ध है, क्योंकि उन्होंने ब्रह्मात्मैक्य बोध के बाद अपने स्वरूप में दुःख का अत्यन्ताभाव तथा निरतिशय सुख रूपता का स्पष्ट दर्शन किया है।

सातिशय दुःखाभाव संसार दशा में भी होता है। इसीलिये तो लौकिक दुःखाभाव के साधनों में भी प्राणियों की प्रवृत्ति देखी जाती है। किन्तु कारण सहित दुःख की आत्यन्तिक निवृत्ति मोक्ष दशा में ही होती है, संसार दशा में नहीं। वह मोक्ष ज्ञान से साध्य है, क्रिया अथवा उपासना से नहीं। अन्यथा उसमें अनित्यत्व आ जायगा। निरतिशय दुःखाभाव के साथ निरतिशय सुख की प्राप्ति भी हो, तो उसे मोक्ष की संज्ञा श्रुति ने दी है। अतः सातिशय निरतिशय भेद से दुःखाभाव तथा सुख दो दो प्रकार के बतलाये गये, जो मुख्य प्रयोजन हैं, एवं उसके साधन गौण प्रयोजन हैं।

मोक्षस्वरूप का अवधारण

प्रयोजन का लक्षण उक्त मोक्ष में भी घटता है। आनन्द स्वरूप ब्रह्म की प्राप्ति तथा कारण सहित दुःख की आत्यन्तिक निवृत्ति में विद्वानों का अनुभव तथा 'ब्रह्मविदाप्नोति परम्' 'ब्रह्म वेद ब्रह्मैव भवति' 'तरतिशोकमात्मवित्'—'तरति अविद्याम्'— इत्यादि श्रुति प्रमाण हैं। जिन्होंने लोकान्तर की प्राप्ति को मोक्ष माना है, उनके मत में गमनागमन निवृत्त नहीं हो सकता, क्योंकि क्रियाजन्य वस्तु कभी भी नित्य नहीं होती। लोकान्तर की प्राप्ति स्वरूप से पुरुषार्थ नहीं है, अपितु उन लोकों में दिव्य विषयजन्य आनन्द मिलता है। इसलिये उसे भी पुरुषार्थ कहा गया है, किन्तु क्रिया साध्य होने से ऐसे मोक्ष को नित्य नहीं कह सकते, वैसी स्थिति में मुक्तात्मा को भी पुनः जन्म मरणादि संसार की प्राप्ति हो जायगी। साथ ही 'अत्रैव समवलीयन्ते' 'न तस्य प्राणा उत्क्रा-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

आनन्दात्मकब्रह्मावाप्तिश्च मोक्षः शोकनिवृत्तिश्च। 'ब्रह्म वेद ब्रह्मैव भवति' (मु० ३-२-९) 'तरति शोकमात्मवित्' (छा० १-१-३) इत्यादिश्रुतेः। न तु लोकान्तरावाप्तिः, तज्जन्यवैषयिकानन्दो वा मोक्षः। तस्य कृतकत्वेनानित्यत्वे मुक्तस्य पुनरावृत्त्यापत्तेः।

भवत्वानन्दात्मकं ब्रह्म प्रकृते किमायातमित्याशङ्क्याऽनन्दरूपब्रह्मावाप्तिः समूलसर्वानर्थनिवृत्तिश्च मोक्ष इत्यवगतो मोक्षः स मम भूयादिति स्ववृत्तित—येष्यते इति तस्य प्रयोजनत्वमित्याह—आनन्देति। शोकशब्दः सकारणबन्धपरः। उभयत्र प्रमाणमाह—ब्रह्म वेदेति। तरति—अपनयति। आदिपदेन 'ब्रह्मविदाप्नोति परम्, (तै० २-१-१) 'तरत्यविद्या'—मित्याद्याश्रुतिरादेया। तान्त्रिकमतनिरासायाह—न त्विति। तस्याः स्वतः पुरुषार्थत्वाभावादाह—तज्जन्येति। तया लोकान्तरावाप्त्या जन्येत्यर्थः। उभयोर्मोक्षत्वाभावे हेतुमाह—तस्येति। उभयविधमोक्षस्य।

अ० - आनन्द स्वरूप ब्रह्म की प्राप्ति और दुःख की आत्यन्तिक निवृत्ति को मोक्ष कहते हैं। "ब्रह्म को जानकर ब्रह्म ही हो जाता है" "आत्मज्ञानी शोक को पार कर जाता है।" इन श्रुतियों से ब्रह्म की प्राप्ति तथा शोक की निवृत्ति सिद्ध होती है। लोकान्तर की प्राप्ति तथा उसमें होने वाले दिव्य विषयजन्य सुख को भी मोक्ष नहीं कहते, क्योंकि क्रिया जन्य होने से उसमें अनित्यत्व आ जायगा। अतः मुक्त पुरुष को भी पुनः संसार की प्राप्ति होने लग जायगी।

सु०—मन्ति' 'अत्र ब्रह्म समश्नुते' इत्यादि श्रुतियों से भी विरोध पड़ेगा। क्योंकि ये श्रुति तो मुक्त पुरुष के प्राण का लोकान्तर में जाने से निषेध कर रही हैं तथा प्रारब्ध क्षय के बाद शरीर देश में ही प्राणादि का समष्टि में विलय एवं आत्मभावेन संस्थिति बतला रही है। अतः लोकान्तर की प्राप्ति रूप मोक्ष श्रुति सम्मत नहीं है।

आपने ब्रह्मस्वरूप आनन्द की प्राप्ति तथा त्रिविध दुःखों की आत्यन्तिक निवृत्ति को मोक्ष कहा, वह मोक्ष पूर्व से सिद्ध नहीं है, किन्तु तत्वज्ञान के बाद प्राप्त हुआ है। तब तो वह सादि हो गया। यदि तत्वज्ञान से पूर्व भी आपका अभीष्ट मोक्ष सब को प्राप्त ही है, तो मोक्ष के उद्देश्य से वेदान्त श्रवणादि में प्रवृत्ति क्यों होने लगेगी, क्योंकि वह तो श्रवण से पूर्व ही सिद्ध है?

—ऐसा कहना ठीक नहीं। मोक्ष को हम सादि नहीं मानते, अपितु अनादि मानते हैं अर्थात् वेदान्त श्रवण से पूर्व भी आत्मा ब्रह्म स्वरूप होने के

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

ननु त्वन्मतेऽप्यानन्दावाप्तेरनर्थनिवृत्तेश्च सादित्वे तुल्यो दोषः, अनादित्वे मोक्षमुद्दिश्य श्रवणादौ प्रवृत्त्यनुपपत्तिरिति चेत् ? न; सिद्धस्यैव ब्रह्मस्वरूपस्य मोक्षस्यासिद्धत्वभ्रमेण तत्साधने प्रवृत्त्युपपत्तेः। अनर्थनिवृत्तिरप्यधिष्ठानभूतब्रह्मस्वरूपतया सिद्धैव। लोकेऽपि प्राप्त-प्राप्तिपरिहृतपरिहारयोः प्रयोजनत्वं दृष्टमेव। यथा हस्तगतविस्मृत-सुवर्णादौ 'तव हस्ते सुवर्णम्' इत्याप्तोपदेशादप्राप्तमिव प्राप्नोति। यथा वा वलयितचरणायां रज्जौ सर्पत्वभ्रमवतो 'नायं सर्प' इत्याप्तवाक्यात् परिहृतस्यैव सर्पस्य परिहारः। एवं प्राप्तस्याप्यानन्दस्य प्राप्तिः, परिहृत-स्याप्यनर्थस्य निवृत्तिः मोक्षः प्रयोजनम्।

ननु त्वदभिमतो मोक्षः सादिरनादिर्वा ? आद्ये, कृतकत्वेनानित्यत्वे मुक्तस्य पुनरावृत्तिलक्षणो दोषस्तुल्यः। द्वितीये, श्रवणादिवैयर्थ्यमिति तान्त्रिकः शङ्कते—नन्विति। द्वितीयपक्षमवलम्ब्य परिहरति—नेति। नन्वानन्दरूपस्य ब्रह्मणः सिद्धत्वेन तत्प्राप्तेस्तथात्वेऽप्यनर्थनिवृत्तेरभावरूपायाः कथं सिद्धत्वमित्याशङ्क्याह—अनर्थनिवृत्तिरपीति। ननु सिद्धस्य पुरुषार्थत्वादर्शनादेवंविधस्य मोक्षस्य पुरुषार्थता न भविष्यतीत्याशङ्क्याह—लोकेऽपीति। क्वेत्यपेक्षायामुदाहरति—यथेति। दृष्टान्तोक्तं प्रकृते योजयति—एवमिति।

अ० - यदि कहो कि आपके मत में भी आनन्द प्राप्ति तथा अनर्थ निवृत्ति सादि होने से तुल्य दोष है ही। अनादि मानने पर मोक्ष के उद्देश्य से श्रवणादि में प्रवृत्ति न हो सकेगी ? ऐसा कहना ठीक नहीं। ब्रह्म स्वरूप मोक्ष सदा प्राप्त है। उसमें अप्राप्त भ्रम हो जाने से उसके साधन श्रवणादि में प्रवृत्ति बन जाती है। अनर्थ निवृत्ति भी अधिष्ठान ब्रह्मस्वरूप होने से सदा सिद्ध ही है। लोक में भी नित्य प्राप्त की प्राप्ति तथा नित्य निवृत्त की निवृत्ति को प्रयोजन माना गया है। यथा हाथ में विस्मृत स्वर्ण आदि में 'तुम्हारे हाथ में स्वर्ण है' ऐसे आप्त पुरुष के उपदेश से मानों अप्राप्त की प्राप्ति हो जाती है यथा वा पैर में लिपटी रस्सी में सर्पत्व भ्रम वाले पुरुष को 'यह सर्प नहीं है' इस प्रकार आप्त वाक्य से पूर्व से निवृत्त सर्प की निवृत्ति होती है। ऐसे ही नित्य प्राप्त आनन्द की प्राप्ति एवं नित्यनिवृत्त अनर्थ की निवृत्ति को मोक्ष रूप प्रयोजन माना है।

सु०—कारण नित्यमुक्त है। फिर भी अनादि काल से अविद्या के कारण नित्य प्राप्त मोक्ष में भी अप्राप्ति का भ्रम हो गया है। ऐसे भ्रम की निवृत्ति के लिए

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Vedic Studies. AAIS(USA)

स च ज्ञानैकसाध्यः 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' (श्वे० ३-८) इति श्रुतेः, अज्ञाननिवृत्तेर्ज्ञानैकसाध्यत्वनियमाच्च। तच्च ज्ञानं ब्रह्मात्मैक्यगोचरम्। 'अभयं वै जनक प्राप्तोऽसि' (बृ० ४-२-४) 'तदात्मानमेवावेदहं ब्रह्मास्मि' (बृ० १-४-१०) इति श्रुतेः। 'तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनम्' इति नारदीयवचनाच्च।

स च मोक्षः किं कर्मसाध्यः किं वोपासनासाध्यः, आहोस्विदेतत्समुच्चयसाध्यः, उत कर्मज्ञानसमुच्चयसाध्यः, किं वोपासनाज्ञानसमुच्चयसाध्यः? किं वा केवलज्ञानलभ्यः? इति चिकित्सायां स च ब्रह्मज्ञानादिति प्रतिज्ञातमुपपादयति—स चेति। तमेव—आत्मानमेव, विदित्वा—तं विदित्वैवेति वा, मृत्युं जन्म मरणलक्षणां संसृतिम्, अत्येति—अतिक्रामति। अन्यः—कर्मादिरूपः, अयनाय—मोक्षाय, पन्थाः—मार्गो न विद्यते। 'हिरण्यदा अमृतत्वं भजन्ते' इत्यादिश्रुतेः कर्मसाध्यस्वर्गफलस्य प्रलयपर्यन्तस्थायित्वाभिप्रायत्वादितरवाक्यानामपि परम्परयाकर्मादेर्मोक्षसाधनत्वाभिप्रायत्वाच्चेति भावः। युक्तिमप्याह—अज्ञाननिवृत्तेरिति। ननु तज्ज्ञानभेदविषयं तत्साधनं किं वाऽभेदगोचरमिति विचिकित्सायामाह—तच्चेति। तत्र श्रुतिं प्रमाणयति—अभयमिति। स्मृतिं प्रमाणयति—तत्त्वमस्यादिति।

अ०—वह मोक्ष केवल ज्ञान से ही साध्य है क्योंकि उस परमेश्वर को ही जानकर मृत्यु का अतिक्रमण करता है, मोक्ष प्राप्ति का परमात्म ज्ञान से भिन्न साधन नहीं है' ऐसी श्रुति प्रमाण है। अज्ञान की निवृत्ति ज्ञानमात्रसे हीं सम्भव है। वह ज्ञान ब्रह्म और आत्मा की एकता को विषय करने वाला होता है, क्योंकि 'हे जनक! निश्चित तू अभय को प्राप्त कर गये हो' 'उसने आत्मा को ही जाना, कि मैं ब्रह्म हूँ"—ऐसी श्रुति प्रमाण है। 'तत्त्वमसि' आदि महावाक्य जन्य ज्ञान-मोक्ष का-साधन है।" ऐसा नारदजी का वचन भी मोक्ष के साधन ज्ञान को ही बतला रहा है।

सु०—उसकी निवृत्ति के साधन वेदान्त श्रवणादि में प्रवृत्ति बन जायगी। वैसे ही सच्चिदानन्द ब्रह्मस्वरूप आत्मा में अनर्थ संसार दुख सदा निवृत्त है, फिर भी भ्रम से दीखता है। अतः भ्रम सिद्ध दुःख निवृत्ति के लिये वेदान्त श्रवणादि में मुमुक्षु की प्रवृत्ति बन जाती है। लोक में भी देखा गया है कि कंकण हाथ में

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सु०—होते हुए भी कदाचित् भ्रम हो जाता है, कि हमारा कंकन खो गया है। फिर 'कंकन तुम्हारे हाथ में ही है' ऐसे आप्त वाक्य से नित्य प्राप्त कंकण की प्राप्ति कही जाती है। भ्रमनिवृत्ति के पश्चात् कंकण प्राप्ति जन्य आनन्द भी उसे होता ही है। वैसे ही पैर में लिपटी हुई रस्सी में सर्पभ्रम हो जाने के बाद यह सर्प नहीं है ऐसे आप्त वाक्य से नित्यनिवृत्त सर्प की और सर्प भ्रम से होने वाले भय कम्पनादि की निवृत्ति भी देखी जाती है। अतः नित्य प्राप्त ब्रह्म स्वरूप आनन्द की तत्वज्ञान से भ्रमनिवृत्ति द्वारा प्राप्ति के जैसे ही नित्य निवृत्त संसार अनर्थ की निवृत्ति भी औपचारिक ही है।

मोक्ष का साधन

मोक्ष का स्वरूप निश्चित हो गया, किन्तु वह मोक्ष कर्म साध्य है, उपासना साध्य है, कर्म-उपासना के समुच्चय से साध्य है? ज्ञान-कर्म समुच्चय से साध्य है, उपासना-ज्ञान समुच्चय से साध्य है या केवल ज्ञान से साध्य है। इस प्रकार संशय होने पर 'स च मोक्षः ब्रह्मज्ञानात्' ऐसी पूर्व की प्रतिज्ञा का ही उपपादन यहां भी कर रहे हैं, कि मोक्ष केवल ज्ञानमात्र से साध्य है। इस विषय में श्रुति प्रमाण है—आत्मा को जानकर जन्म मरण रूप संसार से छूट जाता है। मोक्ष के साधन कर्म उपासनादि नहीं हैं? कर्म अथवा उपासना या दोनों के समुच्चय से होने वाला मोक्ष, स्वर्गादि के समान चिरकाल रहने के बाद भी नष्ट हो जायगा।

अतः स्वर्ग को नित्य बतलाने वाली श्रुति के समान ही मोक्ष को नित्य बतलाने वाली श्रुति भी औपचारिक हो जायगी। तत्वज्ञान का कर्म एवं उपासना के साथ समुच्चय सम्भव भी नहीं है, क्योंकि तत्वज्ञान सम्पूर्ण अनात्म वस्तुओं में साध्यसाधन भाव का उपमर्दन करके ही उत्पन्न होता है। ऐसी अखण्डाकार वृत्ति का किसी भी कर्म तथा उपासना के साथ समुच्चय नहीं बन सकता। फिर ज्ञान कर्म समुच्चय एवं ज्ञानोपासना समुच्चय से मोक्ष की आशा दुराशाही है। तात्पर्य यह, कि केवल ज्ञान से मोक्ष होता है।

यदि कहो, कि लोकमें कृष्यादिके ज्ञानमात्रसे धान्यादि की प्राप्ति नहीं होती, किन्तु कृष्यादि विज्ञान के पश्चात् उसे करने से ही धान्यादि की प्राप्ति देखी जाती है, ऐसे ही शुष्क ब्रह्म ज्ञान से कुछ नहीं हो सकता, किन्तु ब्रह्म ज्ञान के बाद कर्म और उपासना का अनुष्ठान करने से या ब्रह्मज्ञान के साथ साथ अनुष्ठान करते रहने से मोक्ष फल प्राप्त होगा? तो ऐसा कहना ठीक नहीं, क्योंकि ज्ञान का किसी के साथ समुच्चय होता नहीं। कर्म उपासना अनात्म शरीरादि से साध्य हैं, तत्वज्ञान उसमें मिथ्यात्व दर्शन करा देता है। ऐसे

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तच्च ज्ञानमपरोक्षरूपम्। परोक्षत्वेऽपरोक्षभ्रमनिवर्तकत्वानुपपत्तेः। तच्चापरोक्षज्ञानं तत्त्वमस्यादिवाक्यादिति केचित्। मनननिदिध्यासन-संस्कृतान्तःकरणादेवेत्यपरे।

ब्रह्मात्मैक्यगोचरमपि तज्ज्ञानं परोक्षमपरोक्षं वेति विचिकित्सायामाह—तच्चेति। तज्ज्ञानं किं वाक्यादुत्पद्यत उतान्तःकरणादिति संशये पद्मपादाचार्य-गदितमाह—तच्चेति। वाचस्पतिमिश्रमतमाह—मननेति।

अ०—मोक्ष का साधन अपरोक्ष ज्ञान ही है। परोक्ष ज्ञान में अपरोक्ष भ्रम निवर्त्तकत्व की उपपत्ति नहीं है। वह अपरोक्ष ज्ञान 'तत्त्वमसि' महावाक्य से होता है, ऐसा कुछ आचार्यों का कहना है। दूसरे आचार्य मनन निदिध्या-सन से संस्कृत अन्तःकरण से ही अपरोक्ष ज्ञान मानते हैं।

सु०—आत्मा का याथात्म्य दर्शन, कर्म और उपासना के साथ कैसे समुचित हो सकेगा। हां, मल विक्षेप निवृत्ति के साधन रूप से ब्रह्मजिज्ञासा उत्पत्ति के लिये कर्मोपासना को भी ज्ञान के बहिरङ्ग साधन रूप से श्रुति ने मान लिया है। अतः कृष्यादि विज्ञान विषम दृष्टान्त माना जायगा, क्योंकि ब्रह्मज्ञान नित्य निवृत्त की निवृत्ति कराता है एवं नित्य प्राप्त की प्राप्ति। यहां पर तत्त्वज्ञान के बाद कुछ भी कर्तव्य शेष नहीं रह जाता। केवल वाणी मात्र से तत्त्वज्ञान के दम्भ भरने वाले को तो तत्त्व वेत्ता ही नहीं मानते सच्चे रूप में ब्रह्मात्मैक्य ज्ञान के पश्चात् जीवन्मुक्ति के विलक्षण आनन्द के लिये विद्वत्संन्यास पूर्वक आत्म स्थिति ही साधन है, अन्य कुछ भी नहीं। इसी आत्म स्थिति से वासना क्षय, मनोनाश के तारतम्य से जीवन्मुक्ति का विलक्षण आनन्द भी आविर्भूत होता चला जाता है। अतः मोक्ष, ज्ञानैकसाध्य सिद्ध हुआ।

सु०—ब्रह्म और आत्मा की एकता का अपरोक्ष ज्ञान ही मोक्ष का साधन है; परोक्ष ज्ञान नहीं, क्योंकि अपरोक्ष भ्रम की निवृत्ति परोक्ष ज्ञान से नहीं होती; अपितु अपरोक्ष ज्ञान से होती है। ऐसा अपरोक्ष (ब्रह्मात्मैक्य) बोध, तत्त्व-मस्यादि महावाक्य के श्रवण मात्र से ही होता है, ऐसा आचार्य पद्मपाद तथा उनके अनुयायी मानते हैं। भामती प्रस्थान के आचार्य वाचस्पति मिश्र के मत में मनन-निदिध्यासन से संस्कृत अन्तःकरण से ही अपरोक्ष ब्रह्मज्ञान होता है, केवल श्रवण से नहीं।

अपरोक्ष ज्ञान में पद्मपादाचार्य का मत

'वाक्य से सदा परोक्ष ज्ञान होता है फिर पूर्वाचार्यों ने अपरोक्ष ज्ञान

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तत्र पूर्वाचार्याणामयमाशयः—संविदापरोक्ष्यं न करणविशेषोत्पत्तिनिबन्धनम्, किन्तु प्रमेयविशेषनिबन्धनमित्युपपादितम्। तथा च ब्रह्मणः प्रमातृजीवाभिन्नतया तद्गोचरं शब्दजन्यज्ञानमप्यपरोक्षम्। अत एव प्रतर्दनाधिकरणे प्रतर्दनं प्रति 'प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमुपास्व' (कौ० ३-२) इतीन्द्रप्रोक्तवाक्ये प्राणशब्दस्य ब्रह्मपरत्वे निश्चिते सति मामुपास्वेत्यस्मच्छब्दानुपपत्तिमाशङ्क्य तदुत्तरत्वेन प्रवृत्ते 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' (ब्र० सू० १-१-३१) इत्यत्र सूत्रे शास्त्रीया दृष्टिः शास्त्रदृष्टिरिति तत्त्वमस्यादिवाक्यजन्यमहं ब्रह्मेति ज्ञानं दृष्टिशब्देनोक्तमिति।

ननु कथं वाक्यादपरोक्षज्ञानमित्याशङ्क्याह—तत्रेति। उपपादितं प्रत्यक्षपरिच्छेदेऽस्माभिरिति शेषः। तथा च—ज्ञानापरोक्षत्वस्य प्रमेयविशेषनिबन्धनत्वे सति। सन्निकृष्टविषयं शब्दजन्यमपि ज्ञानमपरोक्षमेवेत्युक्तम्। जीवगोचरज्ञानवत्तदभिन्नब्रह्मविषयमपि तदपरोक्षमेव, अत्र प्रमाणाकाङ्क्षायां 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' (ब्र० सू० १-१-३०) इति सूत्रस्थं भाष्यं प्रमाणमित्यभिप्रेत्याह—अत एवेति। शब्दजन्यज्ञानस्यापरोक्षत्वादेव। प्रतर्दनाधिकरणे—'प्राणस्तथाऽनुगमात्' (ब्र० सू० १-१-२८) इत्यस्मिन्प्राणोऽस्मीत्यादिवाक्यं तस्मिन्। तत्र विषयसंशयपूर्वपक्षसमाधानफलाख्यपञ्चाङ्गन्यायस्याधिकरणेति संज्ञा। 'प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च' (कौ० ३-१) इत्यस्यां कौषीतकिब्राह्मणोपनिषदाम्नाताख्यायिकायां प्राणोऽस्मीत्यादिश्रूयमाणं वाक्यं विषयस्तत्र प्राणशब्देन किं वायुरभिप्रेतः किं वा इन्द्र उत जीव आहोस्वित्परमात्मेति संशयः। वाय्वादिरभिप्रेत इति पूर्वपक्षः। परमात्मेति सिद्धान्तः। वाय्वाद्युपासनं पूर्वपक्षे फलं परमात्मोपासनमुत्तरपक्षे। प्राणः—परमात्मा। तथाऽनुगमात्पौर्वापर्यालोचनया वाक्यस्य तत्परत्वावगमादिति प्राणशब्दस्य ब्रह्मपरत्वे निश्चिते सति मामित्यस्मच्छब्दानुपपत्तिमाशङ्क्य दुत्तरत्वेन प्रवृत्ते यथा शास्त्रदृष्ट्याऽह सूर्योऽभवमहं मनुरिति वामदेवस्य गर्भस्थस्य मुनेरुक्तिस्तथा शास्त्रदृष्ट्या मामितीन्द्रोपदेशोऽपात्यथकसूत्रे इत्यर्थः।

अ०—उनमें पूर्वाचार्यों का यह आशय है, कि संवित् में अपरोक्षता करण विशेष की उत्पत्ति निबन्धन नहीं है, किन्तु प्रमेय विशेष के आधान है। ऐसा कहा गया है। अतः प्रमाता जीव से अभिन्न होने के कारण ब्रह्म विषयक शाब्द ज्ञान भी अपरोक्ष ही होता है। इसीलिये ब्रह्मसूत्र के प्रतर्दनाधिकरण में प्रतर्दन के प्रति मैं प्राण एवं प्रज्ञात्मा हूँ ऐसे मुझ प्रज्ञात्मा की उपासना आयु तथ

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अ०–अमृत भावसे करो। इन्द्र के इस वाक्य में प्राण शब्द ब्रह्म परक है–ऐसा निश्चित हो जाने पर "मामुपास्व" इसमें 'मां' शब्द की अनुपपत्ति की आशंका कर उसके उत्तर रूप में "शास्त्र दृष्टि से वामदेव के समान यह उपदेश है" इस सूत्र में शास्त्र प्रमाण जन्य दृष्टि को शास्त्र दृष्टि शब्द से कहा है। अतः महावाक्य जन्य "अहं ब्रह्मास्मि" ज्ञान को शास्त्र दृष्टि शब्द से कहा गया है।

सु० – कैसे मान लिया ? ऐसी आकांक्षा होने पर आचार्य पद्मपाद का आशय बताते हैं ; ज्ञान का परोक्षत्व, अपरोक्षत्व करण विशेष पर आधारित नहीं है, किन्तु प्रमेय विशेष पर आधारित है। यदि विषय सन्निहित हो, तो शब्द से भी अपरोक्ष ज्ञान 'दशमस्त्वमसि ' इत्यादि स्थल में देखा गया है और इसका उपपादन प्रत्यक्ष परिच्छेद में हो चुका है।

जैसे जीव के स्वरूप का अह पद से सदा अपरोक्ष ज्ञान होता है। वैसे ही ब्रह्म से अभिन्न जीव है, तो ब्रह्म विषयक तत्त्वमसि महावाक्य जन्य ज्ञान भी अपरोक्षही होगा ? इसमें विवाद नहीं है। उस विषय में प्रमाण की आकांक्षा होने पर महर्षि बादरायण रचित ब्रह्मसूत्र के प्रतर्दनाधिकरण में देखिए —।

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं मतम्॥

अधिकरण में पांच अवयव होते हैं —

(१) विषय। (२) विशय। (३) पूर्वपक्ष। (४) उत्तरपक्ष। (५) निर्णय।

तदनुसार प्रतर्दनाधिकरण में प्रतर्दन तथा इन्द्र के सम्वाद में उल्लिखित कौषीतकि उपनिषद् का 'प्राणो ऽस्मि' यह वाक्य विषय है। वहां प्राण शब्द से वायु इन्द्र, जीव अथवा परमेश्वर अर्थ लेना चाहिये ? ऐसा संशय होने पर पूर्वपक्ष है, कि परमात्मा अर्थ छोड़कर वायु आदि अर्थ ही लेना चाहिये। सिद्धान्तमें परमात्मारूप अर्थका ग्रहण किया है। इस विषयमें सूत्र है 'प्राणस्तथानुगमात्' (ब्र०१–१–२८) प्राण शब्द का अर्थ परमात्मा है, क्योंकि पौर्वापर्य की पर्यालोचन करने से इस वाक्य का अनुगम परमात्मा अर्थ में ही हो रहा है। इस प्रकार प्राण शब्द का अर्थ ब्रह्म निश्चित हो जाने पर 'मामुपास्व' इस वाक्य में माम् शब्द के अर्थ जानने की आकांक्षा होने पर इसके उत्तर रूप में महर्षि बादरायण ने कहा है—

"शास्त्रदृष्ट्या तूपदेशो वामदेववत्" (ब्र० १-१-३१)

जैसे वामदेव को गर्भ में ब्रह्म का अपरोक्ष होने के कारण "अहं मनुरभवं सूर्यश्च" सृष्टि के प्रारम्भ में मैं ही मनु हुआ था, मैं ही सूर्य हुआ था, इस

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indian Studies. AAIS(USA)

अन्येषां त्वयमाशयः—करणविशेषनिबन्धनमेव ज्ञानानां प्रत्यक्षत्वम्, न विषयविशेषनिबन्धनम्। एकस्मिन्नेव सूक्ष्मवस्तुनि पटुकरणापटुकरणयोः प्रत्यक्षत्वाप्रत्यक्षत्वव्यवहारदर्शनात्। तथा च संवित्साक्षात्त्वे इन्द्रियजन्यत्वस्यैव प्रयोजकतया न शब्दजन्यज्ञानस्यापरोक्षत्वम्।

अथाचार्यवाचस्पतिमिश्राणामाशयमाविष्करोति—अन्येषामिति। सूक्ष्मवस्तुनि—वर्णादौ। इन्द्रियजन्यत्वस्य—इन्द्रियत्वेनेन्द्रियजन्यत्वस्य। अनुमितिज्ञानस्य मनस्त्वेन तज्जन्यत्वान्न तत्रातिव्याप्तिः। अस्मिन्पक्षे 'इन्द्रियेभ्यः पराह्यर्थाः' (क० १-१०) इति श्रुताविन्द्रियेभ्य इत्यस्य बाह्येन्द्रियेभ्य इत्यर्थः। 'मनः सर्वेन्द्रियाणि च' इति श्रुतावपि सर्वाणि बाह्येन्द्रियाणीत्यर्थः।

अ०—दूसरे आचार्यों का आशय यह है, कि ज्ञान की प्रत्यक्षता करण विशेष से सम्बन्ध रखती है; विषय विशेष से नहीं। क्योंकि एक ही सूक्ष्म वस्तु में पटुकरण व्यक्ति को प्रत्यक्ष ज्ञान होता है और अपटुकरण को अप्रत्यक्ष। इस प्रकार लोक व्यवहार में देखा जाता है, वैसे ही संवित् साक्षात्व में भी इन्द्रिय जन्यत्व को ही प्रयोजक मानने से शाब्द ज्ञान में अपरोक्षत्व नहीं है।

सु०—तरह सर्वात्मभाव शास्त्र दृष्टिसे प्राप्त हो गया था। वैसे ही शास्त्र दृष्टिसे इन्द्र ने भी—'मामुपास्व' (मेरी उपासना करो) ऐसा कहा है। अतः माम् शब्द का अर्थ ब्रह्म है। ऐसी शास्त्र दृष्टि से यह समझा जाता है, कि तत्त्वमसि महावाक्य जन्य 'अहं ब्रह्म' ऐसा ज्ञान भी अपरोक्ष ही होता है। अतः महावाक्य जन्य ज्ञान की अपरोक्षता में प्रतर्दनाधिकरण प्रमाण है।

अपरोक्ष ज्ञान में वाचस्पति मिश्र का मत

आचार्य वाचस्पति मिश्र मनन निदिध्यासन से संस्कृत अन्तःकरण से ही ब्रह्म का अपरोक्ष मानते हैं। उनका अभिप्राय यह है, कि ज्ञान की प्रत्यक्षता में चक्षुरादि करण विशेष ही कारण है, विषय विशेष नहीं। क्योंकि समान शब्दादि विषय में किसी व्यक्ति को प्रत्यक्ष होता है, किसी को नहीं। यहांपर प्रत्यक्षत्व अप्रत्यक्षत्व का कारण शब्द नहीं है, किन्तु श्रोत्र का पटुकरणत्वादि ही है। जिसके श्रोत्र में कोई दोष नहीं, उसे वहां पर शब्द का अपरोक्ष ज्ञान होता है। दुष्ट कर्ण वाले को शब्द का अपरोक्ष नहीं होता। वैसे ही चक्षुरादिके विषय रूपादिमें भी परोक्षत्व, अपरोक्षत्व का कारण चक्षु में पटुकरणत्व, अपटुकरणत्व ही है। ठीक ऐसे ही ज्ञान के प्रत्यक्षत्व में इन्द्रिय जन्यत्व को ही नियामक मानना चाहिये। अतः शब्द जन्य ज्ञान में अपरोक्षत्व नहीं है।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

ब्रह्मसाक्षात्कारेऽपि मननिदिध्यासनसंस्कृतं मन एव करणम् 'मनसैवानुद्रष्टव्यः' इत्यादिश्रुतेः। मनोऽगम्यत्वश्रुतिश्चासंस्कृतमनोविषया। न चैवं ब्रह्मण औपनिषदत्वानुपपत्तिः, अस्मदुक्तमनसा वेदजन्यज्ञानानन्तरमेव प्रवृत्ततया वेदोपजीवित्वात्। वेदानुपजीविमानान्तरगम्यत्वस्यैव वेदगम्यत्वविरोधित्वात्।

साक्षात्कारस्येन्द्रियजन्यत्वे ब्रह्मसाक्षात्कारेऽपि मन एव करणमित्याह—ब्रह्मेति। सर्वदा तदापत्तिमाशङ्क्याह—मननेति। तत्र प्रमाणमाह—मनसैवेति। 'दृश्यते त्वग्र्या बुद्ध्या' (क० १-३-१३) इत्याद्याश्रुतिरादिपदादादेया। ननु 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' (तै० २-४-१) इत्यादिश्रुतेः का गतिरित्याशङ्क्याह—मन इति। ननु 'तं त्वौपनिषदं पुरुषं पृच्छामि' (बृ० ३-९-१६) इति श्रुतिबोधितमुपनिषन्मात्रगम्यत्वं विरुद्धमित्याशङ्क्य परिहरति—नचेति। किं तदनुपजीव्यमानान्तरगम्यत्वे तदनुपपत्तिरुतत दुपजीव्यमानान्तरगम्यत्वे? नाद्यः, इष्टापत्तेः। न द्वितीयः, अपूर्वस्य तदुपजीव्यानुमानार्थापत्तिगम्यत्वेऽपि वेदगम्यत्वाभ्युपगमादित्याशयेनाह—अस्मदिति। मननिदिध्यासनसहकृतस्य मनसः।

अ०—ब्रह्म साक्षात्कार में भी मनन निदिध्यासन से संस्कृत मन ही करण है, क्योंकि मनसैवानुद्रष्टव्यम् इत्यादि श्रुति प्रमाण है। 'ब्रह्म मन से अगम्य है' ऐसा कहने वाला श्रुति का अभिप्राय यह है कि ब्रह्म असंस्कृत मन का विषय नहीं है। यदि कहो, कि इस प्रकार तो ब्रह्म में औपनिषदत्व की अनुपपत्ति हो जायगी? तो ऐसा कहना ठीक नहीं। हमारा बतलाया हुआ मन वेद जन्य ज्ञान के अनन्तर ही प्रवृत्त होता है, क्योंकि वह वेदोपजीवी है जो वेदोपजीवि प्रमाण नहीं है ऐसे वेदानुपजीवि प्रमाणान्तर से गम्यत्व का ही वेदगम्यत्व सिद्धान्त के साथ विरोध होता है।

सु०—इन्द्रिय जन्य ज्ञान को प्रत्यक्ष कहा गया है, तो ब्रह्म साक्षात्कार में भी मन रूप इन्द्रिय को करण मानना चाहिए। उसे मनन निदिध्यासन से संस्कृत हो जाने के बाद ही "मनसैवानुद्रष्टव्यं दृश्यते त्वग्र्या बुद्ध्या" इत्यादि श्रति के आधार पर ब्रह्म साक्षात्कार में करण माना गया है।

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह। (तै० २४-१)

इस श्रुति में जो ब्रह्म को मन वाणी का अविषय कहा है। उसका अभिप्राय यह है, कि संस्कार शून्यमलिन मन से ब्रह्म नहीं जाना जाता।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

शास्त्रदृष्टिसूत्रमपि ब्रह्मविषयमानसप्रत्यक्षस्य शास्त्रप्रयोजकत्वादुपपद्यते। तदुक्तम्—अपि संराधने सूत्राच्छास्त्रार्थध्यानजा प्रमा।
शास्त्रदृष्टिर्मता तां तु वेत्ति वाचस्पतिः परः॥ इति॥

अस्मिन्पक्षे शास्त्रदृष्टिसूत्रविरोधं परिहरति - शास्त्रेति। तथा च तत्र शास्त्रदृष्टिपदेन मानसं प्रत्यक्षमेव तत्प्रयोज्यत्वादुच्यत इत्यर्थः। वाचस्पतिमिश्राणामिदं मतमित्यत्र कल्पतरुकारसम्मतिमाह—तदुक्तमिति। शास्त्रार्थध्यानजा प्रमा शास्त्रदृष्ट्यात्मपदेशो वामदेववदिति सूत्रे शास्त्रदृष्टिशब्देनाभिमता तां तथाभूतां शास्त्रदृष्टिं वाचस्पतिर्जानाति यतः परः—सर्वोत्कृष्टः। तथाभूता प्रमैव शास्त्रदृष्टिरित्यत्र को हेतुरित्याशङ्क्योक्तम्—अपीति। 'अपि संराधने प्रत्यक्षानुमानाभ्याम्' (ब्र० सू० ३-२-२४) इति सूत्रात्। अपि चैनमात्मानं निरस्तसमस्तप्रपञ्चमव्यक्तं संराधनस्य भक्तिध्यानप्रणिधानाद्यनुष्ठानस्य काले योगिनः पश्यन्ति। तत्र हेतुः प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्याम्। तथा च श्रुतिः—'ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः' (मु० ३-१ ८) इत्याद्या। स्मृतिश्च—

यं विनिद्रा जितश्वासाः सन्तुष्टाः संयतेन्द्रियाः।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः॥ इत्याद्या॥

अ०—ब्रह्मविषयक मानस प्रत्यक्ष का प्रयोजक शास्त्र है, ऐसा मान लेने पर शास्त्र दृष्टि सूत्र भी उपपन्न हो जाता है! इसी बात को कहा है—शास्त्र के अर्थ का ध्यान करने से उत्पन्न हुई प्रमा ही 'अपि संराधने' सूत्र में शास्त्र दृष्टि शब्द से कही गयी है। उसे सर्वश्रेष्ठ वाचस्पति जानते हैं।

सु०—'तं त्वौपनिषदं पुरुषं पृच्छामि" (बृ० ३ ९-१६) इस श्रुतिमें ब्रह्मको उपनिषद् वाक्यैकगम्य माना है। इसके साथ भी मनोगम्यत्व सिद्धान्तका कोई विरोध नहीं है, क्योंकि जिस मन को ब्रह्मसाक्षात्कार में हमने करण माना है, वह तो वेद जन्य ज्ञान के बाद ही प्रवृत्त होता है। इसलिए ऐसे मन को वेदोपजीवी माना है। यदि वेद श्रवण निरपेक्ष (वेदानुपजीवी) मन का विषय हम ब्रह्म को मानते, तो वेदगम्यत्व सिद्धान्त के साथ विरोध आ सकता था। अतः वेदान्त श्रवणानन्तर मनन निदिध्यासन से संस्कृत मन से ब्रह्म का साक्षात्कार होता है। जैसे गान्धर्वशास्त्र के श्रवणादि अभ्यास से संस्कृत श्रोत्र ही षड्जादि स्वरों के भेद का साक्षात्कार करता है। वैसे ही मननादि से संस्कृत मन से हीं ब्रह्म का साक्षात्कार होता है, असंस्कृत मन से नहीं।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तच्च ज्ञानं पापक्षयात्। स च कर्मानुष्ठानादिति परम्परया कर्मणां विनियोगः। अत एव 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ० ४-४-२२) इत्यादिश्रुतिः, 'कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते' इत्यादिस्मृतिश्च सङ्गच्छते।

तादृशज्ञानस्य किं साधनमित्यपेक्षायामाह—तच्चेति। स च—पापक्षयः। इत्येवं परम्परया तत्त्वज्ञाने कर्मणां विनियोगः। अत एव—परम्परया विनियोगादेव। तं—पूर्वोक्तम्, एतम्—अनन्तरोक्तं परमात्मानं, ब्राह्मणाः—वेदानुवचनादिभिर्वेदितुमिच्छन्ति। वेदानुवचनं—वेदाध्ययनम्। अनाशकम्—अनशनं हितमितमेध्याशनम्। तत्र प्रत्ययार्थतया प्रधानभूतायामुत्कटेच्छायां वेदानुवचनादीनां साधनतेति वाचस्पतिमिश्राः। अश्वेन जिगमिषतीत्यादाविव धात्वर्थस्य वेदनस्यैव प्राधान्यमाश्रित्य ज्ञाने तेषां साधनत्वमिति विवरणाचार्याः। 'यस्यैते चत्वारिंशत्संस्काराः' इत्यादिश्रुतिः, 'तपसा कल्मषं हन्ति' इत्याद्या स्मृतिश्चादिपदाज्ज्ञेया।

अ०—वह ज्ञान पापक्षय के बाद होता है और पाप का क्षय कर्मानुष्ठान से होता है। इस प्रकार परम्परा से कर्मों का भी ज्ञान प्राप्ति में विनियोग हो जाता है। इसीलिए तो (उस परमेश्वर को वेदानुवचन, यज्ञ, दान, तप तथा युक्ताहार से ब्राह्मण वर्ग जानने की इच्छा करते हैं) ऐसी श्रुति है तथा 'सत्कर्म से पाप के पक जाने के बाद ज्ञान की प्रवृत्ति होती है'—इत्यादि स्मृति भी संगत हो जाती है।

सु०—यदि ब्रह्म प्रत्यक्ष में मन को करण मानोगे, तो शास्त्र दृष्ट सूत्र का विरोध होगा—ऐसा नहीं कह सकते, क्योंकि ब्रह्म विषयक मानस प्रत्यक्ष को शास्त्र मूलक ही कहा गया है। इस विषय में सर्वतन्त्र स्वतन्त्र वाचस्पति मिश्र के मत में कल्पतरुकार की उक्ति भी स्मरणीय है।

"अपि संराधने प्रत्यक्षानुमानाभ्याम्" इस सूत्र में निरस्त-समस्त प्रपञ्च अव्यक्त ब्रह्म के ध्यान करने पर योगी उसे प्रत्यक्ष देखते हैं, क्योंकि ध्यान से परमात्मा का प्रत्यक्ष होता है, इस विषय में प्रत्यक्षश्रुति, अनुमान=स्मृति भी प्रमाण है।

श्रवणादि ज्ञान के साधन हैं

महावाक्य जन्य ज्ञान वेदान्त श्रवण से अथवा श्रवणादि द्वारा संस्कृत मन से होता हो, किन्तु कर्म का विनियोग ब्रह्मज्ञान में है या नहीं? ऐसी

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Vedic Studies. AAIS(USA)

एवं श्रवणमननिदिध्यासनान्यपि ज्ञानसाधनानि । मैत्रेयीब्राह्मणे 'आत्मा वा अरे द्रष्टव्यः' (बृ० २-४-४) इति दर्शनमनूद्यतत्साधनत्वेन 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ० २-४-४) इति श्रवणमनन-निदिध्यासनानां विधानात् ।

यथा कर्मणां तत्त्वज्ञाने विनियोगस्तथा श्रवणादीनामपीत्याह—एवमिति । तत्र बृहदारण्यकश्रुतिं प्रमाणयति—मैत्रेयीब्राह्मण इति । याज्ञवल्क्यस्य स्वभार्यया मैत्रेय्या संवादस्य प्रकरणे । तत्र श्रवणादिकं लक्षयति—तत्रेति ।

अ०—इस प्रकार श्रवण मनन निदिध्यासन भी ज्ञान के साधन हैं । क्योंकि मैत्रेयी ब्राह्मण में "अरे मैत्रेयी ! आत्मा का साक्षात्कार करना चाहिए" इस प्रकार दर्शन का अनुवाद कर "आत्मा का श्रवण, मनन, तथा निदिध्यासन करना चाहिये" इत्यादि वाक्य से दर्शन के साधन रूप से श्रवण, मनन, निदिध्यासन का विधान किया है ।

सु०—आकांक्षा होनेपर कहते हैं, कि कर्मानुष्ठान से जब पाप का नाशहो जाता है तत्पश्चात् श्रवणादि से तत्त्वज्ञान उत्पन्न होता है । अतः तत्त्वज्ञान में साक्षात् साधन वेदान्त श्रवण है । मनन निदिध्यासन भी असम्भावना विपरीत भावना का निवर्तक होने से परम्परया साधन हैं । वैसे ही ब्रह्म जिज्ञासा के प्रति कर्म और उपासना का अनुष्ठान भी साधन है । इसलिये तत्त्वज्ञान में निष्काम कर्म तथा उपासना को भी परम्परा से साधन मान लिया है । "ब्राह्मणा विविदिषन्ति यज्ञेन" इत्यादि श्रुति से विविदिषा के प्रति यागादि कर्म को साधन माना जाता है, न कि तत्त्वज्ञान के प्रति । क्योंकि विविदिषन्ति में विद् धातु का अर्थ ज्ञान है एवं सन् प्रत्ययका अर्थ इच्छा है । इच्छाका कर्म धात्वर्थ वेदन है । तत्त्वजिज्ञासा में यागादि क्रिया का उपयोग है ज्ञान में नहीं । अतः ज्ञान में कम उपासना को भी परम्परा से साधन मान लेने के कारण उनका उपयोग हो जाता है ।

जैसे निष्काम कर्म का तत्त्वज्ञान में विनियोग बतलाया गया, वैसे ही श्रवण-मनन-निदिध्यासन का भी तत्व ज्ञान में विनियोग है ! क्योंकि बृहदारण्य श्रुति के मैत्रेयी ब्राह्मण में याज्ञवल्क्य महर्षि ने मैत्रेयी के प्रति कहा है—

"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"

इस वाक्य में आत्मदर्शन फल है और श्रवणादि इसके साधन हैं"—यहां पर श्रौत क्रम तथा आर्थ क्रम का विचार आवश्यक हो जाता है । जैसा सुना गया, उसे श्रौत क्रम कहते हैं—और प्रयोजन के अनुरोध से क्रम माना जाय, तो उसे

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तत्र श्रवणं नाम वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूला मानसी क्रिया। मननं नाम शब्दावधारितेऽर्थे मानान्तरविरोधशङ्कायां तन्निराकरणानुकूलतर्कात्मज्ञानजनको मानसो व्यापारः। निदिध्यासनं नाम अनादिदुर्वासनया विषयेष्वाकृष्यमाणचित्तस्य विषयेभ्योऽपकृष्यात्मविषयकस्थैर्यानुकूलो मानसो व्यापारः।

अ०—उनमें वेदान्तों का अद्वितीय ब्रह्म में तात्पर्य के निश्चयानुकूल मानसिक क्रिया को श्रवण कहते हैं। श्रवण से निश्चित अर्थ के विषय में प्रमाणान्तर से विरोध की शंका होने पर, उस प्रमाणान्तर विरोध शंका निराकरण के अनुकूल तर्क रूप ज्ञान के जनक मानस व्यापार को मनन कहते हैं। अनादि दुर्वासना से विषयों में आकृष्ट चित को विषयों से हटाकर आत्मविषयक स्थिरता के अनुकूल मानसिक क्रिया को निदिध्यासन कहते हैं।

सु०—आर्थ क्रम कहते हैं। श्रौत क्रमानुसार आत्मदर्शन के पश्चात् श्रवण मनन-निदिध्यासन का अनुष्ठान दृष्ट प्रयोजन के साधक न हो सकेंगे। अतः श्रवणादि का फल अदृष्ट की कल्पना करनी पड़ेगी। जिस प्रकार 'अग्निहोत्रं जुहोति' 'यवागुं पचति'—इन दोनों वाक्यों से विहित कर्म का अनुष्ठान श्रौत क्रम से करें, तो अग्निहोत्र करने के बाद यवागुं पाककोदृष्ट प्रयोजन वाला न मानकर अदृष्ट का साधक मानना होगा और 'सम्भवति दृष्टफलकत्वे अदृष्टफलकल्पनायाः अन्यायत्वात्' (दृष्ट फल सम्भव हो, तो अदृष्ट फल की कल्पना न्याय विरुद्ध है।) अतः श्रौत क्रम का परित्याग कर आर्थक्रमानुरोधेन यवागुपाक के बाद अग्निहोत्र करें, तो अग्निहोत्र रूप कर्म की निष्पत्ति में यवागु पाक का उपयोग हो जाने के कारण यवागु पाक का फल दृष्ट हो जाता है। इसीलिये आर्थक्रम से यवागु पाक का पहले अनुष्ठान किया जाता है, उसके बाद अग्निहोत्र का। ठीक ऐसे ही श्रवणादि का अदृष्ट प्रयोजन न मानना पड़े। अतः पूर्व अनुष्ठित श्रवण-मनन-निदिध्यासन आत्मदर्शन के साधक हो जाते हैं। इसीलिये परिभाषाकार ने कहा कि आत्मदर्शन का अनुवाद कर आत्मदर्शन के साधन रूप से श्रवणादि का विधान किया गया है। अतः श्रवणादि आत्मज्ञान के साधन हैं।

श्रवणादि का निरूपण

श्रवण, मनन, निदिध्यासन शब्द पारिभाषिक हैं। जो कुछ कानों से सुनते हैं, मन से सोचते हैं या ध्यान करते हैं। इसे श्रवण, मनन, निदिध्यासन

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सु०—नहीं कहते, किन्तु वेदान्त अद्वैत ब्रह्म के प्रतिपादक हैं, या भेदके प्रतिपादक हैं। इस प्रकार वेदान्त के विषय में सन्देह होने पर पूर्वोक्त तात्पर्य निर्णायक छः लिङ्गों के द्वारा अद्वैत ब्रह्म में वेदान्त के तात्पर्य निश्चायक मानस व्यापार को ही श्रवण कहते हैं। सम्पूर्ण वेदान्त को कानों से सुन लेने के बाद भी यदि अद्वैत ब्रह्म में वेदान्त का तात्पर्य निश्चय न हो सका, तो कहना पड़ेगा, कि ऐसे व्यक्ति ने वेदान्त का श्रवण नहीं किया।

उक्त रीति से वेदान्त का श्रवण कर लेने पर मनन होना स्वाभाविक है। यदि मनन प्रारम्भ न हुआ, तो श्रवण की ही अपरिपक्वता मानी जायगी। श्रवण की परिपाक अवस्था का यह सुपरिणाम है, कि वेदान्त-प्रमाणगत असम्भावना की निवृत्ति हो जायगी, तथा मनन भी प्रारम्भ हो जायगा। वेदान्त शास्त्र अद्वैत ब्रह्म का प्रतिपादन करता तो है, किन्तु प्रत्यक्षादि प्रमाण से स्पष्ट भेद दीख रहा है। ऐसे प्रमाणान्तर से विरोध की शंका होने पर उस विरोध को हटाने वाले अनुकूल तर्क रूप ज्ञान को पैदा करने वाले मानस व्यापार को ही मनन कहते हैं। संक्षेप में भेद के बाधक तथा अभेद के साधक तर्क से विचार करने का नाम ही मनन है। इस प्रकार मनन करने से जीव ब्रह्म की एकता रूप (वेदान्त शास्त्र के प्रमेय के) विषय में जो असम्भावना हो रही थी, वह दूर हो जाती है। प्रमेयगत असम्भावना निवृत्ति के साथ ही निदिध्यासन का स्वभाव से प्रारम्भ हो जाना ही मनन की परिपाकावस्थाका सुपरिणाम है। यदि स्वभाव से निदिध्यासन न होने लगे, तो मानना चाहिये, कि अभी मनन पूर्ण नहीं हुआ। अनादि काल से मन में रही हुई संसार की दुर्वासनाओं से ही विषयों में मन बार-बार जाता रहता है। ऐसे विषयाग्नि से सन्तप्त मन को विषयों से पृथक् कर आत्मा में स्थिर करने के लिये मानस व्यापार को निदिध्यासन कहते हैं। इस निदिध्यासन से अनात्मा में आत्म बुद्धि रूप विपरीत भावना की सर्वथा निवृत्ति हो जाती है एवं ब्रह्म, आत्मा के अभेद का साक्षात्कार हो जाता है। यही निदिध्यासन का फल है।

उक्त श्रवण, मनन, निदिध्यासन में से ब्रह्म की अपरोक्षता का साक्षात् साधन निदिध्यासन है। क्योंकि 'ततस्तुतं पश्यति निष्कलं ध्यायमानः' (उसके बाद निष्कल ब्रह्म का ध्यान करते हुये उस [परमेश्वर] को देखा) इत्यादि श्रुति परमेश्वर दर्शन का साक्षात् साधन ध्यान को ही बतला रही है। वैसे ही निदिध्यासन का साक्षात् साधन मनन है, क्योंकि मनन से ही अर्थ में दृढता आती है और फिर उस विषय में अनात्माकार वृत्ति हटकर निरन्तर आत्माकार वृत्ति रूप निदिध्यासन होने लग जाता है। आत्माकार वृत्ति की

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तत्र निदिध्यासनं ब्रह्मसाक्षात्कारे साक्षात्कारणम्। 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्' (श्वे० १-३) इत्यादिश्रुतेः। निदिध्यासने च मननं हेतुः, अकृतमननस्यार्थदार्ढ्याभावेन तद्विषये निदिध्यासनायोगात्। मनने च श्रवणं हेतुः, श्रवणाभावे तात्पर्यानिश्चयेन शाब्दज्ञानाभावेन श्रुतार्थविषयकयुक्तत्वायुक्तत्वनिश्चयानुकूलमननायोगात्। एतानि त्रीण्यपि ज्ञानोत्पत्तौ कारणानीति केचिदाचार्या ऊचिरे।

तत्र किं त्रयाणामपि साक्षात्कारसाधनत्वम्, उतान्यतमस्य? तत्रापि कस्येत्याकाङ्क्षायामाह—तत्रेति। 'ततस्तु तं पश्यति निष्कलं ध्यायमानः' (मु० ३-१-८) इत्याद्या श्रुतिरादिपदोपादेया। निदिध्यासनस्य मननायत्तत्वात्तस्य च श्रवणाधीनत्वात् त्रीण्यपि साक्षात्परम्परया च ज्ञानोत्पत्तिसाधनानीत्याचार्यवाचस्पतिमिश्रमतमुपसंहरति—एतानीति।

अ०—उनमें निदिध्यासन ब्रह्म के प्रत्यक्ष में साक्षात् साधन है। इस विषय में 'ध्यान योग में लगे हुये महर्षियों ने अपने गुणों से आच्छन्न देवात्म शक्ति को देखा'—इत्यादि श्रुति भी प्रमाण हैं। निदिध्यासन में मनन कारण है, क्योंकि मनन न करने वाले साधक को अर्थ की दृढ़ता न होने के कारण इस विषय में निदिध्यासन नहीं हो सकता। मनन में श्रवण कारण है क्योंकि श्रवण के अभाव में तात्पर्य का निश्चय न होने से शाब्द ज्ञान का ही अभाव है; तो वैसी दशा में सुने हुए अर्थ के विषयमें युक्तत्व अयुक्तत्व निश्चय के अनुकूल मनन नहीं हो सकता। इन तीनोंको ज्ञानकी उत्पत्तिमें कारण आचार्योंने कहा है।

सु०—विजातीय अनात्माकार वृत्ति है। वह विजातीय वृत्ति बीच बीच में न बनती रहे, केवल तैल धारा के समान सदा आत्माकार वृत्ति ही बने, तो ऐसे मानसिक चिन्तन को ही निदिध्यासन कहते हैं। इस निदिध्यासन में मनन को और मनन में श्रवण को कारण माना है, क्योंकि श्रवण के बिना वेदान्त का तात्पर्य ही निश्चित न हो सका, तो वेदान्त वाक्य से शाब्द बोध कैसे हो सकेगा और शाब्द बोध के अभाव में मनन भी कैसे होगा। अतः श्रवण से तात्पर्य निश्चय द्वारा शाब्द बोध हो जाने के बाद उस विषय में युक्तत्व अयुक्तत्व निश्चयानुकूल मनन होता है। ये तीनों ही ज्ञान उत्पत्ति में कारण हैं। ऐसा आचार्य वाचस्पति मिश्र का मत है।

मनन, निदिध्यासन श्रवण के तार्तीय शेष नहीं हैं

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

 Digitization by American Academy of Indic Studies. AAIS(USA)

अपरे तु श्रवणं प्रधानम्, मनननिदिध्यासनयोस्तु श्रवणात्पराचीनयोरपि श्रवणफलब्रह्मदर्शननिर्वर्तकतया आरादुपकारकाङ्गत्वमित्याहुः। तदप्यङ्गत्वं न तार्तीयशेषत्वरूपम्। तस्य श्रुत्याद्यन्यतमप्रमाणगम्यस्य प्रकृते श्रुत्याद्यन्यतमाभावेऽसम्भवात्।

अपरे—विवरणाचार्यास्तु। पराचीनयोः—अनन्तरभाविनोः। आरात्—सामीप्यात्। नन्वङ्गत्वमपि किं तार्तीयशेषत्वरूपमुत मृत्पिण्डादकार्ये घटादौ चक्रादीनामिव सहकारिकारणत्वरूपमित्याशङ्क्य द्वितीयमाश्रयितुमाद्यं निराकरोति—तदप्यङ्गत्वमिति। तार्तीयं—तृतीयाध्यायस्थम्। श्रुत्याद्यभावं स्फुटयति—तथा हीति।

अ०—दूसरे आचार्य ने श्रवण को प्रधान और श्रवण के पश्चात् होनेवाले मनन निदिध्यासन को भी श्रवण के फल ब्रह्म दर्शन का ही सम्पादक होने से आरात उपकारक अङ्ग कहा है, किन्तु वह अङ्गत्व भी मीमांसा दर्शन के तृतीय अध्याय में बताये हुए शेषत्व रूप नहीं हैं। क्योंकि तार्तीय शेषत्व रूप अङ्गत्व श्रुति इत्यादि में से अन्यतम प्रमाण गम्य है। प्रकृत में श्रुति आदि अन्यतम प्रमाण के अभाव होने से श्रवण के प्रति मननादि में तार्तीय शेषत्व नहीं है।

सु०—विवरणाचार्य श्रवण को प्रधान तथा श्रवण के पश्चाद्भावी मनन, निदिध्यासन को श्रवण का आरात उपकारक अङ्ग मानते हैं, क्योंकि श्रवण का फल ब्रह्म दशन है और उसी को मनन और निदिध्यासन भी सम्पन्न करते हैं। अतः वे द नों ही श्रवण के आरात् उपकारक अङ्ग कहे गये हैं। अङ्गत्व दो प्रकार का होता है।

१ मीमांसा दर्शन के तृतीय अध्याय में कहे गये तार्तीय शेषत्व रूप, २ मृत् पिण्ड से उत्पन्न घटादि कार्यमें चक्रादिके समान सहकारी कारणत्वरूप,

जिस प्रकार घटादि कार्य उत्पत्ति में मृत्पिण्ड प्रधान है और चक्रादि सहकारी कारण हैं। ऐसे ही ब्रह्मसाक्षात्कार में श्रवण प्रधान कारण है और मननादि सहकारी कारण हैं। तार्तीय शेषत्व रूप अङ्गत्व यहां इष्ट नहीं है, क्योंकि तार्तीय शेषत्व रूप अङ्गत्व के बोधक "श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान समाख्यानां पारदौर्बल्यमर्थविप्रकर्षात्" इस सूत्र से श्रुत्यादि प्रमाण माने गये हैं। उनमें से श्रवण के प्रति मनन-निदिध्यासन में अङ्गत्व का बोधक एक भी प्रमाण नहीं है, फिर भला श्रवण का मनन निदिध्यासन तार्तीय शेष रूपअङ्ग कैसे बन सकेगा? उक्त श्रुत्यादि प्रमाण का अर्थ इस प्रकार बतलाया गया है—

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तथा हि, 'व्रीहिभिर्यजेत' 'दध्ना जुहोति' इत्यादाविव मननिदिध्यासनयोरङ्गत्वे न काचित्तृतीयाश्रुतिरस्ति। नापि 'बर्हिर्देवसदनं दामि' इत्यादिमन्त्राणां बर्हिःखण्डनप्रकाशनसामर्थ्यवत् किञ्चिल्लिङ्गमस्ति। नापि प्रदेशान्तरपठितप्रवर्ग्यस्याग्निष्टोमे प्रवृणक्तीति वाक्यवच्छ्रवणानुवादेन मननिदिध्यासनयोर्विनियोजकं किञ्चिद्वाक्यमस्ति। नापि 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति वाक्यावगतफलसाधनताकदर्शपूर्णमासप्रकरणे प्रयाजादीनामिव फलसाधनत्वेनावगतस्य श्रवणस्य प्रकरणे मननिदिध्यासनयोराम्नानम्।

अ०—वह इस प्रकार है। "व्रीहि से याग करे" "दधि से होम करे" इत्यादि के समान मनन निदिध्यासन में अङ्गत्व बोधक कोई तृतीया श्रुति तो है नहीं। वैसे ही, हे दर्भ! देवता के आसन के लिए तेरा छेदन करता हूँ इत्यादि मन्त्रों का बर्हि (दर्भ) छेदन प्रकाशन सामर्थ्य के समान कोई लिङ्ग भी यहां नहीं दीखता तथा दूसरे प्रदेश में पढ़े गये प्रवर्ग्य का अग्निष्टोम याग में 'प्रवर्ग्य रूप कर्म करे' इस वाक्य के समान श्रवण का अनुवाद कर मनन तथा निदिध्यासन का विनियोग बतलाने वाला कोई वाक्य भी नहीं है। एवं 'स्वर्ग काम पुरुष दर्शपौर्णमास याग करे' इस वाक्य से जानी गयी फल साधनता का दर्शपौर्णमास प्रकरण में पठित प्रयाजादि में अङ्गत्व प्रकरण प्रमाण से जाना जाता है। वैसे ही ब्रह्म साक्षात्कार रूप फल के साधन रूप से अवगत श्रवण के प्रकरण में मनन निदिध्यासन का पाठ भी नहीं है।

सु०— श्रुतिर्द्वितीया क्षमता च लिङ्गं, वाक्यं पदान्येव तु संहतानि।
सा प्रक्रिया या कथमित्यपेक्षा, स्थानं क्रमो योगवलं समाख्या॥

जिसकी व्याख्या मूल ग्रन्थ में ही ग्रन्थकार करेंगे।

मीमांसादर्शन में अङ्गत्व बोधक श्रुत्यादि प्रमाण हैं। उनमें 'निरपेक्षो रवः श्रुतिः' (निरपेक्ष शब्द को श्रुति कहते हैं) यह श्रुति प्रमाण का लक्षण है। अर्थात् द्वितीया तृतीयादि सभी कारक विभक्तियाँ अपने प्रकृत्यर्थ से सम्बन्ध रखने वाले स्वार्थ बोधन में किसी दूसरे की अपेक्षा नहीं करतीं। यथा व्रीहिभिर्यजेत' 'दध्नाजुहोति' इन दोनों (व्रीहि एवं दधि) में अङ्गत्व बोधक तृतीया श्रुति है, क्योंकि इसी से याग के प्रति व्रीहि में तथा होम के प्रति दधि में अङ्गत्व का बोध होता है। यहां शेषत्व बोधन करने में तृतीया श्रुति किसी और की अपेक्षा नहीं रखती है। इसलिये लिङ्गादि प्रमाणों की

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सु०–अपेक्षा श्रुति को प्रबल कहते हैं। क्योंकि उत्तर-उत्तर प्रमाणों के अर्थ का विप्रकर्ष होता चला जाता है, जैसे याग और होम के प्रति व्रीहि तथा दधि में अङ्गत्व बोधक श्रुति विद्यमान है। वैसे श्रवण के प्रति मननादि में अङ्गत्व बोधक तृतीयादि श्रुति है नहीं, फिर भला श्रवण के प्रति मननादि में तार्तीय शेषत्व रूप अङ्गत्व कैसे आ सकेगा ? अर्थात् नहीं आ सकता।

कदाचित् श्रुति प्रमाण के न रहने पर भी लिङ्ग प्रमाण होता, तो श्रवण का तार्तीय शेष रूप अङ्ग मनन-निदिध्यासन को मान सकते थे। अर्थ प्रकाशन सामर्थ्य को लिङ्ग कहते हैं। यथा 'बर्हिर्देवसदनंदामि।" इस मन्त्र में कुश छेदन अर्थ का प्रकाशनरूप सामर्थ्य दीखता है। यजमान को देवता के आसनादि के लिए दर्भ की आवश्यकता पड़ती है। उस दर्भ के छेदन काल में इस मन्त्र को पढ़ा जाता है, ऐसा अर्थ लिङ्ग प्रमाण से ज्ञात हो रहा है। यद्यपि दामि शब्द का अर्थ छिनद्मि होता है, वह किसी के छेदन में लग सकता है, किन्तु सामर्थ्य से देव सदन के लिए कुश छेदन काल में ही इस मन्त्र को पढ़ना चाहिये—ऐसा ज्ञात होता है।–'देवसदन के लिए छेदन करता हूँ, क्योंकि देवा सीदन्ति यस्मिन् इति देव सदनमम् अर्थात् देवताओं के आसन के लिए हे बर्हिदेव ! तुम्हारा छेदन करता हूँ। ऐसे अर्थ वाले इस मन्त्र में छेदन कर्म बोधन सामर्थ्य होने से कुशलवण रूप कर्म का अङ्गत्व अवगत हो रहा है। इसीलिये बर्हिर्देवसदनं दामि' इस मन्त्र को दर्भ लवणरूप कर्म का अङ्ग माना है। यथा इस मन्त्र में अङ्गत्व बोधक लिङ्ग प्रमाण है तथा श्रवण के प्रति मनन और निदिध्यासन में अङ्गत्व बोधक लिङ्गप्रमाण भी नहीं है। अतः तार्तीय शेषत्व रूप अङ्गत्व मनन, निदिध्यासन में नहीं है।

'परस्परान्वितस्वार्थप्रतिपादकपदानां संहतिर्वाक्यम्' (परस्पर अन्वित स्वार्थ प्रतिपादक पदों के संघात को वाक्य कहते हैं।) यही वाक्य प्रमाण का लक्षण है। यथा 'अग्निष्टोमे प्रवृणक्ति' (अग्निष्टोम में प्रवर्ग्य नामक कर्म करे)। इस वाक्य में दूसरे देश में पढ़े गए प्रवर्ग्यनामक कर्म की अंगत्वबोधकता कही गयी है। प्रवर्ग्यकर्म दूसरे प्रदेश में पढ़े गये हैं। उसी कर्म का बोधन अग्निष्टोम में यह वाक्य करा रहा है। अतः यह वाक्य अङ्गत्व का बोधक है–ऐसे ही श्रवण का अनुवाद कर मनन–निदिध्यासन में विनियोग बतलाने वाला कोई क्रम तो है नहीं, फिर वाक्य प्रमाण से श्रवण के प्रति मनन निदिध्यासन में तार्तीय शेषत्व रूप अङ्गत्व कैसे मानें ?

'सा प्रक्रिया या कथमित्यपेक्षा' कथमिति आकांक्षा को प्रक्रिया (प्रकरण) कहते हैं। यथा 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इस वाक्य से प्रधान याग

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

ननु द्रष्टव्य इति दर्शनानुवादेन श्रवणे विहिते सति फलवत्तया श्रवणप्रकरणे तत्सन्निधावाम्नातयोर्मननिदिध्यासनयोः प्रयाजन्यायेन प्रकरणादेवाङ्गतेति चेत्। न। 'ते ध्यानयोगानुगता अपश्यन्' इत्यादिश्रुत्यन्तरे ध्यानस्य दर्शनसाधनत्वेनावगतस्याङ्गाकाङ्क्षायां प्रयाजन्यायेन श्रवणमननयोरेवाङ्गतापत्तेः। क्रमसमाख्ये च दूरनिरस्ते।

प्रकरणाभावो नास्तीति शङ्कते—नन्विति। अविशेषेण साधनतया श्रूयमाणेषु श्रवणादिषु किं प्रधानं साधनमित्याकाङ्क्षायां श्रुत्यन्तरबलान्निदिध्यासनस्यैव प्रधानत्वापत्त्या श्रवणस्य प्रकरणित्वासिद्धिरित्याह—त इति।

अ०—'द्रष्टव्यः' इस वाक्य से दर्शन का अनुवाद कर श्रवण का विधान होने से फलवत् श्रवण प्रकरण के सन्निधि में पढ़े गये मनन एवं निदिध्यासन में प्रयाजन्यायेन प्रकरण प्रमाण से ही अङ्गता का बोध हो जायगा ? ऐसा कहना ठीक नहीं, (क्योंकि ध्यान योग में लगे हुए उन ऋषियों ने देवात्म शक्ति को देखा,) इत्यादि दूसरी श्रुति में दर्शन के साधन रूप से ध्यान ही अवगत हो रहा हैं। उसमें अङ्ग की आकांक्षा होने पर प्रयाज न्याय से श्रवण एवं मनन में ही अङ्गता आने लगेगी। क्रम और समाख्या तो यहां पर दूर ही निरस्त है।

सु०—दर्शादि के विधान के बाद कथं कुर्यात् (कैसेकरे) ? ऐसी आकांक्षा होने पर प्रकरण प्रमाण से समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजति" इत्यादि प्रयाजादि में दर्श पौर्णमास के प्रति अङ्गत्व बतलाया जाता है। जिसप्रकार प्रकरण प्रमाण से प्रयाजादि में दर्श के प्रति अङ्गत्व का बोध होता है। वैसा मनन निदिध्यासन में श्रवण के प्रति अङ्गत्व बोधक प्रकरण प्रमाण नहीं है।

'फलवत्सन्निधौ अफलं तदङ्गम्" (फलवत् वाक्य के प्रकरण में फलशून्य अर्थ का प्रतिपादक वाक्य उसका अङ्ग हो जाता है। अतः स्वर्ग फल के साधन रूप से दर्शपौर्णमास का विधान हो जाने के बाद उस प्रकरण में पढ़े गये प्रयाजादि दर्शपौर्णमास के अङ्ग हो जाते हैं। वैसे ही दर्शन रूप फल के उद्देश्य से श्रवण का विधान किया गया है। इसलिये श्रवण तो आत्म दर्शन रूप फलवाला है। उसी श्रवण के प्रकरण में उसके पास ही मनन और निदिध्यासन का भी पाठ किया गया है। अतः 'फलवत् सन्निधौ अफलं तदङ्गम्' इस न्याय से फलवत् श्रवण का फलशून्य मनन निदिध्यासन प्रयाज न्याय से ही प्रकरण प्रमाण द्वारा अङ्ग हो जायगा ? ऐसा कहना ठीक नहीं, क्योंकि

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

किञ्च प्रयाजादावङ्गत्वविचारः सप्रयोजनः। पूर्वपक्षे विकृतिषु न प्रयाजाद्यनुष्ठानम्, सिद्धान्ते तु तत्रापि तदनुष्ठानमिति। प्रकृते तु श्रवणं न कस्यचित्प्रकृतिः, येन मनननिदिध्यासनयोस्तत्राप्यनुष्ठानमङ्गत्व-विचारफलं भवेत्। तस्मान्न तार्तीयशेषत्वं मनननिदिध्यासनयोः। किन्तु यथा घटादिकार्ये मृत्पिण्डादीनां प्रधानकारणता, चक्रादीनां सहकारिकारणतेति प्राधान्याप्राधान्यव्यपदेशः, तथा श्रवणमनननिदि-ध्यासनानामपीति मन्तव्यम्।

नन्वस्यां श्रुतावात्मदर्शनानन्तरं विधीयमानं श्रवणमेव प्रकरणि श्रुत्यन्तरस्यै-तदनुसारिव्याख्यानसम्भवादित्याशङ्क्याह—किञ्चेति। विकृतिषु—सौर्यादिषु।

अ०—इसके अतिरिक्त प्रयाजादि में अङ्गत्व का विचार सप्रयोजन है। वहां पर पूर्वपक्ष में विकृति यागों में प्रयाजादि का अनुष्ठान नहीं कहा गया है और सिद्धान्त पक्ष में विकृति याग में भी प्रयाजादि का अनुष्ठान कहा गया है। अतः प्रयाजादि में अङ्गत्व विचार का प्रयोजन है। प्रकृत में श्रवण किसी की प्रकृति नहीं है। जिससे कि मनन और निदिध्यासन का उसकी विकृति में अनुष्ठान का प्रसङ्ग आवे और अङ्गत्व विचार फल का सम्भव हो सके। अतः मनन एवं निदिध्यासन में तार्तीय शेषत्व नहीं है। किन्तु जैसे घटादि कार्य के प्रति मृत्पिण्डादि में प्रधान कारणता है और चक्रादि में सहकारी कारणता है। ऐसे ही प्रधानता एवं अप्रधानता का व्यपदेश हो जाता है तथा श्रवण मनन निदिध्यासन में भी श्रवण में प्रधान कारणता एवं मनन निदिध्यासन में अप्रधान कारणता माननी चाहिये।

सु०—अन्य श्रुतियों में दर्शन के साधन रूप से निदिध्यासन रूप ध्यान का विधान किया गया है। अतः ध्यान भी फल युक्त हो रहा है। उसी ध्यानके प्रति श्रवण और मनन प्रयाज न्याय से प्रकरण प्रमाण द्वारा अङ्ग होने लग जायँगे। इसलिये उक्त रीति से श्रवण का तार्तीय शेषत्व मनन, निदिध्यासन में नहीं कह सकते। क्रम तथा समाख्या रूप अङ्गता बोधक प्रमाणों की तो यहां पर सम्भावना ही नहीं है, क्योंकि 'स्थानं क्रमः' अर्थात् समान देशता को स्थान प्रमाण कहते हैं। यथा आध्वरीय काण्ड में क्रमशः आग्नेय, उपांशु, अग्नीषोमीय नामक कर्म का कथन किया गया है। याजमान काण्ड में उसके विषय के तीन मन्त्र क्रमशः पढ़े गये हैं। वहां पर स्थान प्रमाण से प्रथम मन्त्र में आग्नेय की अङ्गता है द्वितीय मन्त्र में उपांशु याग की अङ्गता है और

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सूचितं चैतद्विवरणाचार्यैः—'शक्तितात्पर्यविशिष्टशब्दावधारणं प्रमेयावगमं प्रत्यव्यवधानेन कारणं भवति, प्रमाणस्य प्रमेयावगमं प्रत्यव्यवधानात्। मनननिदिध्यासने तु चित्तस्य प्रत्यगात्मप्रवणतासंस्कारपरिनिष्पन्नतदेकाग्रवृत्तिकार्यद्वारेण ब्रह्मानुभवहेतुतां प्रतिपद्येते इति फलं प्रत्यव्यवहितकरणस्य विशिष्टशब्दावधारणस्य व्यवहिते मनननिदिध्यासने तदङ्गेऽङ्गीक्रियेते' इति।

ननु मनननिदिध्यासनयोस्तार्तीयशेषत्वं न, किं तु श्रवणसहकारित्वमितीदमेव विवरणाचार्याभिमतमिति कथं ज्ञातमित्यत आह—सूचितं चेति। क्वेत्यपेक्षायामाद्यवर्णकस्थं तद्वाक्यं पठति शक्तीत्याद्यङ्गीक्रियेते इत्यन्तम्।

अ०—विवरणाचार्य ने भी यह सूचित किया है—"शक्ति एवं तात्पर्य से विशिष्ट शाब्द ज्ञान ब्रह्मात्मैक्य रूप प्रमेय बोध में साक्षात्कारण है, क्योंकि प्रमाण, प्रमेय बोध के प्रति साक्षात् कारण माना ही जाता है। किन्तु मनन और निदिध्यासन चित्त की अन्तरात्मा में संलग्नता—संस्कार से निष्पन्न हुई एकाग्र वृत्ति को कराकर ब्रह्मबोध में कारण होते हैं।"

अतः फल के प्रति अव्यवहित करण, विशिष्ट शब्द ज्ञान है एवं व्यवहित होने से मनन निदिध्यासन उसके अंग माने गये हैं।

सु०—तृतीय मन्त्र में अग्नीषोमीय की अङ्गता है। वैसा यहां पर श्रवण की मनन निदिध्यासन में अङ्गता बोधक "स्थान" प्रमाण नहीं।

'योगबलं समाख्या' अर्थात् परस्पर अन्वित अवयव अर्थ की प्रतिपादकता को समाख्या कहते हैं। यथा 'आध्वर्यवम्, हौत्रम्, औदगात्रम्' इत्यादि में अध्वर्यु से करने योग्य कर्म को आध्वर्यवम्, होता से करने योग्य कर्म को हौत्रम् तथा उद्गाता से करने योग्य कर्म को औदगात्रम् प्रकृति प्रत्यय के योग रूप बल से प्रतीत होता है। वैसा यहां पर श्रवण के प्रति मनन निदिध्यासन में अङ्गत्व बोधक समाख्या रूप प्रमाण भी नहीं है। अतः अङ्गता बोधक एक भी प्रमाण न होने के कारण श्रवण के प्रति मनन तथा निदिध्यासन में तार्तीय शेषत्व रूप अङ्गता नहीं है।

प्रयाजादि दर्शपौर्णमास के अङ्ग हैं या नहीं? इस विचार का तो फल है, क्योंकि पूर्वपक्षी को विकृति याग में प्रयाजादि का अनुष्ठान इष्ट नहीं है। यदि प्रयाजादि दर्श पौर्णमास के अङ्ग न होते, तो दर्शपौर्णमास की विकृति याग में उनके अनुष्ठान का कोई प्रश्न ही नहीं बनता। अतः प्रयाजादि

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

श्रवणादिषु च मुमुक्षूणामधिकारः, काम्ये कर्मणि फलकामस्याधिकारित्वात्। मुमुक्षायां च नित्यानित्यवस्तुविवेकस्येहामुत्रार्थफलभोगविरागस्य शमदमोपरतितितिक्षासमाधानश्रद्धानां च विनियोगः।

श्रवणादौ कस्याधिकार इत्यपेक्षायामाह—श्रवणादिष्विति। मोक्षरूपफलकामनया क्रियमाणश्रवणादिकमपि काम्यमिति भावः। नित्यानित्ययोरात्मानात्मवस्तुनोर्विवेकस्य, नित्यानित्ययोर्वसतीति नित्यानित्यवस्तु तयोर्नित्यत्वानित्यत्वधर्मयोर्वा विवेकस्य।

अ०—श्रवणादि में मुमुक्षुओं का अधिकार है, क्योंकि सकाम कर्म में फलाभिलाषी को अधिकारी माना है। मोक्ष की इच्छा रूप मुमुक्षा में नित्यानित्य वस्तु का विवेक, इस लोक और परलोक के सभी भोगों में विराग, शमदम, उपरति-तितिक्षा-समाधान और श्रद्धा का विनियोग हो जाता है।

सु०—में अङ्गत्वका विचार सप्रयोजन है. किन्तु श्रवणादि के प्रसङ्ग में श्रवण प्रकृति हो और श्रवण की कोई विकृति हो, ऐसी बात नहीं है। फिर मनन निदिध्यासन में अङ्गत्व विचार का कोई फल ही नहीं है। अतः मनन एवं निदिध्यासन में तार्तीय शेषत्व नहीं है, अपितु आत्मदर्शन में श्रवण प्रधान है और मनन निदिध्यासन अप्रधान होने से उसके अङ्ग हैं, बस इतना मात्र ही अभीष्ट है।

जैसे सर्वत्र प्रमेय ज्ञान में प्रमाण साक्षात् कारण होता है और शेष सहकारी कारण होते हैं। वैसे ही वेदान्त के प्रमेय (ब्रह्मात्मैक्य) बोध में शक्ति तात्पर्यादिविशिष्ट शब्द ज्ञान साक्षात् कारण है, एवं मनन निदिध्यासन उसके अङ्ग हैं, क्योंकि ब्रह्मानुभव में चित्त की एकाग्रवृत्ति भी अपेक्षित है। तदर्थ अपेक्षित होनेसे मनन तथा निदिध्यासन को श्रवण का अङ्ग माना है।

साधन चतुष्टय का निरूपण

जैसे सकाम कर्ममें तत्फलाभिलाषीका अधिकार कहा गया है—ऐसे ही मोक्षरूप फल के साधन श्रवणादि में भी मोक्षाभिलाषी (मुमुक्षु) का अधिकार है। मुमुक्षा में शमादि षट्सम्पत्ति भी आवश्यक है, इनके अभाव में मुमुक्षा ही नहीं हो सकती। कदाचित् मन्द मुमुक्षा हो भी जाय, तो श्रवणादि में दृढ़ता से प्रवृत्ति नहीं होगी। अतः इन साधनों की दृढ़ता पर ही मुमुक्षा का दार्ढ्य आधारित है और तभी दृढ़ता पूर्वक वेदान्त के श्रवणादि हो सकते हैं।

श्रवणादि को छोड़कर अधिकार के अनुपयुक्त विषयों से मन का

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अन्तरिन्द्रियनिग्रहः शमः। बहिरिन्द्रियनिग्रहो दमः। विक्षेपाभाव उपरतिः। शीतोष्णादिद्वन्द्वसहनं तितिक्षा। चित्तैकाग्र्यं समाधानम्। गुरुवेदान्तवाक्ये विश्वासः श्रद्धा। अत्रोपरमशब्देन संन्यासोऽभिधीयते, तथा च संन्यासिनामेव श्रवणाधिकार इति केचित्। अपरे तु उपरमशब्दस्य संन्यासवाचकत्वाभावाद्विक्षेपाभावमात्रस्य गृहस्थेष्वपि सम्भवात्, जनकादेरपिब्रह्मविचारस्यश्रूयमाणत्वात्सर्वाश्रमसाधारणं श्रवणादिविधानमित्याहुः।

शमादींल्लक्षयति—अन्तरिति। श्रवणादिव्यतिरिक्ताधिकारानुपयुक्तविषयेभ्यो मनसो निग्रहः शमस्तादृशविषयेभ्यो बहिरिन्द्रियाणां श्रोत्रादीनां निग्रहो दमः। गृहस्थादीनां श्रवणादावनधिकारं मन्यमानानां केषाञ्चित्संन्यासिनां मतमाह—अत्रेति। शमादिष्वित्यर्थः। वाचस्पतिमिश्रमतमाह—अपरे त्विति।

अ०—अन्तरिन्द्रिय के निग्रह को शम, बाह्य—इन्द्रियों के निग्रह को दम विक्षेपाभाव को उपरति, शीतोष्णादि द्वन्द्वों के सहने को तितिक्षा, चित्त की एकाग्रताको समाधान और गुरु एवं वेदान्तके वाक्यमें विश्वासको श्रद्धा कहते हैं।

यहां उपरम शब्द से संन्यास को कहा है। इसलिये कुछ लोग श्रवण में संन्यासी का ही अधिकार मानते हैं। दूसरों ने उपरम शब्द का संन्यासवाचकत्व न मानकर विक्षेपाभाव अर्थ किया है, जो गृहस्थों में भी संभव है। जनकादि का भी ब्रह्मविचार सुना जाता है। इसलिये सभी आश्रम वालों के लिये सामान्य रूप से श्रवणादि का विधान मानते हैं।

सु०—निग्रह करना शम कहलाता है। वैसे ही श्रवणादिसे भिन्न अधिकारके अनुपयोगी विषयों से श्रोत्रादि बाह्य इन्द्रियों को रोकने का नाम दम है। श्रवणादि में विक्षेपप्रद पदार्थों के अभाव को उपरति कहते हैं। वेदान्त श्रवणादि में लगे रहने पर प्रारब्धानुसार जो कुछ भी शीतोष्णादि द्वन्द्व आ जायँ, उन्हें अव्यग्र चित्त से सहते जाने को तितिक्षा कहते हैं। चित्त की लक्ष्य विषय में एकाग्रता को समाधान और आचार्य वेदान्त वाक्यों तथा परलोकादि में पूर्ण विश्वास को श्रद्धा कहते हैं। लक्ष्य में श्रद्धा हुए विना प्रवृत्ति दृढ़ नहीं होती। अतः उक्त षट्सम्पत्ति मोक्षाभिलाषी में आवश्यक है।

यदि उपरम शब्द का अर्थ संन्यास है, तब तो संन्यास भी श्रवण का आवश्यक अङ्ग होने से संन्यासी का ही वेदान्त श्रवण में अधिकार है,

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सगुणोपासनमपि चित्तैकाग्र्यद्वारा निर्विशेषब्रह्मसाक्षात्कारे हेतुः। तदुक्तम्—निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः।
ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः॥ १॥
वशीकृते मनस्येषां सगुणब्रह्मशीलनात्।
तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पनम् ॥ २॥ इति।

ननु सगुणोपासानाया अपि मुक्तिफलदातृत्वश्रवणाच्छ्रवणादिसमापादित-तत्त्वज्ञानमेव मोक्षसाधनमिति कथमित्याशङ्क्याह—सगुणेति। निदिध्यासनात्मकचित्तैकाग्र्यद्वारा, तत्र 'अन्तस्तद्धर्मोपदेशात्' (ब्र० सू० १.१.२०) इति सूत्रस्थकल्पतरुवचनमुदाहरति—तदुक्तमिति। ये मन्दाः—अकृतसगुणोपासनत्वादवशीकृतचित्ताः।

अ०—सगुण उपासना भी चित्त-एकाग्रता के द्वारा निर्विशेष निर्गुण ब्रह्म साक्षात्कार में कारण होती है। इसलिये कल्पतरुकार ने कहा है कि 'जो निर्विशेष ब्रह्म का साक्षात्कार करने में समर्थ नहीं हैं, ऐसे मन्दबुद्धि के लिए सविशेष ब्रह्म निरूपण द्वारा श्रुति अनुकम्पा कर रही है'। सगुण ब्रह्म के अभ्यास से इनका मन वशीभूत हो जाने पर उपाधि कल्पना से रहित वही निर्विशेष ब्रह्म साक्षात् प्रकट हो जाता है।

सु०—किन्तु वाचस्पतिमिश्र इत्यादि ने कहा है कि उपरम शब्दमें संन्यासवाचकत्व है नहीं और विक्षेपाभाव तो सद्गृहस्थो में भी संभव है। तभी तो जनकादि का भी ब्रह्म विचार करते हुए आख्यान श्रुतियों में सुना जाता है। अतः सभी आश्रम वालों के लिए समान रूप से श्रवणादि का विधान मानना चाहिये।

सगुणोपसनादि परम्परया मोक्ष के साधन हैं।

सगुण उपासना निर्विशेष ब्रह्म साक्षात्कार में साक्षात् साधन नहीं है। उसका साक्षात् फल चित्त की एकाग्रता है। निर्विशेष ब्रह्म साक्षात्कार में चित्त की एकाग्रता भी अपेक्षित है और चित्त की एकाग्रता सगुण उपासना से होती है। इसलिये ही सगुण उपासना को मोक्ष में परम्परा से साधन माना है। "अन्तस्तद्धर्मोपदेशात्" (ब्र० सू० १-१-२०) इस सूत्र का व्याख्यान करते समय कल्पतरुकार अकृत-सगुण-उपासना पुरुषों का चित्त वश में न होने के कारण उनके लिये सविशेष ब्रह्म की उपासना बतलाकर श्रुति के कृपा पात्र उन्हें मान रहे हैं। अतः मन्द का अर्थ गया-बीता नहीं है, किन्तु चित्त स्वाधीन न होने के कारण उन्हें मन्द कह दिया जाता है, क्योंकि सगुण ब्रह्म

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सगुणोपासकानां चाचिरादिमार्गेण ब्रह्मलोकगतानां तत्रैव श्रवणादुत्पन्नतत्त्वसाक्षात्काराणां ब्रह्मणा सह मोक्षः। कर्मिणां तु धूमादिमार्गेण पितृलोकगतानामुपभोगेन कर्मक्षये सति पूर्वकृतसुकृतदुष्कृतानुसारेण ब्रह्मादिस्थावरान्तेषु पुनरुत्पत्तिः। तथा च श्रुतिः 'रमणीयचरणा रमणीयां योनिमापद्यन्ते, कपूयचरणाः कपूयां योनिमापद्यन्ते' (छा० ५ १०-१) इति। प्रतिषिद्धानुष्ठायिनां तु रौरवादिनरकविशेषेषु तत्तत्पापोपचिततीव्रदुःखमनुभूय श्वशूकरादितिर्यग्योनिषु स्थावरादिषु चोत्पत्तिरित्यलं प्रसङ्गादागतप्रपञ्चेनेति।

ननु येषां सगुणोपासकानामत्र श्रवणाद्यभावात्साक्षात्कारो न जातस्तेषां का गतिरित्याशङ्क्याह—सगुणेति। आदिपदमहरादिसंग्राहकम्। अर्चिराद्यभिमानिदेवतोपर्यारुह्य येन मार्गेण गम्यते तेनैवमप्रेऽपीत्यर्थः। कर्मिणां तु नैवमित्याह—कर्मिणामिति। आदिपदेन रात्र्यादिसंग्रहः। ब्रह्मादीति। ब्राह्मणादिः। रमणीयं चरणमाचरणं येषां ते तथा, सुकृतकर्माणो रमणीयां योनिमापद्यन्ते ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा। कपूयं कुत्सितं चरणं येषां ते तथा, दुष्कृतकर्माणः कपूयां योनिमापद्यन्ते श्वयोनिं वा चाण्डालयोनिं वा शूद्रयोनिं वेति।

अ०- जो सगुण उपासक अर्चिरादि मार्ग से ब्रह्मलोक जाते हैं, उन्हें ब्रह्मलोक में ही श्रवणादि के द्वारा तत्त्व-साक्षात्कार हो जाता है और वे ब्रह्मा के साथ ही मुक्त हो जाते हैं।

कर्म करने वालों को धूमादि मार्ग से पितृलोक की प्राप्ति होती है और वहां के कर्मफल भोग के द्वारा नष्ट हो जाने पर पूर्वकृत पुण्यपाप के अनुसार ब्राह्मणादि से लेकर स्थावर पर्यन्त योनियों में पुनर्जन्म प्राप्त होता है। इसी को छान्दोग्य श्रुति कहती है—'रमणीय आचरण वाले रमणीय लोकों को प्राप्त होते हैं और पाप आचरण करने वाले पाप योनियों को प्राप्त होते हैं।' निषिद्ध कर्म करने वाले रौरवादि नरकों में तत्तत्पापानुरूप तीव्र दुःखों का अनुभव कर शूकरकूकरादि तिर्यक् योनि तथा स्थावर आदि योनियों में जन्म लेते हैं। अस्तु, प्रसङ्ग प्राप्त विचार समाप्त किया जाता है।

सु०—की उपासना से मन को वश में कर लेने पर, निर्विशेष ब्रह्म का साक्षात्कार वेदान्त विचार द्वारा उन्हें भी हो जाता है।

जिन सगुण उपासकों को वेदान्त श्रवणादि के अभाव से ब्रह्म का

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

निर्गुणब्रह्मसाक्षात्कारवतस्तु न लोकान्तरगमनम्, 'न तस्य प्राणा उत्क्रामन्ति' इति श्रुतेः। किन्तु यावत्प्रारब्धकर्मक्षयं सुखदुःखे अनुभूय पश्चादपव्रज्यते।

तर्हि ज्ञानप्राप्त्युत्तरक्षणे तस्य विदेहकैवल्यं स्यादित्याशङ्कते—किं त्विति। अपव्रज्यते—मुच्यते।

अ०—निर्गुण ब्रह्म का साक्षात्कार किये हुए व्यक्ति को किसी लोक में जाना नहीं पड़ता, क्योंकि 'उसके प्राण उत्क्रमण नहीं करते' यहीं पर सुख दुःख का अनुभव कर प्रारब्ध कर्मक्षय के पश्चात् वे मुक्त हो जाते हैं।

सु०—साक्षात्कार न हो सका, वे—अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः॥ [गी० ८ : ४]

—इस भगवद्वाक्यानुसार अर्चिरादि अभिमानी देवताओं के द्वारा ब्रह्मलोक में ले जाये जाते हैं। वहां वेदान्त के श्रवणादि से ब्रह्मतत्त्व का साक्षात्कार हो जाने पर कल्प के अन्त में ब्रह्मा के साथ वे भी मोक्ष प्राप्त कर लेते हैं।

केवल शास्त्रविहित कर्म करने वाले लोगों को उनके फल भोगने के लिए 'धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्' (गी० ८.२५) इस भगवद्वाक्यानुसार धूमादि अभिमानी देव के द्वारा पितृलोक (स्वर्ग) ले जाये जाते हैं। वहाँ पर नियत कर्म फल का उपभोग हो जाने के बाद अवशिष्ट पूर्वकृत पुण्य पाप के अनुसार ब्राह्मणादि शरीर में उनका जन्म होता है। वहाँ ब्रह्मा का अर्थ ब्राह्मण करना चाहिए, ब्रह्मा नहीं। ब्राह्मण, क्षत्रिय तथा वैश्य को वैदिक कर्म में अधिकार होने के कारण रमणीय योनि कहा गया है और जिनका उसमें अधिकार नहीं है, ऐसे मानव एवं कूकर शूकरादि को पापयोनि कहा है। उक्त उत्तरायण तथा दक्षिणायन मार्ग शास्त्र-विहित कर्म करने वालों के लिए ही है। पाप करने वालों को तो रौरवादि नरक विशेष में अपने नियत पापकर्म के फल तीव्र दुःखों का अनुभव कर लेने के बाद भी शूकर कूकरादि योनियों में ही जन्म लेना पड़ता है।

पूर्वोक्त मार्ग से ऊपर लोकों में जाना अथवा किसी भी शरीर में जन्म लेना अज्ञानियों के लिये कहा गया है। निर्गुण ब्रह्म के साक्षात्कार कर लेने के बाद तत्त्ववेत्ता को किसी भी लोक अथवा शरीर में जाना नहीं पड़ता और न तत्त्वज्ञान के उत्तर क्षण में विदेह कैवल्य ही प्राप्त होता है, किन्तु इषुचक्रादि में भरे हुए वेग के समान प्रारब्ध वेग शान्त हो जाने तक उन्हें भी सुखदुःख का

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

ननु 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' (मु० ३-८) इत्यादिश्रुत्या 'ज्ञानाग्निःसर्वकर्माणि भस्मसात्कुरुते तथा' (भ० गी० ४-३७) इत्यादिस्मृत्या च ज्ञानस्य सकलकर्मक्षयहेतुत्वनिश्चये सति प्रारब्धकर्मावस्थानमनुपपन्नमिति चेत्। न। 'तस्य तावदेव चिरं यावन्नविमोक्ष्येऽथ सम्पत्स्ये' (छा० ६-१४-२) इत्यादिश्रुत्या 'नाभुक्तं क्षीयते कर्म' इत्यादिस्मृत्या चोत्पादितकार्यकर्मव्यतिरिक्तानां सञ्चित-कर्मणामेव ज्ञानविनाशित्वावगमात्।

प्रारब्धकर्मावस्थानं श्रुतिस्मृतिविरुद्धमिति शङ्कते—नन्विति। आदिपदं 'तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयते एवं हास्य सर्वे पाप्मानः प्रदूयन्ते' (छा० ५-२४-३) इत्यादिश्रुतिसङ्ग्राहकम्। इतरश्रुतिस्मृत्यनुरोधात्प्रारब्धातिरिक्तकर्मणां नाश इत्याह—तस्येति। यावन्नविमोक्ष्ये प्रारब्धकर्मणो न विमोक्ष्यते। अथ—प्रारब्धकर्मविमुक्त्यनन्तरम्। सम्पत्स्ये—सम्पत्स्यते। 'विमुक्तश्च विमुच्यते' 'अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्' इत्याद्याः श्रुतिस्मृतय आदिपदादेयाः।

अ०—परावर ब्रह्म का साक्षात्कार कर लेने पर उसके कर्म नष्ट हो जाते हैं, इत्यादि श्रुति ज्ञान रूप अग्नि वैसे ही सम्पूर्ण कर्मों को भस्म कर डालती है "इत्यादि स्मृति से ज्ञान में सम्पूर्ण कर्मों की नाशकता का निश्चय हो जाने पर प्रारब्ध कर्म का शेष रह जाना अनुपपन्न है ?—ऐसा कहना ठीक नहीं क्योंकि 'उसे उतनी ही देर मोक्षप्राप्त करने में है, जब तक प्रारब्ध समाप्त नहीं हो जाती। प्रारब्ध क्षय के बाद वह मुक्त हो जाता हैं।' इत्यादि श्रुति एवं 'भोग के विना कर्म नष्ट नहीं होता' इत्यादि स्मृति से प्रारब्ध कर्म से भिन्न संचित कर्मों का ही ज्ञान से नाश होने वाला समझना चाहिये।

सु०—अनुभव करना पड़ता है प्रारब्धक्षय के बाद वे विदेह कैवल्य को प्राप्त कर लेते हैं। अतः प्रारब्धक्षय पर्यन्त तत्त्वज्ञानी जीवन्मुक्त माने जाते हैं।

जीवन्मुक्ति का निरूपण

तत्त्वज्ञान के बाद भी प्रारब्ध कर्म का शेष रहना श्रुति स्मृति सिद्ध है, क्योंकि श्रुति ने तो स्पष्ट कह दिया है, कि सर्व श्रेष्ठ ब्रह्म तत्त्व का अपरोक्ष हो जाने पर उस तत्त्वज्ञानी के कर्म नष्ट हो जाते हैं। प्रारब्ध को छोड़कर शेष कर्मनाश की बात उक्त श्रुति में है नहीं। बल्कि गीता में 'सम्पूर्ण कर्मों को ज्ञानाग्नि भस्म कर देती है,—ऐसा स्पष्ट कहा है। फिर प्रारब्ध कर्म शेष रहता

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सञ्चितं द्विविधम्—सुकृतं दुष्कृतं चेति। तथा च श्रुतिः-'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्' इति। ननु ब्रह्मज्ञानान्मूलाज्ञाननिवृत्तौ तत्कार्यप्रारब्धकर्मणोऽपि निवृत्तिः, कथं ज्ञानिनां देहधारणमुपपद्यते ? इति चेत्। न। अप्रतिबद्धज्ञानस्यैवाज्ञाननिवर्तकतया प्रारब्धकर्मरूपप्रतिबन्धकदशायामज्ञाननिवृत्तेरनङ्गीकारात्।

ननु 'एवं हास्य सर्वे पाप्मानः प्रदूयन्त' इत्यादिश्रुत्यनुसारेण सञ्चितानामपि पापकर्मणामेव नाश इति भ्रमव्युदासायाह—सञ्चितमिति। दायं—धनादिविभागम्। साधुकृत्यां—सुकृतम्। ननु श्रुत्यादावुक्तमपि प्रारम्भकर्मावस्थानं युक्तियुक्तं न भवतीति शङ्कते—नन्विति।

अ०—पुण्यपाप भेद से संचित कर्म दो प्रकार के हैं, इस विषय में श्रुति कहती है कि 'उस ब्रह्मज्ञानी के धनादि को पुत्र तथा शिष्य लेते हैं, हितैषी उसके पुण्य कर्म को और द्वेषी उसके पाप को लेते हैं।

जब ब्रह्मज्ञान से मूलाज्ञान की निवृत्ति हो जाने पर उसके कार्य प्रारब्ध कर्मों की भी निवृत्ति हो गयी, फिर ज्ञानियों का शरीर धारण कैसे सिद्ध हो सकता है ? ऐसा कहना ठीक नहीं, क्योंकि अप्रतिबद्ध ज्ञान ही अज्ञान का निवर्तक होता है। अतः प्रारब्ध कर्म रूप प्रति बन्धक दशा में अज्ञान की निवृत्ति नहीं मानी गयी है।

सु०—है और तत्त्व ज्ञान से केवल संचित कर्म का नाश होता है, ऐसे विभाग की कल्पना असंगत है ?—ऐसा कहना ठीक नहीं, यदि तत्त्व ज्ञान के बाद द्वितीय क्षण में दम घुट जाय, तब तो तत्त्वज्ञान एक बड़ा भारी रोग मानाजायगा, साथ ही तत्त्वज्ञानी कोई इस संसार में रहेगा ही नहीं, क्योंकि जिसे तत्त्वज्ञान हुआ, वह उसी समय मर गया। फिर 'समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं" 'उपदेक्ष्यन्ति तेज्ञानंज्ञानिनः तत्त्वदर्शिनः।" इत्यादि वाक्य से ब्रह्मज्ञानी के पास ब्रह्मज्ञान के लिये जिज्ञासुओं को जाने की प्रेरणा देना व्यर्थ ही होगा। 'विमुक्तश्च विमुच्यते" —इस श्रुति में तो प्रथम विमुक्त पद से जीवन्मुक्त पुरुष का ही कथन किया गया है। 'अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्" 'नाभुक्तंक्षीयते कर्म'

इत्यादि वाक्य के अनुसार प्रारब्ध कर्म का भोग के विना नाश नहीं कहा गया है। अतः ज्ञान से उन्ही संचित कर्मों का नाश होता है, जिसने अपना फल देना प्रारम्भ नहीं किया।

अन्य व्यक्ति की स्तुति, निन्दा से तज्जन्य पुण्य पाप ही होते हैं किन्तु

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

नन्वेवमपि तत्त्वज्ञानादेकस्य मुक्तौ सर्वमुक्तिः स्यात्, अविद्याया एकत्वेन तन्निवृत्तौ क्वचिदपि संसारायोगादिति चेत्। न। इष्टापत्तेरित्येके। अपरे त्वेतद्दोषपरिहाराय 'इन्द्रो मायाभिः' इति बहुवचनश्रुत्यनुगृहीतमविद्यानानात्वमङ्गीकर्तव्यमित्याहुः।

अन्ये त्वेकैवाविद्या, तस्या एवाविद्याया जीवभेदेन ब्रह्मस्वरूपावरणशक्तयो नाना। तथा च यस्य ब्रह्मज्ञानं तस्य ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाशः, न त्वन्यं प्रति ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाश इत्यभ्युपगमाद् नैकमुक्तौ सर्वमुक्तिः।

प्रतिबन्धकापगमे ज्ञानेनाज्ञाननिवृत्त्या सर्वमुक्तिप्रसङ्ग इति शङ्कते-नन्विति। अविद्यायाः—तदुपादानभूताया अज्ञानशक्तेः। इन्द्रः—परमात्मा, मायाभिः—

अविद्याभिः पुरुरूप इयते बहुरूपः प्रतीयते।

अस्मिन्पक्षे गौरवमभिप्रेत्य मतान्तरमाह—अन्ये त्विति। अस्मिन्पक्षे मायाभिरित्यस्य मायाशक्तिभिरित्यर्थः।

अ०—इस प्रकार भी तत्त्वज्ञान से एक को मुक्त होने पर सभी की मुक्ति हो जानी चाहिये, क्योंकि अविद्या एक है, उस एक अविद्या की निवृत्ति हो जाने पर कहीं भी संसार का रहना युक्ति संगत नहीं है?

इसके उत्तर में कुछ आचार्यों ने इष्टापत्ति दी है। दूसरे आचार्यों ने इस दोष को हटाने के लिए "इन्द्रो मायाभिः" यहाँ पर बहुवचन से अनुगृहीत अविद्या में नानात्व मान लेना चाहिये, ऐसा कहा है।

दूसरे आचार्यों ने तो अविद्या एक ही मानी है। उसी एक अविद्या की जीवभेद से ब्रह्म स्वरूप को ढकने वाली शक्तियां नाना हैं। अतः जिसे ब्रह्मज्ञान हो गया उसकी (ब्रह्म स्वरूप को आवरण करने वाली शक्ति से विशिष्ट) अविद्या नष्ट हो गयी। ऐसा मानने से एक की मुक्ति से सभी की मुक्ति का प्रसंग नहीं आता।

मु०—तत्त्वज्ञानी की स्तुति, निन्दा से स्तुति, निन्दा जन्य पुण्य पाप के साथ ही उसके संचित पुण्य, पाप के भी भागी स्तुति करने वाले एवं निन्दक हो जाते हैं, गृह में रहने वाले तत्त्व ज्ञानियों के धन के भागी उनके पुत्र होते हैं। और मठस्थ तत्त्ववेत्ता के धन का भागी उनकी शिष्य परम्परा मानी जाती है। शिष्य से तात्पर्य आजन्म मठस्थ (त्यक्तगृहादि) शिष्यों से है। इसीलिए मठस्थ तत्त्ववेत्ता के धनका भागी उनके आदर्शों पर चलनेवाले मठस्थ शिष्य ही हो सकते हैं।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सु०—'तत्त्वमसि' महावाक्य जन्य अपरोक्ष ब्रह्म ज्ञान से मूलाज्ञान की निवृत्ति हो जाने पर मूलाज्ञान के कार्य प्रारब्ध कर्म की भी निवृत्ति माननी ही चाहिये। फिर प्रारब्धनाश के पश्चात् ज्ञानी का शरीर बना रहता है—यह कहना कैसे युक्ति संगत हो सकेगा ? ज्ञान दो प्रकार का होता है —

१. प्रतिबन्धकरहित। २. प्रतिबन्धकसहित।

ज्ञान के फल अज्ञान की निवृत्ति में तथा मोक्ष में प्रारब्ध को प्रतिबन्धक माना है। इस प्रारब्ध प्रतिबन्धक के रहते हुए महावाक्य से उत्पन्न ज्ञान भी आवरण शक्ति नाश करके अज्ञान के कार्य विक्षेपादि प्रारब्ध कर्म को नाश नहीं कर पाता। वैसीदशा में उसे प्रतिबद्ध ज्ञान कहते हैं। जैसे मणिमन्त्रादि प्रतिबन्धक से युक्त वह्नि दाह कार्य को उत्पन्न नहीं करती। वैसे ही प्रारब्ध कर्म प्रतिबन्धक से युक्त महावाक्य जन्य ज्ञान भी अज्ञानकार्यविक्षेपादि (प्रारब्ध) को निवृत्त नहीं कर पाता। आवरण मात्र की निवृत्ति से ज्ञान का स्वरूप भी सिद्ध हो जाता है। विक्षेपादि की निवृत्ति न होने से तत्त्व ज्ञानी का शरीर धारण भी सिद्ध हो जाता है।

तत्त्वज्ञानी के प्रारब्ध कर्म रूप प्रति बन्धक की नाश दशा में तो कार्य सहित अज्ञान का नाश निश्चित है क्योंकि अविद्या एक है, उसके नाश होने पर फिर संसार का रहना असम्भव है। अतः सभी को मुक्त हो जाना चाहिये। इस विषय में कुछ आचार्यों ने इष्टापत्ति दी है और अन्य आचार्यों ने अविद्या को नाना मानकर एक की मुक्ति से सभी की मुक्ति नहीं मानी है। प्रधान जीव हिरण्यगर्भ है, अन्य सभी जीवाभास हैं। जैसे स्वप्न में एक जीव प्रधान है एवं अन्य सभी जीव आभास मात्र कल्पित हैं। प्रधान जीव को स्वप्न से उठते ही स्वप्न दृश्य सभी प्राणी नहीं दीखते। अतः एक जीववाद पक्ष में एक की मुक्तिसे सर्व की मुक्ति इष्ट ही है। नाना जीववाद पक्ष में तो प्रश्न ही नहीं बनता। वहां तो एक अविद्या के नाश से एक की मुक्ति होगी, अन्य जीव पूर्ववत् बने रहेंगे।

इन्द्र, वरुण कुबेर, यम इत्यादि आधिकारिक पुरुष माने जाते हैं। यह अधिकार ही इनकी प्रारब्ध है। इनमें से कुछ तत्त्वज्ञानी भी हैं। तत्त्वज्ञान के बाद इनका शरीर कैसे रह गया ? ऐसा प्रश्न होने पर यावदधिकरण में महर्षि बादरायण ने निर्णय दिया है, कि इनके आधार का आपादक प्रारब्ध कर्म है, उसकी समाप्ति तक ये जीवन्मुक्त आधिकारिक पुरुष अपने अधिकार पद पर आरुढ़ रहकर लोक व्यवस्था का काम किया करते हैं। अधिकार समाप्त होते हीं विदेह कैवल्य प्राप्त कर लेते हैं। यह अधिकार तत्त्वज्ञान से नहीं मिला है, किन्तु उपासना की सिद्धि से सन्तुष्ट होकर सर्वजगन्नियन्ता परमेश्वर ने इन्हें

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अत एव 'यावदधिकारमवस्थितिराधिकारिकाणाम्' (ब्र० सू० ३-१-३२) इत्यस्मिन्नधिकरणेऽधिकारिपुरुषाणामुत्पन्नतत्त्वज्ञानानामिन्द्रादीनां देहधारणानुपपत्तिमाशङ्क्याधिकारापादकप्रारब्धकर्मसमाप्त्यनन्तरं विदेहकैवल्यमिति सिद्धान्तितम्।

तदुक्तमाचार्यवाचस्पतिमिश्रैः—

उपासनादिसंसिद्धितोषितेश्वरचोदितम्।
अधिकारं समाप्यैते प्रविशन्ति परं पदम्॥ इति।

एतच्चैकमुक्तौ सर्वमुक्तिरिति पक्षे नोपपद्यते। तस्मादेकाविद्यापक्षेऽपि प्रतिजीवमावरणभेदोपगमेन व्यवस्थोपपादनीया। तदेवं ब्रह्मज्ञानान्मोक्षः, स चानर्थनिवृत्तिर्निरतिशयब्रह्मानन्दावाप्तिश्चेति सिद्धं प्रयोजनम्।

इति श्रीधर्मराजदीक्षितविरचितायां वेदान्तपरिभाषायामष्टमः परिच्छेदः समाप्तः॥ ८॥

कैः सिद्धान्तितमित्यपेक्षायामाह—तदुक्तमिति। इदमेव मतं सम्यगिति द्योतनायाह—एतच्चेति। यस्मादेवं तस्माद्।
व्यवस्था—बद्धमुक्तव्यवस्था। परिच्छेदार्थं निगमयति—तदेवमिति।

अ०—इसलिये "अधिकारी जीवों की अधिकार पर्यन्त स्थिति बनी रहती है" इस बात को यावदधिकरण में उत्पन्न तत्त्वज्ञान-इन्द्रादि-आधिकारिक पुरुषों के शरीर धारण की अनुपपत्ति विषयक आशंका करके अधिकार के आपादक प्रारब्ध कर्म की समाप्ति के बाद ही विदेह कैवल्य की प्राप्ति होती है, ऐसा सिद्धान्त किया गया है इसी बात को आचार्य वाचस्पति मिश्र कहते हैं—"उपासनादि की पूर्ण सिद्धि से सन्तुष्ट हुए ईश्वर के द्वारा प्राप्त अधिकार को समाप्त कर ये इन्द्रादि अधिकारि तत्त्ववेत्ता परमपद में प्रवेश कर जाते हैं।

एक की मुक्ति होने पर सभी की मुक्ति हो जाती है "इस पक्ष में पूर्वोक्त बात संघटित नहीं होती। अतः एक अविद्या पक्षमें भी प्रतिजीव आवरणभेद मान कर ही व्यवस्था का उपपादन किया गया है। इस रीति से ब्रह्म ज्ञानके द्वारा मोक्ष मिलता है, वह मोक्ष सम्पूर्ण अनर्थों की निवृत्ति और निरतिशय ब्रह्मानन्द की प्राप्ति स्वरूप है। यह वेदान्त शास्त्र का प्रयोजन सिद्ध हुआ।

सु०—दिया है। सभी तत्त्वज्ञानी अधिकारी नहीं होते और सभी अधिकारी तत्त्वज्ञानी नहीं होते। दोनों बात कहीं-कहीं हुआ करती हैं। अतः तत्त्वज्ञानसे उत्तर

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

मूलकृत्सूनुनाऽत्यक्तम्परित्यक्तं च विस्फुटम् ।
व्याख्यातं दूषितं तेन मयेदं च विभूषितम् ॥ १ ॥
गोचारेडनकेडिरेडभिनुतो गोत्रात्मजेडाखिलेड्,
व्याडेडाप्ततनुः कर्वाड्नगतद्विट् चण्डभेरुण्डहा ।
गोराटछुद्धधियाधिकत्विडमलक्षीरोत्थविभ्राड्जनः,
स स्यादभ्ररुडभ्रवाडभिदुरं देवो दृढो मे मृडः ॥ २ ॥
स्वजनवदनचारी पापसंघापहारी
स्वजनवदनकारी प्रोल्लसद्गात्रधारी ।
विकचरदनसारी ज्योत्स्निकाऽऽनन्दकारी,
मदनसुषमकारी सोऽस्तु मे हृद्विहारी ॥ ३ ॥
गोत्राङ्गवसुतारेशमिते (१८६७) संवत्सरे सुभे ।
फाल्गुने सितसप्तम्यां वृषे सिद्धा गुरावियम् ॥ ४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिसूरिसुतशिवदत्तकृतायां वेदान्तपरिभाषाऽर्थदीपिकायामष्टमः परिच्छेदः ॥ ८ ॥

सु०—क्षण में शरीर नाश प्रसङ्ग का उत्तर महर्षि बादरायण ने भी दे दिया है, कि प्रारब्ध क्षय के बाद विदेह कैवल्य होता है और प्रारब्ध कर्म का भोग से ही नाश होता है ।

कुछ आचार्यों ने एक की मुक्ति से सब की मुक्ति मान रक्खी है, किन्तु बादरायण के पूर्वोक्त सिद्धान्त से एक की मुक्ति में सर्व-मुक्ति समुचित प्रतीत नहीं होती ! अतः जो लोग अविद्या एक मानते हैं, उन्हें भी प्रति जीव आवरण भेद मान कर ही बन्ध, मोक्ष की व्यवस्था देनी पड़ती है । इसलिये अविद्या नाना अथवा अविद्या एक मानकर उसकी आवरण शक्ति नाना पक्ष में भी कोई विशेष भेद नहीं है । हां ! एक अविद्या मान कर ब्रह्मज्ञान से एक को मुक्त होते ही सभी मुक्त हो जायगें । यह सिद्धान्त समीचीन प्रतीत नहीं होता । सर्वत्र ब्रह्मज्ञान से मोक्ष होता है, यही वेदान्त शास्त्र का प्रयोजन है ।

इस प्रकार वेदान्तपरिभाषान्तर्गत प्रयोजन परिच्छेद की श्री विद्यानन्द जिज्ञासु विरचित सानुवाद सुबोधिनी व्याख्या समाप्त हुई ॥८॥

श्रीशङ्करः प्रीयताम् ।

॥ समाप्तोऽयं ग्रन्थः ॥

—०❀०—

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

* श्री दक्षिणामूर्त्तये नमः *

श्रीमद्धर्मराजाध्वरीन्द्रप्रणीता ।

वेदान्तपरिभाषा

प्रत्यक्षपरिच्छेदः १

यदविद्याविलासेन भूतभौतिकसृष्टयः ॥
तं नौमि परमात्मानं सच्चिदानन्दविग्रहम् ॥ १ ॥
यदन्तेवासिपञ्चास्यैर्निरस्ता भेदिवारणाः ॥
तं प्रणौमि नृसिंहाख्यं यतीन्द्रं परमं गुरुम् ॥ २ ॥
श्रीमद्वेङ्कटनाथाख्यान् वेलांगुडिनिवासिनः ॥
जगद्गुरूनहं वन्दे सर्वतन्त्रप्रवर्त्तकान् ॥ ३ ॥
येन चिन्तामणौ टीका दशटीकाविभञ्जिनी ॥
तर्कचूडामणिर्नाम कृता विद्वन्मनोरमा ॥ ४ ॥
तेन बोधाय मन्दानां वेदान्तार्थावलम्बिनी ॥
धर्मराजाध्वरीन्द्रेण परिभाषा वितन्यते ॥ ५ ॥

इह खलु धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः 'न स पुनरावर्त्तते' (छा० ८-१५-१) इति श्रुत्या तस्य नित्यत्वावगमात् । इतरेषां त्रयाणां प्रत्यक्षेण, 'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते' (छा० ८-१-६) इत्यादिश्रुत्या चानित्यत्वावगमात् । स च ब्रह्मज्ञानात् इति ब्रह्म तज्ज्ञानं तत्प्रमाणं च सप्रपञ्चं निरूप्यते ॥

तत्र प्रमाकरणं प्रमाणम् । तत्र स्मृतिव्यावृत्तं प्रमात्वं, अनधिगताबाधित-विषयज्ञानत्वम् । स्मृतिसाधारणं त्वबाधितविषयज्ञानत्वम् । नीरूपस्यापि कालस्ये-न्द्रियवेद्यत्वाभ्युपगमेन धारावाहिकबुद्धेरपि पूर्वपूर्वज्ञानाविषयतत्तत्क्षणविशेषविष-यकत्वेन न तत्राव्याप्तिः ॥

किञ्च सिद्धान्ते धारावाहिकबुद्धिस्थले न ज्ञानभेदः, किन्तु यावद्घटस्फुरणं तावत् घटाकारान्तःकरणवृत्तिरेकैव, न तु नाना, वृत्तेः स्वविरोधिवृत्त्युत्पत्तिपर्यन्तं स्थायित्वाभ्युपगमात् । तथा च तत्प्रतिफलितचैतन्यरूपं घटादिज्ञानमपि तत्र तावत्कालीनमेकमेवेति नाव्याप्तिशङ्काऽपि ॥

ननु सिद्धान्ते घटादेर्मिथ्यात्वेन बाधितत्वात्तज्ज्ञानं कथं प्रमाणम् ? उच्यते—ब्रह्मसाक्षात्कारानन्तरं हि घटादीनां बाधः; 'यत्र त्वस्य सर्वमात्मैवाभूत

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तत्केन कं पश्येत्' (बृ० ४-५-१५) इति श्रुतेः, न तु संसारदशायां बाधः, 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' (बृ० ४-५-१५) इति श्रुतेः। तथा चाबाधितपदेन संसारदशायामबाधितत्वं विवक्षितमिति न घटादिप्रमायाम-व्याप्तिः। तदुक्तम्—

देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः।
लौकिकं तद्वदेवेदं प्रमाणं त्वाऽऽत्मनिश्चयात् ॥ १ ॥ आ आत्मनिश्चयाद् ब्रह्मसाक्षात्कारपर्यन्तमित्यर्थः। लौकिकमिति घटादिज्ञानमित्यर्थः ॥

तानि च प्रमाणानि षट्, प्रत्यक्षानुमानोपमानागमार्थापत्त्यनुपलब्धिभेदात्। तत्र प्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणम्। प्रत्यक्षप्रमा चात्र चैतन्यमेव 'यत्साक्षादपरोक्षाद्ब्रह्म' (बृ-३-४-१) इति श्रुतेः। अपरोक्षादित्यस्यापरोक्ष-मित्यर्थः। ननु चैतन्यमनादि तत्कथं चक्षुरादेस्तत्करणत्वेन प्रमाणत्वमिति ? उच्यते—चैतन्यस्यानादित्वेऽपि तदभिव्यञ्जकान्तःकरणवृत्तिरिन्द्रियसन्निकर्षादिना जायते इति वृत्तिविशिष्टं चैतन्यमादिमदित्युच्यते। ज्ञानावच्छेदकत्वाच्च वृत्तौ ज्ञानत्वोपचारः। तदुक्तं विवरणे—अन्तःकरणवृत्तौ ज्ञानत्वोपचारात्' इति ॥

ननु निरवयवस्यान्तःकरणस्य परिणामात्मिका वृत्तिः कथम् ? इत्थम्—न तावदन्तःकरणं निरवयवं, सादिद्रव्यत्वेन सावयवत्वात्। सादित्वं च 'तन्मनोऽ-सृजत' इत्यादिश्रुतेः। वृत्तिरूपज्ञानस्य मनोधर्मत्वे च 'कामः सङ्कल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' (बृ०-१-५-३) इति श्रुतिर्मानम्। धीशब्देन वृत्तिरूपज्ञानाभिधानात्। अत एव कामादेरपि मनो-धर्मत्वम् ॥

ननु कामादेरन्तःकरणधर्मत्वेऽहमिच्छाम्यहं जानाम्यहं बिभेमीत्याद्यनुभव आत्मधर्मत्वमवगाहमानः कथमुपपद्यते ? उच्यते—अयःपिण्डस्य दग्धृत्वाभावेऽपि दग्धृत्वाश्रयवह्नितादात्म्याध्यासात् यथा अयो दहतीति व्यवहारस्तथा सुखाद्या-कारपरिणाम्यन्तःकरणैक्याध्यासात् अहं सुखी दुःखीत्यादिव्यवहारः ॥

नन्वन्तःकरणस्येन्द्रियतयाऽतीन्द्रियत्वात् कथमहमिति प्रत्यक्षविषयतेति ? उच्यते—न तावदन्तःकरणमिन्द्रियमित्यत्र मानमस्ति। 'मनः षष्ठानीन्द्रियाणि' इति भगवद्गीतावचनं प्रमाणमिति चेत् ? न, अनिन्द्रियेणाऽपि मनसा षट्त्व-सङ्ख्यापूरणाविरोधात्। न हीन्द्रियगतसङ्ख्यापूरणमिन्द्रियेणैवेति नियमः, 'यजमानपञ्चमा इडां भक्षयन्ति' इत्यत्र ऋत्विग्गतपञ्चत्वसङ्ख्याया अनृत्विजाऽपि यजमानेन पूरणदर्शनात्; 'वेदानध्यापयामास महाभारतपञ्चमान्' इत्यत्र वेदगतपञ्चत्वसङ्ख्याया अवेदेनापि महाभारतेन पूरणदर्शनात्; 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः' (का० १-३-१०) इत्यादिश्रुत्या मनसोऽनि-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

न्द्रियत्वावगमाच्च । न चैवं मनसोऽनिन्द्रियत्वे सुखादिप्रत्यक्षस्य साक्षात्त्वं न स्यादिन्द्रियाजन्यत्वादिति वाच्यम्; न हीन्द्रियजन्यत्वेन ज्ञानस्य साक्षात्त्वम्, अनुमित्यादेरपि मनोजन्यतया साक्षात्त्वापत्तेः, ईश्वरज्ञानस्यानिन्द्रियजन्यस्य साक्षात्त्वानापत्तेश्च ॥

सिद्धान्ते प्रत्यक्षत्वप्रयोजकं किमिति चेत्? किं ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकं पृच्छसि किं वा विषयगतस्य? आद्ये प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभेद इति ब्रूमः। तथा हि—त्रिविधं चैतन्यं प्रमातृचैतन्यं, प्रमाणचैतन्यं विषयचैतन्यं चेति। तत्र घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यम्, अन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यम्, अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम् ॥

तत्र यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान्प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते। स एव परिणामो वृत्तिरित्युच्यते। अनुमित्यादिस्थले तु नान्तःकरणस्य वह्न्यादिदेशगमनं वह्न्यादेश्चक्षुराद्यसन्निकर्षात्। तथा चायं घट इत्यादिप्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकत्र देशे समवधानात्तदुभयावच्छिन्नं चैतन्यमेकमेव, विभाजकयोरप्यन्तःकरणवृत्तिघटादिविषययोरेकदेशस्थत्वेन भेदाजनकत्वात्। अत एव मठान्तर्वर्तिघटावच्छिन्नाकाशो न मठावच्छिन्नाकाशाद्भिद्यते। तथा चायं घट इति घटप्रत्यक्षस्थले घटाकारवृत्तेर्घटसंयोगितया घटावच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य चाभिन्नतया तत्र घटज्ञानस्य घटांशे प्रत्यक्षत्वम्। सुखाद्यवच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य च नियमेनैकदेशस्थितोपाधिद्वयावच्छिन्नत्वात् नियमेनाहं सुखीत्यादिज्ञानस्य प्रत्यक्षत्वम्। नन्वेवं स्ववृत्तिसुखादिस्मरणस्यापि सुखाद्यंशे प्रत्यक्षत्वापत्तिरिति चेन्न। तत्र स्मर्यमाणसुखस्यातीतत्वेन स्मृतिरूपान्तःकरणवृत्तेर्वर्तमानत्वेन तत्रोपाध्योर्भिन्नकालीनतया तत्तदवच्छिन्नचैतन्योर्भेदात्। उपाध्योरेकदेशस्थत्वे सत्येककालीनत्वस्यैवोपधेयाभेदप्रयोजकत्वात्।

यदि चैकदेशस्थत्वमात्रमुपधेयाभेदप्रयोजकं तदा अहं पूर्वं सुखीत्यादिस्मृतावतिव्याप्तिवारणाय वर्तमानत्वं विषयविशेषणं देयम्। नन्वेवमपि स्वकीयधर्माधर्मौ वर्तमानौ यदा शब्दादिना ज्ञायेते तदा तादृशशब्दज्ञानादावतिव्याप्तिः, तत्र धर्माद्यवच्छिन्नतद्वृत्त्यवच्छिन्नचैतन्ययोरेकत्वादिति चेन्न, योग्यत्वस्यापि विषयविशेषणत्वात्। अन्तःकरणधर्मत्वाविशेषेऽपि किञ्चिदयोग्यं किञ्चिद्योग्यमित्यत्र फलबलकल्प्यः स्वभाव एव शरणम्, अन्यथा न्यायमतेऽप्यात्मधर्मत्वाविशेषात् सुखादिवद्धर्मादेरपि प्रत्यक्षत्वापत्तिर्दुर्वारा ॥

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

न चैवमपि वर्तमानतादशायां त्वं सुखीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षता स्यादिति वाच्यम्, इष्टत्वात्। 'दशमस्त्वमसि' इत्यादौ सन्निकृष्टविषये शब्दादप्यपरोक्षज्ञानाभ्युपगमात्। अत एव पर्वतो वह्निमानित्यादिज्ञानमपि वह्न्यंशे परोक्षं पर्वतांशेऽपरोक्षम्। पर्वताद्यवच्छिन्नचैतन्यस्य बहिर्निःसृतान्तःकरणवृत्त्यवच्छिन्नचैतन्याभेदात्। वह्न्यंशे त्वन्तःकरणवृत्तिनिर्गमनासम्भवेन वह्न्यवच्छिन्नचैतन्यस्य प्रमाणचैतन्यस्य च परस्परं भेदात्। तथा चानुभवः 'पर्वतं पश्यामि वह्निमनुमिनोमीति'॥

न्यायमते तु पर्वतमनुमिनोमीत्यनुव्यवसायापत्तिः। असन्निकृष्टपक्षकानुमितौ तु सर्वांशेऽपि ज्ञानं परोक्षम्। सुरभिचन्दनमित्यादिज्ञानमपि चन्दनखण्डांशे अपरोक्षं सौरभांशे तु परोक्षं सौरभ्यस्य चक्षुरिन्द्रियायोग्यतया योग्यत्वघटितस्य निरुक्तलक्षणस्याभावात्॥

न चैवमेकत्र ज्ञाने परोक्षत्वापरोक्षत्वयोरभ्युपगमे तयोर्जातित्वं न स्यादिति वाच्यम्, इष्टत्वात्। जातित्वोपाधित्वपरिभाषायाः सकलप्रमाणागोचरतया अप्रामाणिकत्वात्। घटोऽयमित्यादि प्रत्यक्षं हि घटत्वादिशब्दावे मानं न तु तस्य जातित्वेऽपि॥

जातित्वरूपसाध्याप्रसिद्धौ तत्साधकानुमानस्याप्यनवकाशात्। समवायासिद्ध्या ब्रह्मभिन्ननिखिलप्रपञ्चस्यानित्यतया च नित्यत्वसमवेतत्वघटितजातित्वस्य घटत्वादावसिद्धेश्च। एवमेवोपाधित्वमपि निरसनीयम्॥

पर्वतो वह्निमानित्यादौ च पर्वतांशे वह्न्यंशे चान्तःकरणवृत्तिभेदाङ्गीकारेण तत्तद्वृत्त्यवच्छेदकभेदेन परोक्षत्वापरोक्षत्वयोरेकत्र चैतन्येवृत्तौ न विरोधः। तथा च तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तदाकारवृत्त्यवच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वम्॥

घटादेर्विषयस्य प्रत्यक्षत्वं तु प्रमात्रभिन्नत्वम्। ननु कथं घटादेरन्तःकरणावच्छिन्नचैतन्याभेदः? अहमिमं पश्यामि इति भेदानुभवविरोधादिति चेत्? उच्यते—प्रमात्रभेदो नाम न तदैक्यम्, किन्तु प्रमातृसत्ताऽतिरिक्तसत्ताकत्वाभावः। तथा च घटादेः स्वावच्छिन्नचैतन्येऽध्यस्ततया विषयचैतन्यसत्तैव घटादिसत्ता, अधिष्ठानसत्ताऽतिरिक्ताया आरोपितसत्ताया अनङ्गीकारात्। विषयचैतन्यञ्च पूर्वोक्तप्रकारेण प्रमातृचैतन्यमेवेति प्रमातृचैतन्यस्यैव घटाद्यधिष्ठानतया प्रमातृसत्तैव घटादिसत्ता नान्येति सिद्धं घटादेरपरोक्षत्वम्॥

अनुमित्यादिस्थले त्वन्तःकरणस्य वह्न्यादिदेशनिर्गमनाभावे वह्न्यवच्छिन्न-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

चैतन्यस्य प्रमातृचैतन्यानात्मकतया वह्न्यादिसत्ता प्रमातृसत्तातो भिन्नेति नातिव्याप्तिः।

नन्वेवमपि धर्माधर्मादिगोचरानुमित्यादिस्थले धर्माधर्मयोः प्रत्यक्षत्वापत्तिः, धर्माद्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्याभिन्नतया धर्मादिसत्तायाः प्रमातृसत्तानतिरेकादिति चेत्? न, योग्यत्वस्यापि विषयविशेषणत्वात्॥

नन्वेवमपि रूपी घट इति प्रत्यक्षस्थले घटगतपरिमाणादेः प्रत्यक्षत्वापत्तिः, रूपावच्छिन्नचैतन्यस्य परिमाणाद्यवच्छिन्नचैतन्यस्य चैकतया रूपावच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेदे परिमाणाद्यवच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नतया परिमाणादिसत्तायाः प्रमातृसत्ताऽतिरिक्तत्वाभावादिति चेत्? न, तत्तदाकारवृत्त्युपहितत्वस्यापि प्रमातृविशेषणत्वात्। रूपाकारवृत्तिदशायां परिमाणाद्याकारवृत्त्यभावेन परिमाणाद्याकारवृत्त्युपहितप्रमातृचैतन्याभिन्नसत्ताकत्वाभावेनातिव्याप्त्यभावात्॥

नन्वेवं वृत्तावव्याप्तिः, अनवस्थाभिया वृत्तिगोचरवृत्त्यनङ्गीकारेण तत्र स्वाकारवृत्त्युपहितत्वघटितोक्तलक्षणाभावादिति चेत्? न, अनवस्थाभिया वृत्तेर्वृत्त्यन्तराविषयत्वेऽपि स्वविषयत्वाभ्युपगमेन स्वविषयवृत्त्युपहितप्रमातृचैतन्याभिन्नसत्ताकत्वस्य तत्रापि भावात्। एवं चान्तःकरणतद्धर्मादीनां केवलसाक्षिविषयत्वेऽपि तत्तदाकारवृत्त्यभ्युपगमेन उक्तलक्षणस्य तत्रापि सत्त्वान्नाव्याप्तिः॥

न चान्तःकरणतद्धर्मादीनां वृत्तिविषयत्वाभ्युपगमे केवलसाक्षिविषयत्वाभ्युपगमविरोध इति वाच्यम्, न हि वृत्तिं विना साक्षिविषयत्वं केवलसाक्षिवेद्यत्वं किन्त्विन्द्रियानुमानादिप्रमाणव्यापारमन्तरेण साक्षिविषयत्वम्। अत एवाहंकारटीकायामाचार्यैरहमाकारान्तःकरणवृत्तिरङ्गीकृता, अत एव च प्रातिभासिकरजतस्थले रजताकारांविद्यावृत्तिः साम्प्रदायिकैरङ्गीकृता। तथा चान्तःकरणतद्धर्मादिषु केवलसाक्षिवेद्येषु वृत्त्युपहितत्वघटितलक्षणस्य सत्त्वान्नाव्याप्तिः॥

तदयं निर्गलितोऽर्थः, स्वाकारवृत्त्युपहितप्रमातृचैतन्यसत्ताऽतिरिक्तसत्ताकत्वशून्यत्वे सति योग्यत्वं विषयस्य प्रत्यक्षत्वम्। तत्र संयोगसंयुक्ततादात्म्यादीनां सन्निकर्षाणां चैतन्याभिव्यञ्जकवृत्तिजनने विनियोगः।

सा च वृत्तिश्चतुर्विधा संशयो, निश्चयो, गर्वः, स्मरणमिति। एवंविधवृत्तिभेदेन एकमप्यन्तःकरणं मन इति, बुद्धिरिति, अहङ्कार इति, चित्तमिति व्याख्यायते। तदुक्तम्—मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम्।

संशयो निश्चयो गर्वः स्मरणं विषया इमे॥१॥

तच्च प्रत्यक्षं द्विविधम्। सविकल्पकनिर्विकल्पकभेदात्। तत्र सविकल्पकं

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

वैशिष्ट्यावगाहिज्ञानं यथा घटमहं जानामीत्यादि ज्ञानम्। निर्विकल्पकं तु संसर्गानवगाहिज्ञानम्। यथा—सोऽयं देवदत्तः, तत्त्वमसीत्यादिवाक्यजन्यज्ञानम्॥

ननु शाब्दमिदं ज्ञानं न प्रत्यक्षमिन्द्रियाजन्यत्वादिति चेत्? न, नहि इन्द्रियजन्यत्वं प्रत्यक्षत्वे तन्त्रं, दूषितत्वात्; किन्तु योग्यवर्तमानविषयकत्वे सति प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वमित्युक्तम्। तथा च सोऽयं देवदत्त इति वाक्यजन्यज्ञानस्य सन्निकृष्टविषयतया बहिर्निःसृतान्तःकरणवृत्त्यभ्युपगमेन देवदत्ततदाकारवृत्त्यवच्छिन्नचैतन्ययोरभेदेन सोऽयं देवदत्त इति वाक्यजन्यज्ञानस्य प्रत्यक्षत्वम्। एवं तत्त्वमसि इत्यादिवाक्यजन्यज्ञानस्यापि; तत्र प्रमातुरेव विषयतया तदुभयाभेदस्य सत्त्वात्।

ननु वाक्यजन्यज्ञानस्य पदार्थसंसर्गावगाहितया कथं निर्विकल्पकत्वम्? उच्यते—वाक्यजन्यज्ञानविषयत्वे हि न पदार्थसंसर्गत्वं तन्त्रम्, अनभिमतसंसर्गस्यापि वाक्यजन्यज्ञानविषयत्वापत्तेः, किन्तु तात्पर्यविषयत्वम्॥

प्रकृते च 'सदेव सोम्येदमग्र आसीत्' (छा०—६—२—१) इत्युपक्रम्य 'तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' (छा०—६—८—७) इत्युपसंहारे विशुद्धे ब्रह्मणि वेदान्तानां तात्पर्यमवसितमिति कथं तात्पर्याविषयसंसर्गमवबोधयेत्। इदमेव तत्त्वमस्यादिवाक्यानामखण्डार्थत्वम्, यत्संसर्गानवगाहियथार्थज्ञानजनकत्वमिति॥ तदुक्तम्—संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम्।

उक्ताऽखण्डार्थता यद्वा तत्प्रातिपदिकार्थता॥ १॥

प्रातिपदिकार्थमात्रपरत्वं वाऽखण्डार्थत्वमिति चतुर्थपादार्थः॥

तच्च प्रत्यक्षं पुनर्द्विविधं जीवसाक्षि ईश्वरसाक्षि चेति। तत्र जीवो नामान्तःकरणावच्छिन्नं चैतन्यम्; तत्साक्षि तु अंतःकरणोपहितं चैतन्यम्। अन्तःकरणस्य विशेषणत्वोपाधित्वाभ्यामनयोर्भेदः। विशेषणं च कार्यान्वयि व्यावर्तकम्। उपाधिश्च कार्यानन्वयी व्यावर्तको वर्तमानश्च। रूपविशिष्टो घटोऽनित्य इत्यत्र रूपं विशेषणम्। कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रमित्यत्र कर्णशष्कुल्युपाधिः। अयमेवोपाधिर्नैयायिकैः परिचायक इत्युच्यते॥

प्रकृते चान्तःकरणस्य जडतया विषयभासकत्वायोगेन विषयभासकचैतन्योपाधित्वम्। अयं च जीवसाक्षी प्रत्यात्मं नाना। एकत्वे मैत्रावगते चैत्रस्याप्यनुसन्धानप्रसङ्गः। ईश्वरसाक्षि तु मायोपहितं चैतन्यम्। तच्चैकम्। तदुपाधिभूतमायाया एकत्वात्। 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यादिश्रुतौ मायाभिरिति बहुवचनस्य मायागतशक्तिविशेषाभिप्रायतया मायागतसत्त्वरजस्तमोरूपगुणाभिप्रायतया वोपपत्तेः॥

'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।' (श्वे० ४।१०।) अजामेकां

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

लोहितशुक्लकृष्णां बह्वीः प्रजास्सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥' (श्वे० ४।५) 'तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते। योगी मायाममेयाय तस्मै विद्यात्मने नमः ॥ १ ॥' इत्यादि श्रुतिस्मृतिषु एकवचनबलेन लाघवानुग्रहीतेन मायाया एकत्वं निश्चीयते। ततश्च तदुपहितं चैतन्यम् ईश्वरसाक्षि, तच्चानादि तदुपाधेर्मायाया अनादित्वात्।

मायावच्छिन्नं चैतन्यं परमेश्वरः, मायाया विशेषणत्वे ईश्वरत्वमुपाधित्वे साक्षित्वमिति ईश्वरत्वसाक्षित्वयोर्भेदः, न तु धर्मिणोरीश्वरतत्साक्षिणोः ॥

स च परमेश्वर एकोऽपि स्वोपाधिभूतमायानिष्ठसत्त्वरजस्तमोगुणभेदेन ब्रह्मविष्णुमहेश्वर इत्यादिशब्दवाच्यतां लभते।

नन्वीश्वरसाक्षिणोऽनादित्वे 'तदैक्षत बहु स्यां प्रजायेय' (छा० ६।२।१) इत्यादिना सृष्टिपूर्वसमये परमेश्वरस्यागन्तुकमीक्षणमुच्यमानं कथमुपपद्यते ? उच्यते—यथा विषयेन्द्रियसन्निकर्षादिकारणवशेन जीवोपाध्यन्तःकरणस्य वृत्तिभेदा जायन्ते, तथा सृज्यमानप्राणिकर्मवशेन परमेश्वरोपाधिभूतमायाया वृत्तिविशेषा इदमिदानीं सृष्टव्यमिदमिदानीं पालयितव्यमिदमिदानीं संहर्तव्यमित्याद्याकारा जायन्ते। तासां च वृत्तीनां सादित्वात्तत्प्रतिबिम्बितं चैतन्यमपि सादीत्युच्यते। एवं साक्षिद्वैविध्येन प्रत्यक्षज्ञानद्वैविध्यम्। प्रत्यक्षत्वं च ज्ञेयगतं ज्ञप्तिगतं चेति निरूपितम् ॥

तत्र ज्ञप्तिगतप्रत्यक्षत्वस्य सामान्यलक्षणं चित्त्वमेव। पर्वतो वह्निमानित्यादावपि वह्न्याद्याकारवृत्त्युपहितचैतन्यस्य स्वात्मांशे स्वप्रकाशतया प्रत्यक्षत्वात्। तत्तद्विषयांशप्रत्यक्षत्वं तु पूर्वोक्तमेव। तस्य च भ्रान्तिरूपप्रत्यक्षे नातिव्याप्तिः, भ्रमप्रमासाधारणप्रत्यक्षत्वसामान्यनिर्वचनेन तस्यापि लक्ष्यत्वात्। यदा तु प्रत्यक्षप्रमाया एव लक्षणं वक्तव्यं तदा पूर्वोक्तलक्षणेऽबाधितत्वं विषयविशेषणं देयम्। शुक्तिरूप्यादिभ्रमस्य संसारकालीनबाधविषयप्रातिभासिकरजतादिविषयकत्वेनोक्तलक्षणाभावान्नातिव्याप्तिः ॥

ननु विसंवादिप्रवृत्त्या भ्रान्तिज्ञानसिद्धावपि तस्य प्रातिभासिकतत्कालोत्पन्नरजतादिविषयत्वे न प्रमाणम्, देशान्तरीयरजतस्य क्लृप्तस्यैव तद्विषयत्वसंभवादिति चेत् ? न, तस्यासन्निकृष्टतया प्रत्यक्षविषयत्वायोगात्। न च ज्ञानं तत्र प्रत्यासत्तिः, ज्ञानस्य प्रत्यासत्तित्वे तत एव वह्न्यादेः प्रत्यक्षत्वापत्तावनुमानाद्युच्छेदापत्तेः ॥

ननु रजतोत्पादकानां रजतावयवानामभावे शुक्तौ कथं तवापि रजतमुत्पद्यते इति चेत् ? उच्यते—न हि लोकसिद्धसामग्री प्रातिभासिकरजतोत्पादिका, किन्तु विलक्षणैव। तथा हि काचकामलादिदोषदूषितलोचनस्य पुरोवर्तिद्रव्यसंयोगादिदमाकारा चाकचिक्याकारा काचिदन्तःकरणवृत्तिरुदेति तस्यां च वृत्ताविदम-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

वच्छिन्नं चैतन्यं प्रतिबिम्बते। तत्र पूर्वोक्तरीत्या वृत्तेर्निर्गमनेनेदमवच्छिन्नं चैतन्यं वृत्त्यवच्छिन्नं चैतन्यं प्रमातृचैतन्यं चाभिन्नं भवति। ततश्च प्रमातृचैतन्याभिन्नविषयचैतन्यनिष्ठा शुक्तित्वप्रकारिकाऽविद्या चाकचिक्यादिसादृश्यसन्दर्शनसमुद्बोधितरजतसंस्कारसचीवा काचादिदोषसमवहिता रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमते।

परिणामो नाम उपादानसमसत्ताककार्यापत्तिः। विवर्तो नाम उपादानविषमसत्ताककार्यापत्तिः। प्रातिभासिकरजतं चाविद्यापेक्षया परिणामः चैतन्यापेक्षया विवर्त इति चोच्यते। अविद्यापरिणामरूपं च तद्रजतमविद्याधिष्ठाने इदमवच्छिन्नचैतन्ये वर्तते। अस्मन्मते सर्वस्यापि कार्यस्य स्वोपादानाविद्याधिष्ठानाश्रितत्वनियमात्॥

ननु चैतन्यनिष्ठस्य रजतस्य कथमिदं रजतमिति पुरोवर्तितादात्म्यम्? उच्यते—यथा न्यायमते आत्मनिष्ठस्य सुखादेः शरीरनिष्ठत्वेनोपलम्भः शरीरस्य सुखाद्यधिकरणतावच्छेदकत्वात्, तथा चैतन्यमात्रस्य रजतं प्रत्यनधिष्ठानतया इदमवच्छिन्नचैतन्यस्य तदधिष्ठानत्वेन इदमोऽवच्छेदकतया रजतस्य पुरोवर्तिसंसर्गप्रत्यय उपपद्यते।

तस्य च विषयचैतन्यस्य तदन्तःकरणोपहितचैतन्याभिन्नतया विषयचैतन्याध्यस्तमपि रजतं साक्षिण्यध्यस्तं केवलसाक्षिवेद्यं सुखादिवदनन्यवेद्यमिति चोच्यते।

ननु साक्षिण्यध्यस्तत्वेऽहं रजतमिति प्रत्ययः स्यात्, अहं सुखीतिवदिति चेत्? उच्यते—न हि सुखादीनामन्तःकरणावच्छिन्नचैतन्यनिष्ठाविद्याकार्यत्वप्रयुक्तम् अहं सुखीति ज्ञानम्। सुखादीनां घटादिवच्छुद्धचैतन्य एवाध्यासात्, किन्तु यस्य यदाकारानुभवाहितसंस्कारसहकृताविद्याकार्यत्वं तस्य तदाकारानुभवविषयत्वमित्येवानुगतं नियामकम्।

तथा च इदमाकारानुभवाहितसंस्कारसहकृताविद्याकार्यत्वात् घटादेरिदमाकारानुभवविषयत्वम्। अहमाकारानुभवाहितसंस्कारसहिताविद्याकार्यत्वादन्तःकरणादेरहमाकारानुभवविषयत्वम्। शरीरेन्द्रियादेरुभयविधानुभवसंस्कारसहिताविद्याकार्यत्वादुभयविधानुभवविषयत्वम्। तथा चोभयविधोऽनुभवः इदं शरीरमहं देहोऽहं मनुष्योऽहं ब्राह्मण इदं चक्षुरहं काण इदं श्रोत्रमहं बधिर इति॥

प्रकृते च प्रातिभासिकरजतस्य प्रमातृचैतन्याभिन्नेदमंशावच्छिन्नचैतन्यनिष्ठाविद्याकार्यत्वेऽपि इदं रजतमिति सत्यस्थलीयेदमंशाकारानुभवाहितसंस्कारजन्यत्वादिदमाकारानुभवविषयता, न त्वहं रजतमित्यहमाकारानुभवविषयतेत्यनुसन्धेयम्॥

नन्वेवमपि मिथ्यारजतस्य साक्षात्साक्षिसम्बन्धितया भानसंभवे रजतगोचर-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

ज्ञानाभासरूपाया अविद्यावृत्तेरभ्युपगमः किमर्थः ? इति चेत् ? न; स्वगोचरवृत्त्युपहितचैतन्यभिन्नसत्ताकत्वाभावस्य विषयापरोक्षरूपतया रजतस्यापरोक्षत्वसिद्धये तदभ्युपगमात् ॥

नन्विदंवृत्ते रजताकारवृत्तेश्च प्रत्येकमेकैकविषयत्वे गुरुमतवत् विशिष्टज्ञानानभ्युपगमे कुतो भ्रमज्ञानसिद्धिरिति चेत् ? न; वृत्तिद्वयप्रतिबिम्बितचैतन्यस्यैकस्य सत्यमिथ्यावस्तुतादात्म्यावगाहित्वेन भ्रमत्वस्य स्वीकारात् । अत एव साक्षिज्ञानस्य सत्यासत्यविषयतया प्रामाण्यानियमाद् अप्रामाण्योक्तिः साम्प्रदायिकानाम् ॥

ननु सिद्धान्ते देशान्तरीयरजतमप्यविद्याकार्यमध्यस्तं चेति कथं शुक्तिरूप्यस्य ततो वैलक्षण्यमिति चेत् ? न, त्वन्मते सत्यत्वाविशेषेऽपि केषाञ्चित्क्षणिकत्वं केषाञ्चित्स्थायित्वमित्यत्र यदेव नियामकं तदेव स्वभावविशेषादिकं ममापि । यद्वा घटाद्यध्यासे अविद्यैव दोषत्वेनापि हेतुः, शुक्तिरूप्याद्यध्यासे तु काचादयो दोषा अपि । तथा चागन्तुकदोषजन्यत्वं प्रातिभासिकत्वे प्रयोजकम् । अत एव स्वप्नोपलब्धरथादीनामागन्तुकनिद्रादिदोषजन्यत्वात्प्रातिभासिकत्वम् ॥

ननु स्वप्नस्थले पूर्वानुभूतरथादेः स्मरणमात्रेणैव व्यवहारोपपत्तौ न रथादिसृष्टिकल्पनं, गौरवादिति चेत् ? न, रथादेः स्मरणमात्राभ्युपगमे रथं पश्यामि, स्वप्ने रथमद्राक्षमित्याद्यनुभवविरोधापत्तेः, 'अथ रथान् रथयोगान् पथः सृजते' (बृ० ४।३।१०) इति रथादिसृष्टिप्रतिपादकश्रुतिविरोधापत्तेश्च । तस्माच्छुक्तिरूप्यवत् स्वप्नोपलब्धरथादयोऽपि प्रातिभासिकाः यावत्प्रतिभासमवतिष्ठन्ते ॥

ननु स्वप्नरथाद्यधिष्ठानतयोपलभ्यमानदेशविशेषस्यापि तदाऽसन्निकृष्टतयाऽनिर्वचनीयप्रातिभासिकदेशोऽभ्युपगन्तव्यः, तथा च रथाद्यध्यासः कुत्रेति चेत् ? न, चैतन्यस्य स्वयंप्रकाशस्य रथाद्यधिष्ठानत्वात्प्रतीयमानं रथाद्यस्तीत्येव प्रतीयते इति सद्रूपेण प्रकाशमानं चैतन्यमेवाधिष्ठानम् । देशविशेषोऽपि चिदध्यस्तः प्रातिभासिकः । रथादाविन्द्रियग्राह्यत्वमपि प्रातिभासिकम्, तदा सर्वेन्द्रियाणामुपरमात् । 'अहं गजः' इत्यादिप्रतीत्यापादनन्तु पूर्ववन्निरसनीयम् ॥

स्वप्नगजादयः साक्षान्मायापरिणामा इति केचित् । अन्तःकरणद्वारा तत्परिणामा इत्यन्ये ।

ननु गजादेः शुद्धचैतन्याध्यस्तत्वे इदानीमधिष्ठानसाक्षात्काराभावेन जागरणेऽपि स्वप्नोपलब्धगजादयोऽनुवर्तेरन् ? उच्यते, कार्यविनाशो हि द्विविधः—कश्चिदुपादानेन सह, कश्चिद्विद्यमान एवोपादाने । आद्यो बाधः । द्वितीयस्तु निवृत्तिः । आद्यस्य कारणमधिष्ठानतत्त्वसाक्षात्कारः, तेन विनोपादानभूताया अविद्याया अनिवृत्तेः ; द्वितीये विरोधिवृत्त्युत्पत्तिर्दोषनिवृत्तिश्च । तदिह ब्रह्मसाक्षा-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

स्कारभावात् स्वप्नप्रपञ्चो मावाधि । मुसलप्रहारेण घटादेरिव विरोधिप्रत्ययान्तरोदयेन स्वप्नजनकीभूतनिद्रादिदोषनाशेन वा गजादिनिवृत्तौ को विरोधः ॥

एवं च शुक्तिरूप्यस्य शुक्त्यवच्छिन्नचैतन्यनिष्ठतूलाविद्याकार्यत्वपक्षे शुक्तिरिति ज्ञानेन तदज्ञानेन (३) सह रजतस्य बाधः । मूलाविद्याकार्यत्वपक्षे तु मूलाविद्याया ब्रह्मतत्त्वसाक्षात्कारमात्रनिवर्त्यतया शुक्तित्वज्ञानेनानिवर्त्यतया रजतस्य तत्र शुक्तिज्ञानान्निवृत्तिमात्रम्, मूसलप्रहारेण घटस्येव ।

ननु शुक्तौ रजतस्य प्रतिभासकाले प्रातिभासिकसत्त्वाभ्युपगमे नेदं रजतमिति त्रैकालिकनिषेधज्ञानं न स्यात्, किन्त्विदानीमिदं न रजतमिति इदानीं घटः श्यामो नेतिवदिति चेत् ? न, न हि तत्र रजतत्वावच्छिन्नप्रतियोगिताकाभावो निषेधधीविषयः, किन्तु लौकिकपारमार्थिकत्वावच्छिन्नप्रातिभासिकरजतप्रतियोगिताकः, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावाभ्युपगमात् ।

ननु प्रातिभासिके रजते पारमार्थिकत्वमवगतम् ? न वा ? अनवगमे प्रतियोगितावच्छेदकावच्छिन्नरजततत्त्वज्ञानाभावादभावप्रत्यक्षानुपपत्तिः अवगमेऽपरोक्षावभासस्य तत्कालीनविषयसत्तानियतत्वाद् रजते पारमार्थिकत्वमप्यनिर्वचनीयं रजतवदेवोत्पन्नमिति तदवच्छिन्नरजतसत्त्वे तदवच्छिन्नाभावस्तस्मिन् कथं वर्तते ? इति चेत् ? न, पारमार्थिकत्वस्याधिष्ठाननिष्ठस्य रजते प्रतिभासकाले रजतनिष्ठपारमार्थिकत्वोत्पत्त्यनभ्युपगमात् । यत्रारोप्यमसन्निकृष्टं तत्रैव प्रातिभासिकवस्तूत्पत्तेरङ्गीकारात् ।

अत एवेन्द्रियसन्निकृष्टतया जपाकुसुमगतलौहित्यस्य स्फटिके भानसंभवाद् न स्फटिकेऽनिर्वचनीयलौहित्योत्पत्तिः । नन्वेवं यत्र जपाकुसुमं द्रव्यान्तरव्यवधानादसन्निकृष्टं तत्र लौहित्यप्रतीत्या प्रातिभासिकलौहित्यं स्वीकुर्वतामिति चेत् ? न, इष्टत्वात् । एवं प्रत्यक्षभ्रमान्तरेष्वपि प्रत्यक्षसामान्यलक्षणाऽनुगमो यथार्थप्रत्ययलक्षणासद्भावश्च दर्शनीयः ।

उक्तं प्रत्यक्षं प्रकारान्तरेण द्विविधम्, इन्द्रियजन्यं तदजन्यं चेति । तत्रेन्द्रियाजन्यं सुखादिप्रत्यक्षम्, मनस इन्द्रियत्वानराकरणात् । इन्द्रियाणि पञ्च-घ्राणरसनचक्षुःश्रोत्रत्वगात्मकानि । सर्वाणि चेन्द्रियाणि स्वस्वविषयसंयुक्तान्येव प्रत्यक्षज्ञानं जनयन्ति । तत्र घ्राणरसनत्वगिन्द्रियाणि स्वस्थानस्थितान्येव गन्धरसस्पर्शोपलम्भाञ्जनयन्ति । चक्षुःश्रोत्रे तु स्वत एव विषयदेशं गत्वा स्वस्वविषयं गृह्णीतः । श्रोत्रस्यापि चक्षुरादिवत् परिच्छिन्नतया भेर्यादिदेशगमनसम्भवात् । अत एवानुभवो भेरीशब्दो मया श्रुत इति । वीचीतरङ्गादिन्यायेन कर्णशष्कुलीप्रदेशेऽनन्तशब्दोत्पत्तिकल्पनागौरवम्, भेरीशब्दो मया श्रुत इति प्रत्यक्षस्य भ्रमत्वकल्पनागौरवं च स्यात् । तदेवं व्याख्यातं प्रत्यक्षम् ॥ इति प्रत्यक्ष परिच्छेदः ॥

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अथानुमानपरिच्छेदः २

अथानुमानं निरूप्यते । अनुमितिकरणमनुमानम् । अनुमितिश्च व्याप्तिज्ञानत्वेन व्याप्तिज्ञानजन्या । व्याप्तिज्ञानानुव्यवसायादेस्तत्त्वेन तज्जन्यत्वाभावान्नानुमितित्वम् ।

अनुमितिकरणं च व्याप्तिज्ञानम्, तत्संस्कारोऽवान्तरव्यापारः, न तु तृतीयलिङ्गपरामर्शोऽनुमितौ करणम् । तस्यानुमितिहेतुत्वासिद्ध्या तत्करणत्वस्य दूरनिरस्तत्वात् ।

न च संस्कारजन्यत्वेनानुमितेः स्मृतित्वापत्तिः, स्मृतिप्रागभावस्य संस्कारमात्रजन्यत्वस्य वा स्मृतित्वप्रयोजकतया संस्कारध्वंसासाधारणसंस्कारजन्यत्वस्य तद्प्रयोजकत्वात् ।

न च यत्र व्याप्तिस्मरणादनुमितिस्तत्र कथं संस्कारो हेतुरिति वाच्यम् । व्याप्तिस्मृतिस्थलेऽपि तत्संस्कारस्यैवानुमितिहेतुत्वात् । न हि स्मृतेः संस्कारनाश्यत्वनियमः, स्मृतिधारादर्शनात् । न चानुद्बुद्धसंस्कारादप्यनुमित्यापत्तिः, तद्बोधस्यापि सहकारित्वात् ।

एवं च अयं धूमवानिति पक्षधर्मताज्ञानेन, धूमो वह्निव्याप्य इत्यनुभवाहितसंस्कारोद्बोधे च सति, वह्निमानित्यनुमितिर्भवति, न तु मध्ये व्याप्तिस्मरणं तज्जन्यवह्निव्याप्यधूमवानित्यादि विशेषणविशिष्टं ज्ञानं वा हेतुत्वेन कल्पनीयम्, गौरवात् मानाभावाच्च ।

तच्च व्याप्तिज्ञानं वह्निविषयकज्ञानांश एव करणम्, न तु पर्वतविषयकज्ञानांश इति पर्वतो वह्निमानिति ज्ञानस्य वह्न्यंश एवानुमितित्वं न पर्वताद्यंशे. तदंशे प्रत्यक्षत्वस्योपपादितत्वात् ।

व्याप्तिश्च अशेषसाधनाश्रयाश्रितसाध्यसामानाधिकरण्यरूपा, सा च व्यभिचारादर्शने सति सहचारदर्शनेन गृह्यते । तच्च सहचारदर्शनं भूयो दर्शनं सकृद्दर्शनं वेति विशेषो नादरणीयः । सहचारदर्शनस्यैव प्रयोजकत्वात् ।

तच्चानुमानमन्वयिरूपमेकमेव । न तु केवलान्वयि । सर्वस्यापि धर्मस्याऽस्मन्मते ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वेन अत्यन्ताभावाप्रतियोगिसाध्यकत्वरूपकेवलान्वयित्वस्यासिद्धेः ।

नाप्यनुमानस्य व्यतिरेकिरूपत्वम् । साध्याभावे साधनाभावनिरूपितव्याप्तिज्ञानस्य साधनेन साध्यानुमितावनुपयोगात् । कथं तर्हि धूमादावन्वयव्याप्तिमविदुषोऽपि व्यतिरेकव्याप्तिज्ञानादनुमितिः ? अर्थापत्तिप्रमाणादिति वक्ष्यामः ।

CC-0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अत एवानुमानस्य नान्वयव्यतिरेकिरूपत्वं व्यतिरेकव्याप्तिज्ञानस्यानुमित्यहेतुत्वात् ।

तच्चानुमानं स्वार्थपरार्थभेदेन द्विविधम् । तत्र स्वार्थं तूक्तमेव । परार्थं तु न्यायसाध्यम् । न्यायो नामावयवसमुदायः । अवयवाश्च त्रय एव प्रसिद्धाः—प्रतिज्ञाहेतूदाहरणरूपाः, उदाहरणोपनयनिगमनरूपा वा, न तु पञ्चावयवरूपाः । अवयवत्रयेणैव व्याप्तिपक्षधर्मतयोरुपदर्शनसम्भवेनाधिकावयवद्वयस्य व्यर्थत्वात् ।

एवमनुमाने निरूपिते तस्माद् ब्रह्मभिन्ननिखिलप्रपञ्चस्य मिथ्यात्वसिद्धिः । तथा हि, ब्रह्मभिन्नं सर्वं मिथ्या, ब्रह्मभिन्नत्वाद्यदेवं तदेवं यथा शुक्तिरूप्यम् । न च दृष्टान्तासिद्धिः, तस्य साधितत्वात् । न चाप्रयोजकत्वं शुक्तिरूप्यरज्जुसर्पादीनां मिथ्यात्वे ब्रह्मभिन्नत्वस्यैव लाघवेन प्रयोजकत्वात् ।

मिथ्यात्वं च स्वाश्रयत्वेनाभिमतयावन्निष्ठात्यन्ताभावप्रतियोगित्वम् । अभिमतपदं वस्तुतः स्वाश्रयाप्रसिद्धया असंभववारणाय । यावत्पदमर्थान्तरवारणाय । तदुक्तम्—सर्वेषामेव भावानां स्वाश्रयत्वेन सम्मते ।

प्रतियोगित्वमत्यन्ताभावं प्रतिमृषात्मता ॥ इति ॥ चि० ७ ॥

यद्वा अयं पटः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी पटत्वात् पटान्तरवदित्याद्यनुमानं मिथ्यात्वे प्रमाणम् । तदुक्तम्—

अंशिनः स्वांशगात्यन्ताभावस्य प्रतियोगिनः ।
अंशित्वादितरांशीवद्विशेषैव गुणादिषु ॥ इति ॥ चि ८ ॥

न च घटादेर्मिथ्यात्वे सन् घट इति प्रत्यक्षेण बाधः । अधिष्ठानब्रह्मसत्तायास्तत्र विषयतया घटादेः सत्यत्वासिद्धेः । न च नीरूपस्य ब्रह्मणः कथं चाक्षुषादिज्ञानविषयतेति वाच्यम् । नीरूपस्यापि रूपादेः प्रत्यक्षविषयत्वात् । न च नीरूपस्य द्रव्यस्य चक्षुराद्ययोग्यत्वमिति नियमः । मन्मते ब्रह्मणो द्रव्यत्वासिद्धेः । गुणाश्रयत्वं समवायिकारणत्वं वा द्रव्यत्वमिति तेऽभिमतम् । नहि निर्गुणस्य ब्रह्मणो गुणाश्रयता नापि समवायिकारणता, समवायासिद्धेः । अस्तु वा द्रव्यत्वं ब्रह्मणः, तथाऽपि नीरूपस्य कालस्येव चाक्षुषादिज्ञानविषयत्वेऽपि न विरोधः ।

यद्वा, त्रिविधं सत्वम्—पारमार्थिकं व्यावहारिकं प्रातिभासिकं च । पारमार्थिकं सत्वं ब्रह्मणः, व्यावहारिकं सत्वमाकाशादेः, प्रातिभासिकं सत्वं शुक्तिरजतादेः । तथा च घटः सन्निति प्रत्यक्षस्य व्यावहारिकसत्वविषयत्वेन प्रामाण्यम् । अस्मिन्पक्षे च घटादेर्ब्रह्मणि निषेधो न स्वरूपेण, किन्तु पारमार्थिकत्वेनैवेति न विरोधः । अस्मिन्पक्षे च मिथ्यात्वलक्षणे पारमार्थिकत्वावच्छिन्नप्रतियोगिताकत्वमत्यन्ताभावविशेषणं द्रष्टव्यम् । तस्मादुपपन्नं मिथ्यात्वानुमानमिति ।

इत्यनुमानपरिच्छेदः ॥ २ ॥

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अथोपमानपरिच्छेदः ३

अथोपमानं निरूप्यते। तत्र सादृश्यप्रमाकरणमुपमानम्। तथा हि; नगरेषु दृष्टगोपिण्डस्य पुरुषस्य वनंगतस्य गवयेन्द्रियसन्निकर्षे सति भवति प्रतीतिः, अयं पिण्डो गोसदृश इति। तदनन्तरं भवति निश्चयः, अनेन सदृशी मदीया गौरिति। तत्रान्वयव्यतिरेकाभ्यां गवयनिष्ठगोसादृश्यज्ञानं करणं गोनिष्ठगवयसादृश्यज्ञानं फलम्।

न चेदं प्रत्यक्षेण संभवति; गोपिण्डस्य तदेन्द्रियासन्निकर्षात्। नाप्यनुमानेन, गवयनिष्ठगोसादृश्यस्यातल्लिङ्गत्वात्।

नापि मदीया गौरेतद्गवयसदृशी, एतन्निष्ठसादृश्यप्रतियोगित्वाद्, यो यद्गतसादृश्यप्रतियोगी, स तत्सदृशः, यथामैत्रनिष्ठसादृश्यप्रतियोगी चैत्रः मैत्रसदृश इत्यनुमानात्तत्संभव इति वाच्यम्। एवं विधानुमानानवतारेऽप्यनेन सदृशी मदीया गौरिति प्रतीतेरनुभवसिद्धत्वात्। उपमिनोमीत्यनुव्यवसायाच्च। तस्मादुपमानं मानान्तरम्। इत्युपमानपरिच्छेदः॥ ३॥

अथागमपरिच्छेदः ४

अथागमो निरूप्यते। यस्य वाक्यस्य तात्पर्यविषयीभूतसंसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम्। वाक्यजन्यज्ञाने च आकाङ्क्षा योग्यताऽऽसत्तयस्तात्पर्यज्ञानं चेति चत्वारि कारणानि।

तत्र पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वमाकाङ्क्षा। क्रियाश्रवणे कारकस्य कारकश्रवणे क्रियायाः करणश्रवणे इतिकर्तव्यतायाश्च जिज्ञासाविषयत्वात्। अजिज्ञासोरपि वाक्यार्थबोधाद् योग्यत्वमुपात्तम् तदवच्छेदकं च क्रियात्वकारकत्वादिकमिति नातिव्याप्तिः गौरश्व इत्यादौ। अभेदान्वये च समानविभक्तिकत्वंप्रतिपाद्यपद तदवच्छेदकमिति तत्त्वमस्यादिवाक्येषु नाव्याप्तिः।

एतादृशाकांक्षाऽभिप्रायेणैव बलाबलाधिकरणे 'सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इत्यत्र वैश्वदेवयागस्यामिक्षाऽन्वितत्वेन न वाजिनाकांक्षेत्यादिव्यवहारः।

ननु तत्रापि वाजिनस्य जिज्ञासाऽविषयत्वेऽपि तद्योग्यत्वमस्त्येव। प्रदेयद्रव्यत्वस्य यागनिरूपितजिज्ञासाविषयतावच्छेदकत्वादिति चेद्, न। स्वसमानजातीयपदार्थान्वयबोधविरहसहकृतप्रदेयद्रव्यत्वस्यैव तदवच्छेदकत्वेन वाजिनद्रव्यस्य स्वसमानजातीयामिक्षाद्रव्यान्वयबोधसहकृतत्वेन तादृशावच्छेदकाभावात्। आमिक्षायां तु नैवं, वाजिनाऽन्वयस्य तदाऽनुपस्थितत्वात्।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

उदाहरणान्तरेष्वपि दुर्बलत्वप्रयोजक आकांक्षाविरह एव द्रष्टव्यः ।

योग्यता च तात्पर्यविषयीभूतसंसर्गाबाधः । वह्निना सिञ्चतीत्यादौ तादृश-संसर्गबाधान्न योग्यता । 'स प्रजापतिरात्मनो वपामुदखिदत्' इत्यादावपि तात्पर्य-विषयीभूतपशुप्राशस्त्याबाधाद् योग्यता । तत्त्वमस्यादिवाक्येष्वपि वाच्याभेद-बाधेऽपि लक्ष्यस्वरूपाभेदबाधाभावाद् योग्यता ।

आसत्तिश्चाव्यवधानेन पदजन्यपदार्थोपस्थितिः । मानान्तरोपस्थापितपदार्थ-स्यान्वयबोधाभावात्पदजन्येति । अत एवाश्रुतपदार्थस्थले तत्तत्पदाध्याहारः द्वारमित्यादौ 'विधेहि' इति । अत एव 'हत्वा' इत्यादिमन्त्रे 'छिनद्मि' इति पदाध्याहारः । अत एव विकृतिषु 'सूर्याय जुष्टं निर्वपामि, इति प्रदप्रयोगः ।

पदार्थश्च द्विविधः—शक्यो लक्ष्यश्चेति । तत्र शक्तिर्नाम पदानामर्थेषु मुख्या वृत्तिः, यथा घटपदस्य पृथुबुध्नोदराद्याकृतिविशिष्टे वस्तुविशेषे वृत्तिः । सा च शक्तिः पदार्थान्तरम् । सिद्धान्ते कारणेषु कार्यानुकूलशक्तिमात्रस्य पदार्थान्तरत्वात् ।

सा च तत्तत्पदजन्यपदार्थज्ञानरूपकार्यानुमेया । तादृशशक्तिविषयत्वं शक्यत्वम् । तच्च जातेरेव न व्यक्तेः, व्यक्तीनामानन्त्येन गुरुत्वात् । कथं तर्हि गवादिपदाद् व्यक्तिभानमिति चेत् ? जातेर्व्यक्तिसमानसंवित्संवेद्यत्वादिति ब्रूमः ।

यद्वा, गवादिपदानां व्यक्तौ शक्तिः स्वरूपसती, न तु ज्ञाता हेतुः । जातौ तु ज्ञाता । न व्यक्त्यंशे शक्तिज्ञानमपि कारणं, गौरवात् जातिशक्तिमत्त्वज्ञाने सति व्यक्ति शक्तिमत्त्वज्ञानं विना व्यक्तिधीविलम्बाभावाच्च ।

अत एव न्यायमतेऽप्यन्वये शक्तिः स्वरूपसतीति सिद्धान्तः । ज्ञायमानशक्ति-विषयत्वमेव वाच्यत्वमिति जातिरेव वाच्या ।

अथवा व्यक्तेर्लक्षणयाऽत्रगमः । यथा नीलो घट इत्यत्र नीलशब्दस्य नील-गुणविशिष्टे लक्षणा, तथा जातिवाचकस्य तद्विशिष्टे लक्षणा । तदुक्तम्—'अनन्यलभ्यो हि शब्दार्थः' इति । एवं शक्यो निरूपितः ।

अथ लक्ष्यपदार्थो निरूप्यते । तत्र लक्षणाविषयो लक्ष्यः ।

लक्षणा च द्विविधा—केवललक्षणा लक्षितलक्षणा चेति । तत्र शक्यसाक्षा-त्सम्बन्धः केवललक्षणा, यथा गङ्गायां घोष इत्यत्र प्रवाहसाक्षात्सम्बन्धिनि तीरे गङ्गापदस्य केवललक्षणा । यत्र शक्यपरम्परासम्बन्धेनार्थान्तरप्रतीतिस्तत्र लक्षित-लक्षणा, यथा द्विरेफपदस्य रेफद्वये शक्तस्य भ्रमरपदघटितपरम्परासम्बन्धेन मधुकरे वृत्तिः । गौण्यपि लक्षितलक्षणैव; यथा सिंहो माणवक इत्यत्र सिंहशब्दवाच्य-सम्बन्धिक्रौर्यादिसम्बन्धेन माणवकस्य प्रतीतिः ।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

प्रकारान्तरेण लक्षणा त्रिविधा—जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा चेति। तत्र शक्यमनन्तर्भाव्य यत्रार्थान्तरप्रतीतिस्तत्र जहल्लक्षणा, यथा विषं भुङ्क्ष्वेत्यत्र स्वार्थं विहाय शत्रुगृहे भोजननिवृत्तिर्लक्ष्यते। यत्र शक्यार्थमन्तर्भाव्यैवार्थान्तरप्रतीतिस्तत्राजहल्लक्षणा, यथा शुक्लो घट इत्यत्र हि शुक्लशब्दः स्वार्थं शुक्लगुणमन्तर्भाव्यैव तद्वति द्रव्ये लक्षणया वर्तते।

यत्र हि विशिष्टवाचकः शब्दः एकदेशं विहाय एकदेशे वर्तते तत्र जहदजहल्लक्षणा, यथा सोऽयं देवदत्त इति। अत्र हि पदद्वयवाच्ययोर्विशिष्टयोरैक्यानुपपत्त्या पदद्वयस्य विशेष्यमात्रपरत्वम्। यथा वा तत्वमसीत्यादौ तत्पदवाच्यस्य सर्वज्ञत्वादिविशिष्टस्य त्वंपदवाच्येनान्तःकरणविशिष्टेनैक्यायोगादैक्यसिद्ध्यर्थं स्वरूपे लक्षणेति साम्प्रदायिकाः।

वयन्तु ब्रूमः—सोऽयं देवदत्तः, तत्वमसीत्यादौ विशिष्टवाचकपदानामेकदेशपरत्वेऽपि न लक्षणा, शक्त्युपस्थितयोर्विशिष्टयोरभेदान्वयानुपपत्तौ विशेष्ययोः शक्त्युपस्थितयोरेवाभेदान्वयाऽविरोधात्। यथा घटोऽनित्य इत्यत्र घटपदावाच्यैकदेशघटत्वस्यायोग्यत्वेऽपि योग्यघटव्यक्त्या सहानित्यत्वान्वयः। यत्र पदार्थैकदेशस्य विशेषणतयोपस्थितिः, तत्रैव स्वातन्त्र्येणोपस्थितये लक्षणाऽभ्युपगमः; यथा घटो नित्य इत्यत्र घटपदाद्घटत्वस्य शक्त्या स्वातन्त्र्येणानुपस्थित्या तादृशोपस्थित्यर्थं घटपदस्य घटत्वे लक्षणा।

एवमेव तत्त्वमसीत्यादिवाक्येऽपि न लक्षणा। शक्त्या स्वातन्त्र्येणोपस्थितयोस्त्वंपदार्थयोरभेदान्वये बाधकाभावात्। अन्यथा गेहे घटो, घटे रूपं, घटमानयेत्यादौ घटत्वगेहत्वादेरभिमतान्वयबोधायोग्यतया तत्रापि घटादिपदानां विशेष्यमात्रपरत्वं लक्षणयैव स्यात्। तस्मात्तत्त्वमसीत्यादिवाक्येषु आचार्याणां लक्षणोक्तिरभ्युपगमवादेन बोध्या।

जहदजहल्लक्षणोदाहरणं तु—काकेभ्यो दधि रक्ष्यतामित्याद्येव। तत्र शक्यकाकत्वपरित्यागेनाशक्यदध्युपघातकत्वपुरस्कारेण काकेऽकाकेऽपि काकशब्दस्य प्रवृत्तेः। लक्षणाबीजं तु तात्पर्य्यानुपपत्तिरेव न त्वन्वयानुपपत्तिः, काकेभ्यो दधिरक्ष्यतामित्यत्रान्वयानुपपत्तेरभावात्। गङ्गायां घोष इत्यादौ तात्पर्य्यानुपपत्तेरपि सम्भवात्।

लक्षणा च न पदमात्रवृत्तिः, किन्तु वाक्यवृत्तिरपि। यथा गम्भीरायां नद्यां घोष इत्यत्र गम्भीरायां नद्यामिति पदद्वयसमुदायस्य तीरे लक्षणा।

ननु वाक्यार्थस्याशक्यतया कथं शक्यसम्बन्धरूपा लक्षणा? उच्यते—शक्त्या यत्पदसम्बन्धेन ज्ञाप्यते तत्सम्बन्धो लक्षणा, शक्तिज्ञाप्यश्च यथा पदार्थस्तथा वाक्यार्थोऽपीति न काचिदनुपपत्तिः। एवमर्थवादवाक्यानां प्रशंसारूपाणां प्राश-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

स्त्ये लक्षणा। सोऽरोदीदित्यादिनिन्दार्थवाक्यानां निन्दितत्वे लक्षणा। अर्थवाद-गतपदानां प्राशस्त्यादिलक्षणाभ्युपगमे एकेन पदेन लक्षणया तदुपस्थिति-सम्भवे पदान्तरवैयर्थ्यं स्यात्। एवं च विध्यपेक्षितप्राशस्त्यरूपपदार्थप्रत्यायकतया अर्थवादपदसमुदायस्य पदस्थानीयतया विधिवाक्येन एकवाक्यत्वं भवतीत्यर्थ-वादानां पदैकवाक्यता।

क्व तर्हि वाक्यैकवाक्यता? यत्र प्रत्येकं भिन्न-भिन्नसंसर्गप्रतिपादकयोर्वाक्य-योराकांक्षावशेन महावाक्यार्थबोधकत्वम्। यथा 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादिवाक्यानां 'समिधो यजति' इत्यादिवाक्यानां च परस्परापेक्षिता-ङ्गाङ्गिबोधकवाक्यतयैकवाक्यता। तदुक्तं भट्टपादैः—

स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते॥ इति॥

एवं द्विविधोऽपि पदार्थो निरूपितः।

तदुपस्थितिश्चाशक्तिः। सा च शाब्दबोधे हेतुः, तथैवान्वयव्यतिरेकदर्शनात्। एवं महावाक्यार्थबोधेऽवान्तरवाक्यार्थबोधो हेतुः, तथैवान्वयाद्यवधारणात्।

क्रमप्राप्तं तात्पर्यं निरूप्यते। तत्र तत्प्रतीतीच्छयोच्चरितत्वं न तात्पर्यम्। अर्थज्ञानशून्येन पुरुषेणोच्चरिताद्वेदादर्थप्रत्ययाभावप्रसङ्गात्। अयमध्यापको-ऽव्युत्पन्न इति विशेषदर्शनेन तत्र तात्पर्यभ्रमस्याप्यभावात्। न चेश्वरीयतात्पर्य-ज्ञानात् तत्र शाब्दबोध इति वाच्यम्। ईश्वरानङ्गीकर्तुरपि तद्वाक्यार्थप्रतिपत्ति-दर्शनात्।

उच्यते। तत्प्रतीतिजननयोग्यत्वं तात्पर्यम्। गेहे घट इति वाक्यं गेहघट-संसर्गप्रतीतिजननयोग्यं, न तु पटसंसर्गप्रतीतिजननयोग्यमिति तद्वाक्यं घटसंसर्गपरं न तु पटसंसर्गपरमित्युच्यते।

ननु 'सैन्धवमानय' इत्यादिवाक्यं यदा लवणानयनप्रतीतीच्छया प्रयुक्तं तदाऽश्वसंसर्गप्रतीतिजनने स्वरूपयोग्यतासत्त्वाल्लवणपरत्वज्ञानदशायामप्यश्वादि-संसर्गज्ञानापत्तिरिति चेत्। न। तदितरप्रतीतीच्छयाऽनुच्चरितत्वस्यापि तात्पर्यं प्रति विशेषणत्वात्। तथा च यद्वाक्यं यत्प्रतीतिजननस्वरूपयोग्यत्वे सति यदन्य-प्रतीतीच्छया नोच्चरितं तद्वाक्यं तत्संसर्गपरमित्युच्यते।

शुकादिवाक्येऽव्युत्पन्नोच्चरितवेदवाक्यादौ च तत्प्रतीतीच्छाया एवाभावेन तदन्यप्रतीतीच्छयोच्चरितत्वाभावेन लक्षणसत्त्वान्नाव्याप्तिः। न चोभयप्रतीतीच्छ-योच्चरितेऽव्याप्तिः। तदन्यमात्रप्रतीतीच्छयाऽनुच्चरितत्वस्य विवक्षितत्वात्।

उक्तप्रतीतिमात्रजननयोग्यतायाश्चावच्छेदिका शक्तिः, अस्माकं तु मते सर्वत्र कारणतायाः शक्तेरेवावच्छेदकत्वान्न कोऽपि दोषः। एवं तात्पर्यस्य तत्प्रतीति-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

जनकत्वरूपस्य शाब्दज्ञानजनकत्वे सिद्धे चतुर्थवर्णके तात्पर्यस्य शाब्दज्ञानहेतुत्व-निराकरणवाक्यं तत्प्रतीतीच्छ्योश्चरितत्वरूपतापर्यनिराकरणपरम्, अन्यथा तात्पर्यनिश्चयफलकवेदान्तविचारवैयर्थ्यप्रसङ्गात् ।

केचित्तु शाब्दज्ञानत्वावच्छेदेन न तात्पर्यज्ञानं हेतुरित्येवं परं चतुर्थवर्णक-वाक्यम् । तात्पर्यसंशयविपर्ययोत्तरशाब्दज्ञानविशेषे च तात्पर्यज्ञानं हेतुरेव । इदं वाक्यमेतत्परम् ? उतान्यपरमिति संशये तद्विपर्यये च तदुत्तरवाक्यार्थविशेष-निश्चयस्य तात्पर्यनिश्चयं विनाऽनुपपत्तेरित्याहुः ।

तच्च तात्पर्यं वेदे मीमांसापरिशोधितन्यायादेवावधार्यते, लोके तु प्रकरणा-दिना । तत्र लौकिकवाक्यानां मानान्तरावगतार्थानुवादकत्वम् । वेदे तु वाक्यार्थस्यापूर्वतया नानुवादकत्वम् । तत्र लोके वेदे च कार्यपराणामिव सिद्धार्थानामपि प्रामाण्यम्, पुत्रस्ते जात इत्यादिषु सिद्धार्थेऽपि पदानां साम-र्थ्यावधारणात् । अत एव वेदान्तवाक्यानां ब्रह्मणि प्रामाण्यम् । यथा चैतत्तथा विषयपरिच्छेदे वक्ष्यते ।

तत्र वेदानां नित्यसर्वज्ञपरमेश्वरप्रणीतत्वेन प्रामाण्यमिति नैयायिकाः । वेदानां नित्यत्वेन निरस्तसमस्तपुंदूषणतया प्रामाण्यमित्यध्वरमीमांसकाः । अस्माकं तु मते वेदो न नित्य उत्पत्तिमत्त्वात् । उत्पत्तिमत्त्वं च 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' (बृ-२-४-१०) इत्यादिश्रुतेः । नापि वेदानां त्रिक्ष-णावस्थायित्वम् । य एव वेदो देवदत्तेनाधीतः, स एव वेदो मयाऽधीत इत्यादि-प्रत्यभिज्ञाविरोधात् । अत एव गकारादिवर्णानामपि न क्षणिकत्वं, सोऽयं गकार इति प्रत्यभिज्ञाविरोधात् ।

तथा च वर्णपदवाक्यसमुदायस्य वेदस्य वियदादिवत् सृष्टिकालीनोत्पत्ति-मत्त्वं प्रलयकालीनध्वंसप्रतियोगित्वं च । न तु मध्ये वर्णानामुत्पत्तिविनाशौ, अनन्तगकारकल्पने गौरवात् । अनुच्चारणदशायां वर्णानामनभिव्यक्तिस्तदुच्चा-रणरूपव्यञ्जकाभावान्न विरुध्यते । अन्धकारस्थले घटानुपलम्भवत् । उत्पन्नो गकार इत्यादिप्रत्ययः सोऽयं गकार इति प्रत्यभिज्ञाविरोधादप्रमाणम्, वर्णाभि-व्यक्तिजनकध्वनिगतोत्पत्तिनिरूपितपरम्परासम्बन्धविषयत्वेन प्रमाणं वा । तस्मान्न वेदानां क्षणिकत्वम् ।

ननु क्षणिकत्वाभावेऽपि वियदादिप्रपञ्चवदुत्पत्तिमत्त्वेन परमेश्वरकर्तृकतया पौरुषेयत्वादपौरुषेयत्वं च वेदानामिति तव सिद्धान्तो भज्येतेति चेत् ? न, न हि तावत्पुरुषेणोच्चार्यमाणत्वं पौरुषेयत्वम् । गुरुमतेऽपि अध्यापकपरम्परया पौरुषे-यत्वापत्तेः । नापि पुरुषाधीनोत्पत्तिकत्वं पौरुषेयत्वम् ? नैयायिकाभिमतपौरु-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

षेयत्वानुमानेऽस्मदादिना सिद्धसाधनत्वापत्तेः। किन्तु सजातीयोच्चारणानपेक्षोच्चारणविषयत्वम्।

तथा च सर्गाद्यकाले परमेश्वरः पूर्वसर्गसिद्धवेदानुपूर्वीसमानानुपूर्वीकं वेदं विरचितवान्, न तु तद्विजातीयं वेदमिति न सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं पौरुषेयत्वं वेदानाम्। भारतादीनां तु सजातीयोच्चारणमनपेक्ष्यैवोच्चारणमिति तेषां पौरुषेयत्वम्। एवं पौरुषेयापौरुषेयभेदेनागमो द्विधा निरूपितः।

इति वेदान्तपरिभाषायामागमपरिच्छेदः ॥ ४ ॥

अथार्थापत्तिपरिच्छेदः ॥५॥

इदानीमर्थापत्तिनिरूप्यते। तत्रोपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिः। तत्रोपपाद्यज्ञानं करणम्। उपपादकज्ञानं फलम्। येन विना यदनुपपन्नं तत्तत्रोपपाद्यम्, यस्याभावे यस्यानुपपत्तिस्तत्तत्रोपपादकम्। यथा रात्रिभोजनेन विना दिवाऽभुञ्जानस्य पीनत्वमनुपपन्नमिति तादृशपीनत्वमुपपाद्यम्। यथा वा रात्रिभोजनस्याभावे तादृशपीनत्वस्यानुपपत्तिरिति रात्रिभोजनमुपपादकम्।

रात्रिभोजनकल्पनारूपायां प्रमितावर्थस्यापत्तिः कल्पनेति षष्ठीसमासेन अर्थापत्तिशब्दो वर्तते, कल्पनाकरणपीनत्वादिज्ञाने स्वर्थस्यापत्तिः कल्पना यस्मादिति बहुव्रीहिसमासेन वर्तते इति फलकरणयोरुभयोस्तत्पदप्रयोगः।

सा चार्थापत्तिर्द्विविधा—दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति। तत्र दृष्टार्थापत्तिर्यथा—इदं रजतमिति पुरोवर्तिनि प्रतिपन्नस्यरजतस्य नेदं रजतमिति तत्रैव निषिध्यमानत्वं सत्यत्वेऽनुपपन्नमिति रजतस्य सद्भिन्नत्वं सत्यत्वात्यन्ताभाववत्त्वं वा मिथ्यात्वं कल्पयतीति। श्रुतार्थापत्तिर्यथा-यत्र श्रूयमाणवाक्यस्य स्वार्थानुपपत्तिमुखेनार्थान्तरकल्पनम्। तथा 'तरति शोकमात्मवित्' इत्यत्र श्रुतस्य शोकशब्दवाच्यबन्धजातस्य ज्ञाननिवर्त्यत्वस्यान्यथाऽनुपपत्त्या बन्धस्य मिथ्यात्वं कल्प्यते।

यथा वा जीवी देवदत्तो गृहे नेति वाक्यश्रवणानन्तरं जीविनो गृहासत्त्वं बहिःसत्त्वं कल्पयति। श्रुतार्थापत्तिश्च द्विविधा—अभिधानानुपपत्तिरभिहितानुपपत्तिश्च। तत्र, यत्र वाक्यैकदेशश्रवणेऽन्वयाभिधानानुपपत्त्याऽन्वयाभिधानोपयोगि पदान्तरं कल्प्यते तत्राभिधानानुपपत्तिः। यथा द्वारमित्यत्र 'पिधेहि' इतिपदाध्याहारः, यथा वा 'विश्वजिता यजेत' इत्यत्र 'स्वर्गकाम' इति पदाध्याहारः। ननु द्वारमित्यादावन्वयाभिधानात् पूर्वमिदमन्वयाभिधानं पिधानोपस्थापकपदं विनाऽनुपपन्नमिति कथं ज्ञानमिति चेत्? न, अभिधानपदेन करणव्युत्पत्त्या तात्पर्यस्य विवक्षितत्वात्। तथा च द्वारकर्मकपिधानक्रियासंसर्गपरत्वं पिधानोपस्थापकपदं विनाऽनुपपन्नमिति ज्ञानं तत्रापि सम्भाव्यते।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अभिहितानुपपत्तिस्तु यत्र वाक्यावगतोऽर्थोऽनुपपन्नत्वेन ज्ञातः सन्नर्थान्तरं कल्पयति, तत्र द्रष्टव्या। यथा स्वर्गकामो ज्योतिष्टोमेन यजेत' इत्यत्र स्वर्गसाधनत्वस्य क्षणिकज्योतिष्टोमयागगतयाऽवगतस्यानुपपत्त्या मध्यवर्त्यपूर्वं कल्प्यते। न चेयमर्थापत्तिरनुमानेऽन्तर्भवितुमर्हति। अन्वयव्याप्त्यज्ञानेनान्वयिन्यनन्तर्भावात्। व्यतिरेकिणश्चानुमानत्वं प्रागेव निरस्तम्। अत एवार्थापत्तिस्थलेऽनुमिनोमीति नानुव्यवसायः, किं तु अनेनेदं कल्पयामीति।

नन्वर्थापत्तिस्थले—इदमनेन विनाऽनुपपन्नमिति ज्ञानं करणमित्युक्तं, तत्र किमिदं तेन विनाऽनुपपन्नत्वम्? तदभावव्यापकाभावप्रतियोगित्वमिति ब्रूमः। एवमर्थापत्तेर्मानान्तरत्वसिद्धौ व्यतिरेकि नानुमानान्तरम्, पृथिवीतरेभ्यो भिद्यते इत्यादौ गन्धवत्त्वमितरभेदं विनाऽनुपपन्नमित्यादिज्ञानस्य करणत्वात्। अत एवानुव्यवसायः पृथिव्यामितरभेदं कल्पयामिति।

इति वेदान्तपरिभाषायामर्थापत्तिपरिच्छेदः ॥५॥

अथानुपलब्धिपरिच्छेदः ॥६॥

इदानीं षष्ठं प्रमाणं निरूप्यते। ज्ञानकरणाजन्याभावानुभवासाधारणकारणमनुपलब्धिरूपं प्रमाणम्। अनुमानजन्यातीन्द्रियाभावानुभवहेतावनुमानादावतिव्याप्तिवारणायाजन्यान्तं पदम्। अदृष्टादौ साधारणकारणेऽतिव्याप्तिवारणाय असाधारणेति पदम्। अभ्यवस्मृत्यसाधारणहेतुसंस्कारेऽतिव्याप्तिवारणाय अनुभवेति विशेषणम्।

न चातीन्द्रियाभावानुमितिस्थलेऽप्यनुपलब्ध्यैवाभावो गृह्यतां विशेषाभावादिति वाच्यम्। धर्माधर्माद्यनुपलब्धिसत्त्वेऽपि तदभावानिश्चयेन योग्यानुपलब्धेरेवाभावग्राहकत्वात्।

ननु केयं योग्यानुपलब्धिः? किं योग्यस्य प्रतियोगिनोऽनुपलब्धिरुत योग्याधिकरणे प्रतियोग्यनुपलब्धिः? नाद्यः, स्तम्भे पिशाचादिभेदस्याप्रत्यक्षत्वापत्तेः। नान्त्यः, आत्मनि धर्माधर्माद्यभावस्यापि प्रत्यक्षतापत्तेरिति चेत्? न; योग्या चासावनुपलब्धिश्चेति कर्मधारयाश्रयणात्। अनुपलब्धेर्योग्यता च—तर्कितप्रतियोगिसत्त्वप्रसञ्जितप्रतियोगिकत्वम्। यस्याभावो गृह्यते तस्य सत्त्वेनाधिकरणे तर्कितेन प्रसञ्जनयोग्यमापादनयोग्य यत्प्रतियोग्युपलब्धिस्वरूपं यस्यानुपलम्भस्य तदनुपलब्धेर्योग्यत्वमित्यर्थः।

तथा हि, स्फीतालोकवति भूतले यदि घटः स्यात्तदा घटोपलम्भः स्यादित्यापादनसम्भवात्तादृशभूतले घटाभावोऽनुपलब्धिगम्यः। अन्धकारे तु तादृशापादनासम्भवान्नानुपलब्धिगम्यता। अत एव स्तम्भे पिशाचसत्त्वे स्तम्भवत्प्रत्यक्ष-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

त्वापत्या तदभावोऽनुपलब्धिगम्यः । आत्मनि धर्मादिसत्त्वेऽप्यस्यातीन्द्रियतया निरुक्तोपलम्भापादनाऽसम्भवाद् न धर्माद्यभावस्यानुपलब्धिगम्यत्वम् ।

ननूक्तरीत्याऽधिकरणेन्द्रियसन्निकर्षस्थले अभावस्यानुपलब्धिगम्यत्वमनुमतं, तत्र क्लृप्तेन्द्रियमेवाभावाकारवृत्तावपि करणम्, इन्द्रियान्वयव्यतिरेकानुविधानादिति चेत् ? न ; तत्प्रतियोग्यनुपलब्धेरपि अभावग्रहे हेतुत्वेन क्लृप्तत्वेन करणत्वमात्रस्य कल्पनात् । इन्द्रियस्य चाभावेन समं सन्निकर्षाभावेनाभावग्रहाहेतुत्वात् । इन्द्रियान्वयव्यतिरेकयोरधिकरणज्ञानाद्युपक्षीणत्वेनान्यथासिद्धेः ।

ननु भूतले घटो नेत्याद्यभावानुभवस्थले भूतलांशे प्रत्यक्षत्वमुभयसिद्धमिति तत्र वृत्तिनिर्गमनस्यावश्यकत्वेन भूतलावच्छिन्नचैतन्यवत्तन्निष्ठघटाभावावच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नतया घटाभावस्य प्रत्यक्षतेव सिद्धान्तेऽपीति चेत् ? सत्यम् ; अभावप्रतीतेः प्रत्यक्षत्वेऽपि तत्करणस्यानुपलब्धेर्मानान्तरत्वात् । न हि फलीभूतज्ञानस्य प्रत्यक्षत्वे तत्करणस्य प्रत्यक्षप्रमाणतानियतत्वमस्ति, दशमस्त्वमसीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वेऽपि तत्करणस्य वाक्यस्य प्रत्यक्षप्रमाणभिन्नप्रमाणत्वाभ्युपगमात् ।

फलवैजात्यं विना कथं प्रमाणभेद इति चेत् ? न ; वृत्तिवैजात्यमात्रेण प्रमाणवैजात्योपपत्तेः । तथा च घटाद्यभावाकारवृत्तिर्नेन्द्रियजन्या, इन्द्रियस्य विषयेणासन्निकर्षात् । किन्तु घटानुपलब्धिरूपमानान्तरजन्या, इति भवत्यनुपलब्धेर्मानान्तरत्वम् ।

नन्वनुपलब्धिरूपमानान्तरपक्षेऽप्यभावप्रतीतेः प्रत्यक्षत्वे घटवति घटाभावभ्रमस्यापि प्रत्यक्षत्वापत्तौ तत्राप्यनिर्वचनीयघटाभावोऽभ्युपगम्येत ? न; चेष्टापत्तिः तस्य मायोपादानकत्वेऽभावत्वानुपपत्तेः, मायोपादानकत्वाभावे मायायाः सकलकार्योपादानत्वानुपपत्तिरिति चेत् ? न ; घटवति घटाभावभ्रमो न तत्कालोत्पन्नघटाभावविषयकः, किन्तु भूतलरूपादौ विद्यमानो लौकिको घटाभावो भूतले आरोप्यत इत्यन्यथाख्यातिरेव । आरोप्यसन्निकर्षस्थले सर्वत्रान्यथाख्यातेरेव व्यवस्थापनात् ।

अस्तु वा प्रतियोगिमति तदभावभ्रमस्थले तदभावस्यानिर्वचनीयत्वम्, तथाऽपि तदुपादानं मायैव । न ह्युपादानोपादेययोरत्यन्तसाजात्यम्, तन्तुपटयोरपि तन्तुत्वपटत्वादिना वैजात्यात् । यत्किञ्चित्साजात्यस्य मायाया अनिर्वचनीयत्वस्य घटाभावस्य च मिथ्यात्वधर्मस्य विद्यमानत्वात् । अन्यथा व्यावहारिकघटाद्यभावं प्रति कथं मायोपादानमिति कुतो नाशङ्क्येयाः ? न च विजातीययोरप्युपादानोपादेयभावे ब्रह्मैव जगदुपादानं स्यादिति वाच्यम् । प्रपञ्चविभ्रमाधिष्ठानत्वरूपेण तत्येष्टत्वात् । परिणामित्वरूपस्योपादानत्वस्य निरवयवे ब्रह्मण्यनु-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

पपत्तेः । तथा च प्रपञ्चस्य परिणाम्युपादानं माया, न ब्रह्म इति सिद्धान्त इत्यलमतिप्रसङ्गेन ।

स चाभावश्चतुर्विधः—प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति । तत्र मृत्पिण्डादौ कारणे कार्यस्य घटादेरुत्पत्तेः पूर्वं योऽभावः स प्रागभावः, स च भविष्यतीति प्रतीतिविषयः । तत्रैव घटस्य मुद्गरपातानन्तरं योऽभावः स प्रध्वंसाभावः । ध्वंसस्यापि स्वाधिकरणकपालनाशे नाश एव । न चैवं घटोन्मज्जानापत्तिः, घटध्वंसध्वंसस्यापि घटप्रतियोगिकध्वंसत्वात् । अन्यथा प्रागभावध्वंसात्मकघटस्य विनाशे प्रागभावोन्मज्जनापत्तिः ।

न चैवमपि यत्र ध्वंसाधिकरणं नित्यं तत्र कथं ध्वंसनाश इति वाच्यम् । तादृशाधिकरणं यदि चैतन्यव्यतिरिक्तं, तदा तस्य नित्यत्वमसिद्धम्, ब्रह्मव्यतिरिक्तस्य सर्वस्य ब्रह्मज्ञाननिवर्त्यतया वक्ष्यमाणत्वात् । यदि च ध्वंसाधिकरणं चैतन्यं; तदाऽसिद्धिः, आरोपितप्रतियोगिकध्वंसस्याधिष्ठाने प्रतीयमानस्याधिष्ठानमात्रत्वात् । तदुक्तम्—अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः । इति, एवं शुक्तिरूप्यविनाशोऽपीदमवच्छिन्नं चैतन्यमेव ।

यत्राधिकरणे यस्य कालत्रयेऽप्यभावः सोऽत्यन्ताभावः, यथा वायौ रूपात्यन्ताभावः । सोऽपि घटादिवद् ध्वंसप्रतियोग्येव । इदमिदं नेति प्रतीतिविषयोऽन्योन्याभावः । अयमेव विभागो भेदः पृथक्त्वं चेति व्यवह्रियते; भेदातिरिक्तविभागादौ प्रमाणाभावात् । अयं चान्योन्याभावोऽधिकरणस्य सादित्वे सादिः, यथा घटे पटभेदः । अधिकरणस्यानादित्वेऽनादिरेव, यथा जीवे ब्रह्मभेदः, ब्रह्मणि वा जीवभेदः । द्विविधोऽपि भेदो ध्वंसप्रतियोग्येव, अविद्याया निवृत्तौ तत्परतन्त्राणां निवृत्त्यवश्यम्भावात् ।

पुनरपि भेदो द्विविधः—सोपाधिको निरुपाधिकश्चेति । तत्रोपाधिसत्ताव्याप्यसत्ताकत्वं सोपाधिकत्वं, तच्छून्यत्वं निरुपाधिकत्वम् । तत्राद्यो यथा—एकस्यवाकाशस्य घटाद्युपाधिभेदेन भेदः । यथा वा एकस्यैव ब्रह्मणोऽन्तःकरणभेदाद्भेदः । निरुपाधिकभेदो यथा घटे पटभेदः । न च ब्रह्मण्यपि प्रपञ्चभेदाभ्युपगमेऽद्वैतविरोधः ? तात्त्विकभेदादेरनभ्युपगमेन वियदादिवदद्वैताव्याघातकत्वात् । प्रपञ्चस्याद्वैते ब्रह्मणि कल्पितत्वाङ्गीकारात् । तदुक्तं सुरेश्वराचार्यैः—

अक्षमा भवतः केयं साधकत्वप्रकल्पने ।
किन्न पश्यसि संसारं तत्रैवाज्ञानकल्पितम् ॥

अत एव विवरणेऽविद्यानुमाने प्रागभावव्यतिरिक्तत्वविशेषणम्, तत्त्वप्रदीपिकायामविद्यालक्षणे भावत्वविशेषणं च सङ्गच्छते । एवं चतुर्विधाभावानां योग्यानुपलब्ध्या प्रतीतिः । तत्रानुपलब्धिर्मानान्तरम् ।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

एवमुक्तानां प्रमाणानां प्रामाण्यं स्वत एवोत्पद्यते ज्ञायते च। तथा हि स्मृत्यनुभवसाधारणं संवादिप्रवृत्त्यनुकूलं तद्वति तत्प्रकारकज्ञानत्वं प्रामाण्यम्। तच्च ज्ञानसामान्यसामग्रीप्रयोज्यं न त्वधिकं गुणमपेक्षते, प्रमामात्रेऽनुगतगुणाभावात्। नापि प्रत्यक्षप्रमायां भूयोऽवयवेन्द्रियसन्निकर्षः। रूपादिप्रत्यक्षे आत्मप्रत्यक्षे च तदभावात्, सत्यपि तस्मिन् पीतः शङ्ख इति प्रत्ययस्य भ्रमत्वाच्च।

अत एव न सल्लिङ्गपरामर्शादिकमप्यनुमित्यादिप्रमायां गुणः, असल्लिङ्गपरामर्शादिस्थलेऽपि विषयाबाधेन अनुमित्यादेः प्रमात्वात्। न चैवमप्रमाऽपि प्रमा स्यात्, ज्ञानसामान्यसामग्र्या अविशेषादिति वाच्यम्। दोषाभावस्यापि हेतुत्वाङ्गीकारात्। न चैवं परतस्त्वमिति वाच्यम्। आगन्तुकभावकारणापेक्षायामेव परतस्त्वात्।

ज्ञायते च प्रामाण्यं स्वतः। स्वतो ग्राह्यत्वं च दोषाभावे सति यावत्स्वाश्रयग्राहकसामग्रीग्राह्यत्वम्। स्वाश्रयो वृत्तिज्ञानं तद्ग्राहकं साक्षिज्ञानं तेनापि वृत्तिज्ञाने गृह्यमाणे तद्गतं प्रामाण्यं गृह्यते। न चैवं प्रामाण्यसंशयानुपपत्तिः, तत्र संशयानुरोधेन दोषस्यापि सत्त्वेन दोषाभावघटितस्वाश्रयग्राहकाभावेन तत्र प्रामाण्यस्यैवाग्रहात्।

यद्वा—यावत्स्वाश्रयग्राहकग्राह्यत्वयोग्यत्वं स्वतस्त्वम्। संशयस्थले प्रामाण्यस्योक्तयोग्यतासत्त्वेऽपि दोषवशेनाग्रहाद् न संशयानुपपत्तिः। अप्रामाण्यं तु न ज्ञानसामान्यसामग्रीप्रयोज्यम्, प्रमायामप्यप्रामाण्यापत्तेः। किन्तु दोषप्रयोज्यम्। नाप्यप्रामाण्यं यावत्स्वाश्रयग्राहकग्राह्यम्। अप्रामाण्यघटकतदभाववत्त्वादेर्वृत्तिज्ञानाऽनुपनीतत्वेन साक्षिणा ग्रहीतुमशक्यत्वात्। किन्तु विसंवादिप्रवृत्त्यादिलिङ्गिकानुमित्यादिविषय इति परत एवाप्रामाण्यमुत्पद्यते ज्ञायते चेति।

इत्यनुपलब्धिपरिच्छेदः ॥ ६ ॥

अथ विषयपरिच्छेदः ॥७॥

एवं निरूपितानां प्रमाणानां प्रामाण्यं द्विविधम्—व्यावहारिकतत्त्वावेदकत्वं पारमार्थिकतत्त्वावेदकत्वं चेति। तत्र ब्रह्मस्वरूपावगाहिप्रमाणव्यतिरिक्तानां सर्वं प्रमाणानामाद्यं प्रामाण्यम्, तद्विषयाणां व्यवहारदशायां बाधाभावात्। द्वितीयं तु जीवब्रह्मैक्यपराणां 'सदेव सोम्येदमग्र आसीत्' (छा० ६-२) इत्यादीनां 'तत्त्वमसि' (छा० ६-८-१) इत्यन्तानाम्। तद्विषयस्य जीवपरैक्यस्य कालत्रयाबाध्यत्वात्।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तच्चैक्यं तत्त्वंपदार्थज्ञानाधीनज्ञानमिति प्रथमं तत्पदार्थौ लक्षणप्रमाणाभ्यां निरूप्यते। तत्र लक्षणं द्विविधम्—स्वरूपलक्षणं तटस्थलक्षणं चेति। तत्र स्वरूपमेव लक्षणं स्वरूपलक्षणम्, यथा सत्यादिकं ब्रह्मस्वरूपलक्षणम्। 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० २-१-१) 'आनन्दो ब्रह्मेति व्यजानात्' (तै० ३-६) इति श्रुतेः।

ननु स्वस्य स्ववृत्तित्वाभावे कथं लक्षणत्वमिति चेत्? न, स्वस्यैव स्वापेक्षया धर्मिधर्मभावकल्पनया लक्ष्यलक्षणत्वसम्भवात्। तदुक्तम्—'आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः, अपृथक्त्वेऽपि चैतन्यात्पृथगिवावभासन्ते' इति।

तटस्थलक्षणं तु यावल्लक्ष्यकालमनवस्थितत्वे सति तद्व्यावर्तकं तदेव, यथा गन्धवत्त्वं पृथिवीलक्षणम्। महाप्रलये परमाणुषु उत्पत्तिकाले घटादिषु गन्धाभावात्। प्रकृते ब्रह्मणि च जगज्जन्मादिकारणत्वम्। अत्र जगत्पदेन कार्यजातं विवक्षितम्, कारणत्वं च कर्तृत्वमतोऽविद्यादौ नातिव्याप्तिः।

कर्तृत्वं च तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम्। ईश्वरस्य तावदुपादानगोचरापरोक्षज्ञानसद्भावे च 'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते' (मु० १-१-९) इत्यादिश्रुतिर्मानम्। तादृशचिकीर्षासद्भावे 'सोऽकामयत बहुस्यां प्रजायेय' (तै० २-६) इत्यादिश्रुतिर्मानम्। तादृशकृतौ च 'तन्मनोऽकुरुत' इत्यादिवाक्यम्।

ज्ञानेच्छाकृतीनां मध्येऽन्यतमगर्भं लक्षणत्रितयमिदं विवक्षितम्, अन्यथा व्यर्थविशेषणत्वापत्तेः। अत एव जन्मस्थितिध्वंसानामन्यतमस्यैव लक्षणे प्रवेशः। एवं च प्रकृते लक्षणानि नव सम्पद्यन्ते। ब्रह्मणो जगज्जन्मादिकारणत्वे च—'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति' (तै० ३-१) इत्यादिश्रुतिर्मानम्।

यद्वा—निखिलजगदुपादानत्वं ब्रह्मणो लक्षणम्। उपादानत्वं च जगदध्यासाधिष्ठानत्वं, जगदाकारेण विपरिणममानमायाऽधिष्ठानत्वं वा। एतादृशमेवोपादनत्वमभिप्रेत्य 'इदं सर्वं यदयमात्मा' 'सच्च त्यच्चाभवत्' (तै० २-६) 'बहुस्यां प्रजायेय' (तै० २-६) इत्यादिश्रुतिषुब्रह्मप्रपञ्चयोस्तादात्म्यव्यपदेशः। घटः सन्, घटो भाति, घट इष्ट इत्यादिलौकिकव्यपदेशोऽपि सच्चिदानन्दरूपब्रह्मैक्याध्यासात्।

नन्वानन्दात्मकचिदध्यासाद् घटादेरिष्टत्वव्यवहारे दुःखस्यापि तत्राध्यासात्तत्रापि इष्टत्वव्यवहारापत्तिरिति चेत्? न, आरोपे सति निमित्तानुसरणं, न तु निमित्तमस्तीत्यारोप इत्यभ्युपगमेन दुःखादौ सच्चिदंशाध्यासेऽप्यानन्दांशाध्यासाभावात्। जगति नामरूपांशद्वयव्यवहारस्तु अविद्यापरिणामात्मकनामरूपसम्बन्धात्।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तदुक्तम्—अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥ इति ॥

अथ जगतो जन्मक्रमो निरूप्यते—तत्र सर्गाद्यकाले परमेश्वरः सृज्यमानप्रपञ्चवैचित्र्यहेतुप्राणिकर्मसहकृतोऽपरिमितानिरूपितशक्तिविशेषविशिष्टमायासहितः सन्नामरूपात्मकनिखिलप्रपञ्चं प्रथमं बुद्धावाकलय्येदं करिष्यामीति सङ्कल्पयति 'तदैक्षत बहुस्यां प्रजायेय' (छा० ६-२-३) इति 'सोऽकामयत बहुस्यां प्रजायेय' (तै० २-६) इत्यादिश्रुतेः । तत आकाशादीनि पञ्चभूतानि अपञ्चीकृतानि तन्मात्रपदप्रतिपाद्यानि उत्पद्यन्ते । तत्राकाशस्य शब्दो गुणः । वायोस्तु शब्दस्पर्शौ । तेजसस्तु शब्दस्पर्शरूपाणि । अपां तु शब्दस्पर्शरूपरसाः । पृथिव्यास्तु शब्दस्पर्शरूपरसगन्धाः ।

न च शब्दस्याकाशमात्रगुणत्वम् ; वाय्वादावपि तदुपलम्भात् । न चासौ भ्रमः; बाधकाभावात् । एमानि भूतानि त्रिगुणमायाकार्याणि त्रिगुणानि । गुणास्सत्त्वरजस्तमांसि । एतैश्च सत्त्वगुणोपेतैः पञ्चभूतैर्व्यस्तैः पृथक् पृथक् क्रमेण श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानि पञ्चज्ञानेन्द्रियाणि जायन्ते । एतेभ्यः पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्यो मनोबुद्ध्यहङ्कारचित्तानि जायन्ते । श्रोत्रादीनां पञ्चानां क्रमेण दिग्वातार्कवरुणाश्विनोऽधिष्ठातृदेवताः । मन आदीनां चतुर्णां क्रमेण चन्द्रचतुर्मुखशङ्कराच्युता अधिष्ठातृदेवताः ।

एतैरेव रजोगुणोपेतैः पञ्चभूतैर्व्यस्तैर्यथाक्रमं वाक्पाणिपादपायूपस्थाख्यानि कर्मेन्द्रियाणि जायन्ते । तेषां च क्रमेण वह्नीन्द्रोपेन्द्रमृत्युप्रजापतयोऽधिष्ठातृदेवताः । रजोगुणोपेतपञ्चभूतैरेव मिलितैः पञ्च वायवः प्राणापानव्यानोदानसमानाख्या जायन्ते । तत्र प्राग्गमनवान् वायुः, प्राणः नासादिस्थानवर्ती । अर्वाग्गमनवानपानः, पाय्वादिस्थानवर्ती । विष्वग्गतिमान् व्यानः, अखिलशरीरवर्ती । ऊर्ध्वगमनवानुत्क्रमणवायुरुदानः, कण्ठस्थानवर्ती । अशितपीतान्नादिसमीकरणकरः समानः, नाभिस्थानवर्ती । तैरेव तमोगुणोपेतैरपञ्चीकृतभूतैः पञ्चीकृतानि भूतानि जायन्ते । 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' (छा० ६-३-३) इति श्रुतेः पञ्चीकरणोपलक्षणार्थत्वात् ।

पञ्चीकरणप्रकारश्चेत्थम्—आकाशमादौ द्विधा विभज्यतयोरेकं भागं पुनश्चतुर्द्धा विभज्य तेषां चतुर्णामंशानां वाय्वादिषु चतुर्षु भूतेषु संयोजनम् । एवं वायुं द्विधा विभज्य तयोरेकं भागं पुनः चतुर्द्धा विभज्य तेषां चतुर्णामंशानामाकाशादिषु संयोजनम् । एवं तेज आदीनामपि । तदेवमेकैकभूतस्यार्द्धं स्वांशात्मकमर्द्धान्तरं चतुर्विधभूतमयमिति पृथिव्यादिषु स्वांशाधिक्यात्पृथिव्यादिव्यवहारः । तदुक्तम्—'वैशेष्यात्तु तद्वादस्तद्वादः' (ब्र० सू० २-४-२१) इति ।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

पूर्वोक्तैरपञ्चीकृतैर्लिङ्गशरीरं परलोकयात्रानिर्वाहकं मोक्षपर्यन्तं स्थायि मनोबुद्धिभ्यामुपेतं ज्ञानेन्द्रियपञ्चकर्मेन्द्रियपञ्चकप्राणादिपञ्चकसंयुक्तं जायते ।

तदुक्तम्—पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् ।

अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम् ॥ १ ॥ इति ॥

तच्च द्विविधं—परमपरं च । तत्र परं हिरण्यगर्भलिङ्गशरीरम्, अपरमस्मदादिलिङ्गशरीरम् । तत्र हिरण्यगर्भलिङ्गशरीरं महत्तत्त्वम्, अस्मदादिलिङ्गशरीरमहङ्कार इत्याख्यायते ।

एवं तमोगुणयुक्तेभ्यः पञ्चीकृतभूतेभ्यो भूम्यन्तरिक्षस्वर्महर्जनस्तपःसत्यात्मकस्योर्ध्वलोकसप्तकस्य अतलवितलसुतलतलातलरसातलमहातलपातालाख्याधोलोकसप्तकस्य ब्रह्माण्डस्य जरायुजाण्डजस्वेदजोद्भिज्जाख्यचतुर्विधस्थूलशरीराणामुत्पत्तिः । तत्र जरायुजानि जरायुभ्यो जातानि, मनुष्यपश्वादिशरीराणि । अण्डजानि अण्डेभ्यो जातानि, पक्षिपन्नगादिशरीराणि । स्वेदजानि स्वेदाज्जातानि, यूकामशकादीनि । उद्भिज्जानि भूमिमुद्भिद्य जातानि, वृक्षादीनि । वृक्षादीनामपि पापफलभोगायतनत्वेन शरीरत्वम् ।

तत्र परमेश्वरस्य पञ्चतन्मात्राद्युत्पत्तौ सप्तदशावयवोपेतलिङ्गशरीरोत्पत्तौ हिरण्यगर्भस्थूलशरीरोत्पत्तौ च साक्षात्कर्तृत्वम् । इतरनिखिलप्रपंचोत्पत्तौ हिरण्यगर्भादिद्वारा, 'हन्ताहमिमास्तिस्रो देवताः अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' (छा० ६-३-२) इति श्रुतेः । हिरण्यगर्भो नाम मूर्तित्रयादन्यः प्रथमो जीवः । स वै शरीरी प्रथमः स वै पुरुष उच्यते ।

आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्तत ॥ १ ॥

'हिरण्यगर्भः समवर्तताग्रे भूतस्य' (यजु० १३-४ ऋ० स० १०-१२०-१) इत्यादिश्रुतेः । एवं भूतभौतिकसृष्टिर्निरूपिता । इदानीं प्रलयो निरूप्यते ।

प्रलयो नाम त्रैलोक्यनाशः, स च चतुर्विधः—नित्यः प्राकृतो नैमित्तिक आत्यन्तिकश्चेति । तत्र नित्यः—प्रलयः सुषुप्तिः, तस्याः सकलकार्यप्रलयरूपत्वात् । धर्माधर्मपूर्वसंस्काराणां च तदा कारणात्मनाऽवस्थानम् । तेन सुषुप्तोत्थितस्य न सुखदुःखाद्यनुभवानुपपत्तिः, न वा स्मरणानुपपत्तिः । न च सुषुप्तावन्तःकरणस्य विनाशे तदधीनप्राणादि क्रियाऽनुपपत्तिः; वस्तुतः श्वासाद्यभावेऽपि तदुपलब्धेः पुरुषान्तरविभ्रममात्रत्वात् सुप्तशरीरोपलम्भवत् ।

न चैवं सुप्तस्य परेतादविशेषः । सुप्तस्य हि लिङ्गशरीरं संस्कारात्मनाऽत्रैव वर्तते, परेतस्य तु लोकान्तरे इति वैलक्षण्यात् । यद्वा, अन्तःकरणस्य द्वे शक्ती—ज्ञानशक्तिः क्रियाशक्तिश्चेति । तत्र ज्ञानशक्तिविशिष्टान्तःकरणस्य सुषुप्तौ विनाशः, न क्रियाशक्तिविशिष्टस्येति प्राणाद्यवस्थानमविरुद्धम् । 'यदा सुप्तः स्वप्नं न कंचन

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

पश्यति, अथास्मिन् प्राण एवैकधा भवति, अथैनं वाक् सर्वैर्नामभिः सहाप्येति', (कौ० ३-२) 'सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति' (छा० ६-८-१) इत्यादिश्रुतिरुक्तसुषुप्तौ मानम्।

प्राकृतप्रलयस्तु कार्यब्रह्मविनाशनिमित्तकः सकलकार्यनाशः। यदा तु प्रागेवोत्पन्नब्रह्मसाक्षात्कारस्य कार्यब्रह्मणो ब्रह्मणश्चाधिकारलक्षणप्रारब्धकर्मसमाप्तौ विदेहकैवल्यात्मिका परा मुक्तिः, तदा तल्लोकवासिनामप्युत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणा सह विदेहकैवल्यम्।

ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्॥ इति श्रुतेः॥

एवं स्वलोकवासिभिः सह कार्ये ब्रह्मणि मुच्यमाने तदधिष्ठितब्रह्माण्डतदन्तर्वर्तिनिखिललोकतदन्तर्वर्तिस्थावरादीनां भौतिकानां भूतानां च प्रकृतौ मायायां च लयः, न तु ब्रह्मणि, बाधरूपविनाशस्यैव ब्रह्मनिष्ठत्वात्। अतः प्राकृतः इत्युच्यते।

कार्यब्रह्मणो दिवसावसाननिमित्तकस्त्रैलोक्यमात्रप्रलयः नैमित्तिकप्रलयः। 'ब्रह्मणो दिवसश्चतुर्युगसहस्रपरिमितकालः, 'चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते' इति वचनात्। प्रलयकालो दिवसकालपरिमितः, रात्रिकालस्य दिवसकालतुल्यत्वात् प्राकृतप्रलये नैमित्तिकप्रलये च पुराणवचनानि।

द्विपरार्द्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः।
तदा प्रकृतयः सप्त कल्प्यन्ते प्रलयाय हि॥
एष प्राकृतिको राजन् प्रलयो यत्र लीयते।

इति वचनं प्राकृतप्रलये मानम्।

एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक्।
शेतेऽनन्तासने नित्यमात्मसात्कृत्य चाखिलम्॥

इति वचनं नैमित्तिकप्रलये मानम्।

तुरीयप्रलयस्तु ब्रह्मसाक्षात्कारनिमित्तकः सर्वमोक्षः। स चैकजीववादे युगपदेव, नानाजीववादे तु क्रमेण। 'सर्वे एकीभवन्ति' इत्यादिश्रुतेः। तत्राद्यास्त्रयोऽपि लयाः कर्मोपरतिनिमित्ताः, तुरीयस्तु ज्ञानोदयनिमित्तो लयो ज्ञानेन सहैवेति विशेषः। एवं चतुर्विधप्रलयो निरूपितः। तस्येदानीं क्रमो निरूप्यते—

भूतानां भौतिकानां च न कारणलयक्रमेण लयः। कारणलयसमये कार्याणामाश्रयान्तराभावेनावस्थानानुपपत्तेः। किन्तु सृष्टिक्रमविपरीतक्रमेण। तत्तत्कार्यनाशे तत्तज्जनकादृष्टनाशस्यैव प्रयोजकतया उपादाननाशस्याप्रयोजकत्वात्। अन्यथा न्यायमते महाप्रलये पृथिवीपरमाणुगतरूपरसादेरविनाशापत्तेः।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तथा च पृथिव्या अप्सु, अपां तेजसि, तेजसो वायौ, वायोराकाशे, आकाशस्य जीवाहङ्कारे, तस्य हिरण्यगर्भाहङ्कारे, तस्य चाविद्यायामित्येवं रूपाः प्रलयाः। तदुक्तं विष्णुपुराणे—

जगत्प्रतिष्ठा देवर्षे! पृथिव्यप्सु प्रलीयते।
तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते ॥ १ ॥
वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते।
अव्यक्तं पुरुषे ब्रह्मन्! निष्कले संप्रलीयते ॥ २ ॥ इति।

एवंविधप्रलयकारणत्वं तत्पदार्थस्य ब्रह्मणस्तटस्थलक्षणम्।

ननु वेदान्तैर्ब्रह्मणि जगत्कारणत्वेन प्रतिपाद्यमाने सति सप्रपञ्चं ब्रह्म स्यादन्यथा सृष्टिवाक्यानामप्रामाण्यापत्तेरिति चेत्? न; न हि सृष्टिवाक्यानां सृष्टौ तात्पर्यं किन्तु अद्वितीये ब्रह्मण्येव।

तत्प्रतिपत्तौ कथं सृष्टेरुपयोगः? इत्थम्—यदि सृष्टिमनुपन्यस्य निषेधो ब्रह्मणि प्रपञ्चस्य प्रतिपाद्येत, तदा ब्रह्मणि निषिद्धस्य प्रपञ्चस्य वायौ प्रतिषिद्धस्य रूपस्येव ब्रह्मणोऽन्यत्रावस्थानशङ्कायां न निर्विचिकित्समद्वितीयत्वं प्रतिपादितं स्यात्। ततः सृष्टिवाक्याद् ब्रह्मोपादेयत्वज्ञाने सत्युपादानं विना कार्यस्यान्यत्र सद्भावशङ्कायां निरस्तायां नेति नेतीत्यादीनां ब्रह्मण्यपि तस्यासत्त्वोपपादने प्रपञ्चस्य तुच्छत्वावगमे निरस्ताखिलद्वैतविभ्रममखण्डं सच्चिदानन्दैकरसं ब्रह्म सिद्ध्यतीति परम्परया सृष्टिवाक्यानामप्यद्वितीये ब्रह्मण्येव तात्पर्यम्।

उपासनाप्रकरणपठितसगुणब्रह्मवाक्यानां चोपासनाविध्यपेक्षितगुणारोपमात्रपरत्वं, न गुणपरत्वम्। निर्गुणप्रकरणपठितानां सगुणवाक्यानां तु निषेधवाक्यापेक्षितनिषेध्यसम्पादकत्वेन विनियोग इति न किञ्चिदपि वाक्यमद्वितीयब्रह्मप्रतिपादनेन विरुध्यते।

तदेवं स्वरूपतटस्थलक्षणलक्षितं तत्पदवाच्यमीश्वरचैतन्यं मायाप्रतिबिम्बितमिति केचित्। तेषामयमाशयः—जीवपरमेश्वरसाधारणं चैतन्यमात्रं बिम्बम्, तस्यैव बिम्बस्याविद्यात्मिकायां मायायां प्रतिबिम्बमीश्वरचैतन्यमन्तःकरणेषु प्रतिबिम्बं जीवचैतन्यम्; 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः' इति श्रुतेः। एतन्मतेजलाशयगतशरावगतसूर्यप्रतिबिम्बयोरिव जीवपरमेश्वरयोर्भेदः। अविद्यात्मकोपाधेर्व्यापकतया तदुपाधिकेश्वरस्यापि व्यापकत्वम्। अन्तःकरणस्य परिच्छिन्नतया तदुपाधिकजीवस्यापि परिच्छिन्नत्वम्। एतन्मतेऽविद्याकृतदोषा जीव इव परमेश्वरेऽपि स्युरुपाधेः प्रतिबिम्बपक्षपातित्वादित्यस्वरसाद् बिम्बात्मकमीश्वरचैतन्यमित्यपरे। तेषामयमाशयः—एकमेव चैतन्यं बिम्बत्वाक्रान्तमीश्वरचैतन्यं प्रतिबिम्बत्वाक्रान्तं जीवचैतन्यम्। बिम्बप्रतिबिम्बकल्पनोपाधिश्चैकजीववादे

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अविद्या, अनेकजीववादे तु अन्तःकरणान्येव। अविद्यान्तःकरणरूपोपाधिप्रयुक्तो जीवपरभेदः। उपाधिकृतदोषाश्च प्रतिबिम्बे जीव एव वर्तन्ते, न तु बिम्बे परमेश्वरे, उपाधेः प्रतिबिम्बपक्षपातित्वात्। एतन्मते च गगनसूर्यस्य जलादौ भासमानप्रतिबिम्बसूर्यस्येव जीवपरयोर्भेदः।

ननु ग्रीवास्यमुखस्थ दर्पणप्रदेश इव बिम्बचैतन्यस्य परमेश्वरस्य जीवप्रदेशेऽभावात्तस्य सर्वान्तर्यामित्वं न स्यादिति चेत्? न; साञ्जनक्षत्रस्य आकाशस्य जलादौ प्रतिबिम्बितत्वे बिम्बभूतमहाकाशस्यापि जलादिप्रदेशसम्बन्धदर्शनेन परिच्छिन्नबिम्बस्य प्रतिबिम्बदेशासम्बन्धित्वेऽप्यपरिच्छिन्नब्रह्मबिम्बस्य प्रतिबिम्बदेशसम्बन्धाविरोधात्।

न च रूपहीनस्य ब्रह्मणो न प्रतिबिम्बसम्भवः, रूपवत एव तथात्वदर्शनादिति वाच्यम्? नीरूपस्यापि रूपस्य प्रतिबिम्बदर्शनात्। न च नीरूपस्य द्रव्यस्य प्रतिबिम्बाभावनियमः? आत्मनो द्रव्यत्वाभावस्योक्तत्वात्।

'एकधा बहुधा चैव दृश्यते जलचन्द्रवत्' (ब्र० वि० १२) 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन्' इत्यादिवाक्येन ब्रह्मप्रतिबिम्बाभावानुमानस्य बाधितत्वाच्च। तदेवं तत्पदार्थो निरूपितः। इदानीं त्वं पदार्थो निरूप्यते।

एकजीववादेऽविद्याप्रतिबिम्बो जीवः, अनेकजीववादे अन्तःकरणप्रतिबिम्बः। स च जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयवान्। तत्र जाग्रद्दशा नामेन्द्रियजन्यज्ञानावस्था। अवस्थान्तरे इन्द्रियाभावान्नातिव्याप्तिः। इन्द्रियजन्यज्ञानं चान्तःकरणवृत्तिः। स्वरूपज्ञानस्यानादित्वात्।

सा चान्तःकरणवृत्तिरावरणाभिभवार्थेत्येकं मतम्। तथा हि—अविद्योपहितचैतन्यस्य जीवत्वपक्षे घटाद्यधिष्ठानचैतन्यस्य जीवरूपतया जीवस्य सर्वदा घटादिभानप्रसक्तौ घटाद्यवच्छिन्नचैतन्यावरकमज्ञानं मूलाविद्यापरतन्त्रमवस्थापदवाच्यमभ्युपगन्तव्यम्। एवं सति घटादेर्न सर्वदा भानप्रसङ्गः, अनावृतचैतन्यसम्बन्धस्यैव भानप्रयोजकत्वात्। तस्य चावरणस्य सदातनत्वे कदाचिदपि घटभानं न स्यादिति तद्भङ्गे वक्तव्ये, तद्भङ्गजनकं न चैतन्यमात्रम्। तद्भासकस्य तदनिवर्तकत्वात्। नापि वृत्त्युपहितंचैतन्यम्, परोक्षस्थलेऽपि तन्निवृत्त्यापत्तेरिति परोक्षवृत्तिव्यावृत्तिविशेषस्य, तदुपहितचैतन्यस्य वाऽऽवरणभङ्गजनकत्वमित्यावरणाभिभवार्था वृत्तिरित्युच्यते।

सम्बन्धार्था वृत्तिरित्यपरं मतम्। तत्राप्यविद्योपाधिकोऽपरिच्छिन्नो जीवः। स च घटादिप्रदेशे विद्यमानोऽपि घटाद्याकारापरोक्षवृत्तिविरहदशायां न घटादिकमवभासयति, घटादिना तस्य सम्बन्धाभावात्। तदाकारवृत्तिदशायां तु भासयति, तदा सम्बन्धसत्त्वात्।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

नन्वविद्योपाधिकस्यापरिच्छिन्नस्य जीवस्य स्वत एव समस्तवस्तुसम्बद्धस्य वृत्तिविरहदशायां सम्बन्धाभावाभिधानमसङ्गतम् । असङ्गत्वदृष्ट्या सम्बन्धाभावाभिधाने वृत्त्यनन्तरमपि सम्बन्धो न स्यादिति चेत् ? उच्यते; न हि वृत्तिविरहदशायां जीवस्य घटादिना सह सम्बन्धसामान्यं निषेधामः; किं तर्हि, घटादिभानप्रयोजकं सम्बन्धविशेषम् । स च सम्बन्धविशेषो विषयस्य जीवचैतन्यस्य च व्यङ्ग्यव्यञ्जकतालक्षणः कादाचित्कः तत्तदाकारवृत्तिनिबन्धनः ।

तथा हि तैजसमन्तःकरणं स्वच्छद्रव्यत्वात् स्वत एव जीवचैतन्याभिव्यञ्जनसमर्थम्, घटादिकं तु न तथा, अस्वच्छद्रव्यत्वात् । स्वाकारवृत्तिसंयोगदशायां तु वृत्त्यभिभूतजाड्यधर्मकतया वृत्त्युत्पादितचैतन्याभिव्यञ्जनयोग्यताश्रयतया च वृत्त्युत्थानानन्तरं चैतन्यमभिव्यनक्ति ।

तदुक्तं विवरणे—अन्तःकरणं हि स्वस्मिन्निव स्वसंसर्गिण्यपि घटादौ चैतन्याभिव्यक्तियोग्यतामापादयतीति । दृष्टं चास्वच्छद्रव्यस्यापि स्वच्छद्रव्यसंबन्धदशायां प्रतिबिम्बग्राहित्वम् । यथा कुड्यादेर्जलादिसंयोगदशायां मुखादिप्रतिबिम्बग्राहिता । घटादेरभिव्यञ्जकत्वं च तत्प्रतिबिम्बग्राहित्वम्, चैतन्याभिव्यक्तत्वं च तत्र प्रतिबिम्बितत्वम् ।

एवं विषाभिव्यञ्जकत्वसिद्ध्यर्थमेव वृत्तेरपरोक्षस्थले बहिर्निर्गमनाङ्गीकारः । परोक्षस्थले तु वह्न्यादेर्वृत्तिसंसर्गाभावेन चैतन्नानभिव्यञ्जकतया न वह्न्यादेरपरोक्षत्वम् । एतन्मते च विषयाणामपरोक्षत्वं चैतन्याभिव्यञ्जकत्वमिति द्रष्टव्यम् । एवं जीवस्यापरिच्छिन्नत्वेऽपि वृत्तेः सम्बन्धार्थत्वं निरूपितम् । इदानीं परिच्छिन्नत्वपक्षे सम्बन्धार्थकत्वं निरूप्यते ।

तथा हि—अन्तःकरणोपाधिको जीवः । तस्य न घटाद्युपादानता, घटादिदेशासम्बन्धात् । किन्तु ब्रह्मैव घटाद्युपादानम् । तस्य मायोपहितस्य सकलघटाद्यन्वयित्वात् । अत एव ब्रह्मणः सर्वज्ञता । तथा च जीवस्य घटाद्यधिष्ठानब्रह्मचैतन्याभेदमन्तरेण घटाद्यवभासासम्भवे प्राप्ते तदवभासाय घटाद्यधिष्ठानब्रह्मचैतन्याभेदसिद्ध्यर्थं घटाद्याकारा वृत्तिरिष्यते ।

ननु वृत्त्यापि कथं प्रमातृचैतन्यविषयचैतन्ययोरभेदः सम्पाद्यते, घटान्तःकरणरूपोपाधिभेदेन तदवच्छिन्नचैतन्ययोरभेदासम्भवादिति चेत् ? न; वृत्तेर्बहिर्देशनिर्गमनाङ्गीकारेण वृत्त्यन्तःकरणविषयाणामेकदेशस्थत्वेन तदुपधेयभेदाभावस्योक्तत्वात् । एवमपरोक्षस्थले वृत्तेर्मतभेदेन विनियोग उपपादितः ।

इन्द्रियाजन्यविषयगोचरापरोक्षान्तःकरणवृत्त्यवस्थास्वप्नावस्था । जाग्रदवस्थाव्यावृत्त्यर्थम् इन्द्रियाजन्येति । अविद्यावृत्तिमत्यां सुषुप्तौ अतिव्याप्तिवारणायान्तःकरणेति । सुषुप्तिर्नामाविद्यागोचराविद्यावृत्त्यवस्था । जाग्रत्स्वप्नयोरविद्याकारवृत्ते-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

न्तःकरणवृत्तित्वान्न तत्रातिव्याप्तिः। अत्र केचिन्मरणमूर्च्छयोरवस्थान्तरत्वमाहुः। अपरे तु सुषुप्तावेव तयोरन्तर्भावमाहुः।

तत्र तयोरवस्थात्रयान्तर्भाववहिर्भावयोस्त्वंपदार्थनिरूपणे उपयोगाभावान्न तत्र प्रयत्यते। तस्य च मायोपाध्यपेक्षयैकत्वम्, अन्तःकरणोपाध्यपेक्षया च नानात्वं व्यवह्रियते। एतेन जीवस्याणुत्वं प्रत्युक्तम्। 'बुद्धेर्गुणेनात्मगुणेन चैव-ह्याराग्रमात्रो ह्यवरोपि दृष्टः' (श्वे० ५-८) इत्यादौ जीवस्य बुद्धिशब्दवाच्यान्तः-करणपरिमाणोपाधिकपरमाणुत्वश्रवणात्।

स च जीवः स्वयंप्रकाशः। स्वप्नावस्थामधिकृत्य 'अत्रायं पुरुषः स्वयं-ज्योतिः' (बृ० ४-३-८) इति श्रुतेः। अनुभवरूपश्च 'प्रज्ञानघनः' (मा० ५) इत्यादिश्रुतेः। अनुभवामीति व्यवहारस्तु वृत्तिप्रतिबिम्बितचैतन्यमादायोपपद्यते।

एवं त्वंपदार्थो निरूपितः। अधुना तत्त्वंपदार्थयोरैक्यं महावाक्यप्रतिपाद्यम-भिधीयते।

ननु नाहमीश्वर इत्यादिप्रत्यक्षेण, किंचिज्ज्ञत्वसर्वज्ञत्वविरुद्धधर्माश्रयत्वादि-लिङ्गेन, द्वा सुपर्णेत्यादिश्रुत्या; द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।

क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥ (भ० १५-१६)

इत्यादिस्मृत्या च जीवपरभेदस्यावगतत्वेन तत्त्वमस्यादिवाक्यमादित्यो यूपः, यजमानः प्रस्तर इत्यादिवाक्यवद् उपचरितार्थमेवेति चेत्? न; भेदप्रत्यक्षस्य सम्भावितकरणदोषस्यासम्भावितदोषवेदजन्यज्ञानेन बाध्यमानत्वात्। अन्यथा चन्द्रगताधिकपरिमाणग्राहिज्योतिःशास्त्रस्य चन्द्रप्रादेशग्राहिप्रत्यक्षेण बाधापत्तेः। पाकरक्ते घटे रक्तोऽयं न श्याम इति वस्तुविशेषणे हीति न्यायेन जीवपरभेदग्राहि-प्रत्यक्षस्य विशेषणीभूतधर्मभेदविषयत्वाच्च।

अत एव नानुमानमपि प्रमाणम्, आगमबाधात्, मेरुपाषाणमयत्वानु-मानवत्। नाप्यागमान्तरविरोधः। तत्परातत्परवाक्ययोः तत्परवाक्यस्य बलवत्त्वेन लोकसिद्धभेदानुवादिद्वासुपर्णादिवाक्यापेक्षया उपक्रमोपसंहाराद्यवगताद्वैततात्पर्य-विशिष्टस्य तत्त्वमस्यादिवाक्यस्य प्रबलत्वात्।

न च जीवपरैक्ये विरुद्धधर्माश्रयत्वानुपपत्तिः? शीतस्यैव जलस्यौपाधिकौ-ष्ण्याश्रयत्ववत् स्वभावतो निर्गुणस्यैव जीवस्यान्तःकरणाद्युपाधिककर्तृत्वाद्याश्रयत्व-प्रतिभासोपपत्तेः। यदि च जलादौ औष्ण्यमारोपितं तदा प्रकृतेऽपि तुल्यम्। न च सिद्धान्ते कर्तृत्वस्य क्वचिदध्यभावादारोप्यप्रमाहितसंस्कारांराभावे कथमारोप इति वाच्यम्। लाघवेनारोप्यविषयसंस्कारत्वेनैव तस्य हेतुत्वात्।

न च प्राथमिकारोपे का गतिः? कर्तृत्वाद्यध्यासप्रवाहस्यानादित्वात्। तत्त्वं-पदवाच्ययोर्विशिष्टयोरैक्यायोगेऽपि लक्ष्यस्वरूपयोरैक्यमुपपादितमेव। अत एव

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तत्प्रतिपादकतत्त्वमस्यादिवाक्यानामखंडार्थत्वम्, सोऽयमित्यादिवाक्यवत्। न च कार्यपराणामेव प्रामाण्यम्, चैत्र! पुत्रस्ते जात इत्यादौ सिद्धेऽपि सङ्गतिग्रहात्। एवं सर्वप्रमाणाविरुद्धं श्रुतिस्मृतीतिहासपुराणप्रतिपाद्यं जीवपरैक्यं वेदान्तशास्त्रस्य विषय इति सिद्धम्। इति श्रीवेदान्तपरिभाषायां विषयपरिच्छेदः ॥ ७ ॥

अथ प्रयोजनपरिच्छेदः ॥८॥

इदानीं प्रयोजनं निरूप्यते। यदवगतं सत्स्ववृत्तितयेष्यते तत्प्रयोजनम्। तच्च द्विविधम्—मुख्यं गौणं चेति। तत्र सुखदुःखाभावौ मुख्यं प्रयोजनम्। तदन्यतरसाधनं गौणं प्रयोजनम्। सुखं च द्विविधम्—सातिशयं निरतिशयं चेति। तत्र सातिशयं सुखं विषयानुषङ्गजनितान्तःकरणवृत्तितारतम्यकृतानन्दलेशाविर्भावविशेषः। 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' (बृ० ४-३-३२) इत्यादिश्रुतेः। निरतिशयं सुखं च ब्रह्मैव। 'आनन्दो ब्रह्मेति व्यजानात्' (तै० ३-६) 'विज्ञानमानन्दं ब्रह्म' (बृ० ३-१८) इतिश्रुतेः।

आनन्दात्मकब्रह्मावाप्तिश्च मोक्षः, शोकनिवृत्तिश्च; 'ब्रह्म वेद ब्रह्मैव भवति' (मु० ३-२-९) 'तरति शोकमात्मवित्' (छा० ७-१-३) इत्यादिश्रुतेश्च; न तु लोकान्तरावाप्तिः, तज्जन्यवैषयिकानन्दो वा मोक्षः। तस्य कृतकत्वेनानित्यत्वे मुक्तस्य पुनरावृत्त्यापत्तेः।

ननु त्वन्मतेऽप्यानन्दावाप्तेरनर्थनिवृत्तेश्च सादित्वे तुल्यो दोषः, अनादित्वे मोक्षमुद्दिश्य श्रवणादौ प्रवृत्त्यनुपपत्तिरिति चेत्? न; सिद्धस्यैव ब्रह्मस्वरूपस्य मोक्षस्यासिद्धत्वभ्रमेण तत्साधने प्रवृत्त्युपपत्तेः। अनर्थनिवृत्तिरप्यधिष्ठानभूतब्रह्मस्वरूपतया सिद्धैव। लोकेऽपि प्राप्तप्राप्तिपरिहृतपरिहारयोः प्रयोजनत्वं दृष्टमेव; यथा हस्तगतविस्मृतसुवर्णादौ 'तव हस्ते सुवर्णम्' इत्याप्तोपदेशादप्राप्तमिव प्राप्नोति। यथा वा वलयितचरणायां रज्जौ सर्पत्वभ्रमवतो 'नायं सर्पः' इत्याप्तवाक्यात् परिहृतस्यैव सर्पस्य परिहारः। एवं प्राप्तस्याप्यानन्दस्य प्राप्तिः, परिहृतस्याप्यनर्थस्य निवृत्तिः मोक्षः प्रयोजनम्।

स च ज्ञानैकसाध्यः 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' (श्वे० ३-८) इति श्रुतेः, अज्ञाननिवृत्तेर्ज्ञानैकसाध्यत्वनियमाच्च। तच्च ज्ञानं ब्रह्मात्मैक्यगोचरम्। 'अभयं वै जनकप्राप्तोऽसि' (बृ० ४-२-४) 'तदात्मानमेवावेदहं ब्रह्मास्मि' (बृ० १-४-१०) इति श्रुतेः। 'तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनम्' इति नारदीयवचनाच्च।

तच्च ज्ञानमपरोक्षरूपम्। परोक्षत्वेऽपरोक्षभ्रमनिवर्तकत्वानुपपत्तेः। तच्च

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

परोक्षज्ञानं तत्त्वमस्यादिवाक्यादिति केचित् । मनननिदिध्यासनसंस्कृतान्तःकरणादेवेत्यपरे ।

तत्र पूर्वाचार्याणामयमाशयः—संविदापरोक्ष्यं न करणविशेषोत्पत्तिनिबन्धनम्, किन्तु प्रमेयविशेषनिबन्धनमित्युपपादितम् । तथा च ब्रह्मणः प्रमातृजीवाभिन्नतया तद्गोचरं शब्दजन्यज्ञानमप्यपरोक्षम् । अत एव प्रतर्दनाधिकरणे प्रतर्दनं प्रति 'प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमुपास्व' (कौ० ३-२) इतीन्द्रप्रोक्तवाक्ये प्राणशब्दस्य ब्रह्मपरत्वे निश्चिते सति मामुपास्वेत्यस्मच्छब्दानुपपत्तिमाशङ्क्य तदुत्तरत्वेन प्रवृत्ते 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' (ब्र० सू० १-१-३१) इत्यत्र सूत्रे शास्त्रीया दृष्टिः शास्त्रदृष्टिरिति तत्त्वमस्यादिवाक्यजन्यमहं ब्रह्मेति ज्ञानं दृष्टिशब्देनोक्तमिति ।

अन्येषां त्वयमाशयः—करणविशेषनिबन्धनमेव ज्ञानानां प्रत्यक्षत्वम्, न विषयविशेषनिबन्धनम् । एकस्मिन्नेव सूक्ष्मवस्तुनि पटुकरणापटुकरणयोः प्रत्यक्षत्वाप्रत्यक्षत्वव्यवहारदर्शनात् । तथा च संवित्साक्षात्त्वे इन्द्रियजन्यत्वस्यैव प्रयोजकतया न शब्दजन्यज्ञानस्यापरोक्षत्वम् ।

ब्रह्मसाक्षात्कारेऽपि मनननिदिध्यासनसंस्कृतं मन एव करणम् 'मनसैवानुद्रष्टव्यः' इत्यादिश्रुतेः । मनोऽगम्यत्वश्रुतिश्चासंस्कृतमनोविषया । न चैवं ब्रह्मण औपनिषदत्वानुपपत्तिः, अस्मदुक्तमनसो वेदजन्यज्ञानान्तरमेव प्रवृत्ततया वेदोपजीवित्वात् । वेदानुपजीविमानान्तरगम्यत्वस्यैव वेदगम्यत्वविरोधित्वात् ।

शास्त्रदृष्टिसूत्रमपि ब्रह्मविषयमानसप्रत्यक्षस्य शास्त्रप्रयोजकत्वादुपपद्यते । तदुक्तम्—

अपि संराधने सूत्राच्छास्त्रार्थध्यानजा प्रमा ।
शास्त्रदृष्टिर्मता तां तु वेत्ति वाचस्पतिः परः ॥ इति ॥

तच्च ज्ञानं पापक्षयात् । स च कर्मानुष्ठानादिति परम्परया कर्मणा विनियोगः । अत एव 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ० ४-४-२२) इत्यादिश्रुतिः, 'कषाये कर्मभि पक्के ततो ज्ञान प्रवर्तते' इत्यादिस्मृतिश्च सङ्गच्छते ।

एवं श्रवणमनननिदिध्यासनान्यपि ज्ञानसाधनानि । मैत्रेयीब्राह्मणे 'आत्मा वा अरे द्रष्टव्यः' (बृ० २-४-४) इति दर्शनममूद्यतत्साधनत्वेन 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ० २-२-४) इति श्रवणमनननिदिध्यासनानां विधानात् ।

तत्र श्रवणं नाम वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूला मानसी क्रिया । मननं नाम शब्दावधारितेऽर्थे मानान्तरविरोधशङ्कायां तन्निराकरणानुकूलतर्कात्मज्ञानजको मानसो व्यापारः । निदिध्यासनं नाम अनादिदुर्वासन-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

या विषयेष्वाकृष्यमाणचित्तस्य विषयेभ्योऽपकृष्यात्मविषयकस्थैर्यानुकूलो मानसो व्यापारः।

तत्र निदिध्यासनं ब्रह्मसाक्षात्कारे साक्षात्कारणम्। 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्' (श्वे० १-३) इत्यादिश्रुतेः। निदिध्यासने च मननं हेतुः, अकृतमननस्यार्थदार्ढ्याभावेन तद्विषये निदिध्यासनायोगात्। मनने च श्रवणं हेतुः, श्रवणाभावे तात्पर्यनिश्चयेन शाब्दज्ञानाभावेन श्रुतार्थविषयकयुक्तत्वायुक्तत्वनिश्चयानुकूलमननायोगात्। एतानि त्रीण्यपि ज्ञानोत्पत्तौ कारणानीति केचिदाचार्या ऊचिरे।

अपरे तु श्रवणं प्रधानम्, मननिदिध्यासनयोस्तु श्रवणात्पराचीनयोरपि श्रवणफलब्रह्मदर्शननिर्वर्तकतया आरादुपकारकाङ्गत्वमित्याहुः। तदप्यङ्गत्वं न तार्तीयशेषत्वरूपम्। तस्य श्रुत्याद्यन्यतमप्रमाणगम्यस्य प्रकृते श्रुत्याद्यन्यतमाभावेऽसम्भवात्।

तथा हि, 'व्रीहिभिर्यजेत' 'दध्ना जुहोति' इत्यादाविव मनननिदिध्यासनयोरङ्गत्वे न काचित्तृतीया श्रुतिरस्ति। नापि 'बर्हिर्देवसदनं दामि' इत्यादिमन्त्राणां बर्हिः खण्डनप्रकाशनसामर्थ्यवत् किञ्चिल्लिङ्गमस्ति। नापि प्रदेशान्तरपठितप्रवर्ग्यस्याग्निष्टोमे प्रवृणक्तीति वाक्यवच्छ्रवणानुवादेन मनननिदिध्यासनयोर्विनियोजकं किञ्चिद्वाक्यमस्ति। नापि 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति वाक्यावगतफलसाधनताकदर्शपूर्णमासप्रकरणे प्रयाजादीनामिव फलसाधनत्वेनावगतस्य श्रवणस्य प्रकरणे मनननिदिध्यासनयोराम्नानम्।

ननु द्रष्टव्य इति दर्शनानुवादेन श्रवणे विहिते सति फलवत्तया श्रवणप्रकरणे तत्सन्निधावाम्नातयोर्मनननिदिध्यासनयोः प्रयाजन्यायेन प्रकरणादेवाङ्गतेति चेत्? न; 'ते ध्यानयोगानुगता अपश्यन्' इत्यादिश्रुत्यन्तरे ध्यानस्य दर्शनसाधनत्वेनावगतस्याङ्गाकाङ्क्षायां प्रयाजन्यायेन श्रवणमननयोरेवाङ्गतापत्तेः। क्रमसमाख्ये च दूरनिरस्ते।

किञ्च प्रयाजादावङ्गत्वविचारः सप्रयोजनः। पूर्वपक्षे विकृतिषु न प्रयाजाद्यनुष्ठानम्, सिद्धान्ते तु तत्रापि तदनुष्ठानमिति। प्रकृते तु श्रवणं न कस्यचित्प्रकृतिः, येन मननदिदिध्यासनयोस्तत्राप्यनुष्ठानमङ्गत्वविचारफलं भवेत्। तस्मान्न तार्तीयशेषत्वं मनननिदिध्यासनयोः। किन्तु यथा घटादिकार्ये मृत्पिण्डादीनां प्रधानकारणता, चक्रादीनां सहकारिकारणतेति प्राधान्याप्राधान्यव्यपदेशः, तथा श्रवणमनननिदिध्यासनानामपीति मन्तव्यम्।

सूचितं चैतद्विवरणाचार्यैः—'शक्तितात्पर्यविशिष्टशब्दावधारणं प्रमेयावगमं प्रत्यव्यवधानेन कारणं भवति, प्रमाणस्य प्रमेयावगमं प्रत्यव्यवधानात्। मनन-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

निदिध्यासने तु चित्तस्य प्रत्यगात्मप्रवणतासंस्कारपरिनिष्पन्नतदेकाग्रवृत्तिकार्य-द्वारेण ब्रह्मानुभवहेतुतां प्रतिपद्येते इति फलं प्रत्यव्यवहितकरणत्व विशिष्टशब्दा-वधारणस्य व्यवहिते मनननिदिध्यासने तदङ्गेऽङ्गीक्रियेते' इति ।

श्रवणादिषु च मुमुक्षूणामधिकारः, काम्ये कर्मणि फलकामस्याधिकारित्वात् । मुमुक्षायां च नित्यानित्यवस्तुविवेकस्येहामुत्रार्थफलभोगविरागस्य शमदमोपरतिति-तिक्षासमाधानश्रद्धानां च विनियोगः ।

अन्तरिन्द्रियनिग्रहः शमः । बहिरिन्द्रियनिग्रहो दमः । विक्षेपाभाव उपरतिः । शीतोष्णादिद्वन्द्वसहनं तितिक्षा । चित्तैकाग्र्यं समाधानम् । गुरुवेदान्तवाक्ये विश्वासः श्रद्धा । अत्रोपरमशब्देन संन्यासोऽभिधीयते, तथा च संन्यासिनामेव श्रवणाधिकार इति केचित् । अपरे तु उपरमशब्दस्य संन्यासवाचकत्वाभावाद्वि-क्षेपाभावमात्रस्य गृहस्थेष्वपि सम्भवात्, जनकादेरपि ब्रह्मविचारस्य श्रूयमाण-त्वात्सर्वाश्रमसाधारणं श्रवणादिविधानमित्याहुः ।

सगुणोपासनमपि चित्तैकाग्र्यद्वारा निर्विशेषब्रह्मसाक्षात्कारे हेतुः । तदुक्तम्— निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ।

ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः ॥ १ ॥

वशीकृते मनस्येषां सगुणब्रह्मशीलनात् ।

तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पनम् ॥ २ ॥ इति ।

सगुणोपासकानां चार्चिरादिमार्गेण ब्रह्मलोकगतानां तत्रैव श्रवणा-दुत्पन्नतत्त्वसाक्षात्काराणां ब्रह्मणा सह मोक्षः । कर्मिणां तु धूमादिमार्गेण पितृ-लोकगतानामुपभोगेन कर्मक्षये सति पूर्वकृतसुकृतदुष्कृतानुसारेण ब्रह्मादिस्था-वरान्तेषु पुनरुत्पत्तिः । तथा च श्रुतिः 'रमणीयचरणा रमणीयां योनिमापद्यन्ते, कपूयचरणाः कपूयां योनिमापद्यन्ते' (छा० ५-१०-१) इति । प्रतिषिद्धानुष्ठा-यिनां तु रौरवादिनरकविशेषेषु तत्तत्पापोपचिततीव्रदुःखमनुभूय श्वशूकरादितिर्यग्यो-निषु स्थावरादिषु चोत्पत्तिरित्यलं प्रसङ्गादागतप्रपञ्चेनेति ।

निर्गुणब्रह्मसाक्षात्कारवतस्तु न लोकान्तरगमनम्, 'न तस्य प्राणा उत्क्रा-मन्ति' इति श्रुतेः । किन्तु यावत्प्रारब्धकर्मक्षयं सुखदुःखे अनुभूय पश्चादपवृज्यते ।

ननु 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' (मु० ३-८) इत्यादि-श्रुत्या, 'ज्ञानाग्निःसर्वकर्माणि भस्मसात्कुरुते तथा' (भ० गी० ४-३७) इत्यादिस्मृत्या च ज्ञानस्य सकलकर्मक्षयहेतुत्वनिश्चये सति प्रारब्धकर्मावस्थानमनु पपन्नमिति चेत् ? न ; 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये' (छा० ६-१४-२) इत्यादिश्रुत्या 'नाभुक्तं क्षीयते कर्म' इत्यादिस्मृत्या चोत्पादित-कार्यकर्मव्यतिरिक्तानां सञ्चितकर्मणामेव ज्ञानविनाशित्वावगमात् ।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सञ्चितं द्विविधम्—सुकृतं दुष्कृतं चेति। तथा च श्रुतिः—'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्' इति। ननु ब्रह्मज्ञानान्मूलाज्ञाननिवृत्तौ तत्कार्यप्रारब्धकर्मणोऽपि निवृत्तिः, कथं ज्ञानिनो देहधारणमुपपद्यते ? इति चेत् ? न ; अप्रतिबद्धज्ञानस्यैवाज्ञाननिवर्तकतया प्रारब्धकर्मरूपप्रतिबन्धकदशायामज्ञाननिवृत्तेरनङ्गीकारात्।

नन्वेवमपि तत्त्वज्ञानादेकस्य मुक्तौ सर्वमुक्तिः स्यात्, अविद्याया एकत्वेन तन्निवृत्तौ क्वचिदपि संसारायोगादिति चेत् ? न ; इष्टापत्तेरित्येके। अपरे त्वेतद्दोषपरिहाराय 'इन्द्रोमायाभिः' इति बहुवचनश्रुत्यनुगृहीतमविद्यानानात्वमङ्गीकर्तव्यमित्याहुः।

अन्ये त्वेकैवाविद्या, तस्या एवाविद्याया जीवभेदेन ब्रह्मस्वरूपावरणशक्तयो नाना। तथा च यस्य ब्रह्मज्ञानं तस्य ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाशः, न त्वन्यं प्रति ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाश इत्यभ्युपगमाद् नैकमुक्तौ सर्वमुक्तिः।

अत एव 'यावदधिकारमवस्थितिराधिकारिकाणाम्' (ब्र० सू० १-३-३२) इत्यस्मिन्नधिकरणेऽधिकारिपुरुषाणामुत्पन्नतत्त्वज्ञानानामिन्द्रादीनां देहधारणानुपपत्तिमाशङ्क्याधिकारापादकप्रारब्धकर्मसमाप्त्यनन्तरं विदेहकैवल्यमिति सिद्धान्तितम्।

तदुक्तमाचार्यवाचस्पतिमिश्रैः—

उपासनादिसंसिद्धितोषितेश्वरचोदितम्।
अधिकारं समाप्यैते प्रविशन्ति परं पदम्॥ इति।

एतच्चैकमुक्तौ सर्वमुक्तिरिति पक्षे नोपपद्यते। तस्मादेकाविद्यापक्षेऽपि प्रतिजीवमावरणभेदोपगमेन व्यवस्थोपपादनीया। तदेवं ब्रह्मज्ञानान्मोक्षः, स चानर्थनिवृत्तिर्निरतिशयब्रह्मानन्दावाप्तिश्चेति सिद्धं प्रयोजनम्।

इति श्रीधर्मराजदीक्षितविरचितायां वेदान्तपरिभाषायामष्टमः
परिच्छेदः समाप्तः॥ ८॥

समाप्तोऽयं ग्रन्थः

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

॥ श्री गुरवे नमः ॥

वेदान्त-परिभाषा

श्रीविद्यानन्दजिज्ञासुप्रणीता—

परीक्षाब्धि-सन्तरणी

प्रश्न १—मोक्षस्य परमपुरुषार्थत्वं कथम् ? ज्ञानगतप्रत्यक्षत्वप्रयोजकं किम् ? अन्तःकरणस्य बहिर्निगमनप्रकारश्च कः ?

उत्तर—अथ पुरुषैरर्थ्यमानेषु धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परम पुरुषार्थः। तत्र परमत्वं नाम निरतिशयत्वे सति क्षयशून्यत्वम्। तच्च मोक्षस्यैवास्ति। तथाहि 'न स पुनरावर्तते न स पुनरावर्तते' 'यद्गत्वा न निवर्तन्ते तद्धाम परमं मम' 'अनावृत्तिः शब्दादनावृत्तिः शब्दात्' इत्यादिभिः श्रुतिस्मृतिसूत्रवाक्यैस्तस्य नित्यत्वमवगम्यते। ननु धर्मार्थकामाख्येषु पुरुषार्थेषु पुरुषार्थत्वानित्यत्वयोः साहचर्यदर्शनेन मोक्षेऽपि पुरुषार्थत्वादिनाऽनित्यत्वमनुमेयमिति चेन्न, आत्मसंस्थितेरेव मोक्षपदार्थत्वात्। तथा च क्रियाजन्यं फलं चतुर्विधं भवति, संस्कार्यं विकार्यमुत्पाद्यमाप्यञ्चेति। तत्रात्मनो नित्यशुद्धत्वापापविद्धत्वेन संस्कार्यत्वाभावः, नित्यकूटस्थस्वरूपत्वेन विकार्यत्वाभावः, नित्यसिद्धत्वनोत्पाद्यत्वाभावः तथाऽऽत्मस्वरूपत्वेन नित्यप्राप्तत्वादाप्यत्वाभावोऽप्यस्ति। अतः क्रियाजन्यानां चतुर्विधफलानां तत्रासम्भवित्वेनानित्यत्वानुमानस्य दूरे निरस्तत्वात्।

ज्ञानगतप्रत्यक्षत्वप्रयोजकं नाम प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभिन्नत्वम्, तथाहि निरुपाधिकस्य चैतन्यस्याभिन्नत्वेऽपि उपाधिभेदेनं तत्र भेदः स्वीक्रियते। प्रमातृचैतन्यं प्रमाणचैतन्यं विषयचैतन्यं चेति। तत्र यथा मठान्तर्वर्तिघटावच्छिन्नाकाशो मठावच्छिन्नाकाशान्नभिद्यते, एवं घटोऽयमिति प्रत्यक्षावसरे घटाकारवृत्त्यविच्छिन्नचैतन्यघटावच्छिन्नचैतन्ययोरेकदेशस्थत्वेनाभिन्नत्वात् घटज्ञानस्य घटांशे प्रत्यक्षत्वम्। सुखाद्यवच्छिन्नचैतन्यस्य तदाकारवृत्त्यवच्छिन्नचैतन्यस्य च नियमनैकदेशस्थितोपाधिद्वयावच्छिन्नत्वात् नियमेनाहं सुखीति ज्ञानस्य प्रत्यक्षत्वम्। एवं तत्तद्वृत्त्यवच्छिन्नचैतन्यस्य तत्तदिन्द्रियोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तिमस्तस्मिन् ज्ञानांशे प्रत्यक्षत्वप्रयोजकंपूर्वोक्तलक्षणेन विवक्षितम्। तत्र स्वकीयधर्माधर्मयोः शाब्दज्ञानेऽतिव्याप्तिवारणाय योग्यत्वं विषयविशेषणम्, स्मर्यमाणसुखस्यातीतस्य स्मृतिज्ञानेऽतिव्याप्तिवारणाय वर्तमानत्वं विषयविशेषणम् दत्तम्। अथ वेदान्तसिद्धान्तेऽन्तःकरणं

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

नाणुपरिमाणं, वृत्तेरसम्भवापातात्, नापि विभु परिमाणम्, उत्क्रान्त्याद्यभाव-प्रसङ्गात्, नापि मध्यमपरिमाणं देहादिवन्मन्दगतित्वेन झटिति विषयप्रतिभासा-नुपपत्तेरान्तरस्य बहिर्गमनानुपपत्तेश्चेतिचेन्न तस्यमध्यमपरिमाणवत्वाभ्युपगमात्, तैजसत्वेनाऽतिस्वच्छतया सवितृकिरणवच्छीघ्रप्रसरोपपत्योक्तदोषाभावात्। तथाहि यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य चतुष्को-णाद्याकारं भवति तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादि-विषयदेशंगत्वा घटादि विषयाकारेण परिणमते, स एव परिणामो वृत्ति रित्युच्यते। अनुमित्यादिस्थले तु बह्न्यादेश्चक्षुराद्यसन्निकर्षात् नान्तःकरणस्य बह्न्यादि देशगमनं भवति तथा चायं घट इत्यादिप्रत्यक्षस्थले घटादिविषयस्य तदाकार वृत्तेश्चैकत्र बहिर्देशे समवधाना तदुभयावच्छिन्नं चैतन्यमेकमेव, विभाजकयो-रप्यन्तःकरणवृत्ति घटादिविषययोरेकदेशस्थत्वेन भेदाजनकत्वादिति भावः।

प्रश्न २—प्रमायाः किं लक्षणम् ? धारावाहिकज्ञानस्थले कथं लक्षण-समन्वयः ?

उत्तर—अथेह पुरुषैः प्रार्थ्यमानेषु धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषा-र्थेषु परमपुरुषार्थोमोक्षो ब्रह्मात्मैक्यज्ञानादेव भवति, 'तमेव विदित्वाति मृत्यु-मेति' इतिश्रुतेः। अतोऽत्र परिभाषायां ब्रह्म-तज्ज्ञानं तत्प्रमाणं चेतिनिरूपणा-वसरे पूर्वं प्रमाण-निरूपणप्रसङ्गे प्रमायाः करणं प्रमाणम् प्रमात्वं च स्मृतिव्या-वृत्तमनधिगताबाधितविषयज्ञानत्वम्। अत्र स्मृतावतिव्याप्तिवारणाय अनधि गतेतिपदम्, शुक्तिरूप्यज्ञानादावतिव्याप्तिवारणाय अबाधितेतिपदं ज्ञेयम्। स्मृतिसाधारणं स्वबाधितविषयज्ञानत्वं प्रमात्वमिति। नन्वयं घटोऽयं घट इत्येव-मादिरूपधारावाहिकबुद्धिस्थले द्वितीयादिज्ञानानामधिगतविषयत्वात् प्रमायाः प्रथमलक्षणं तत्राव्याप्तमिति चेन्न इदानीं घटो वर्तते इत्येवंरूपानन्यथासिद्धप्रती-तिबलेन महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वस्य कालातिरिक्तद्रव्यचाक्षुषत्वप्रयोज-कत्वकल्पनात्। अन्यथा नीरूपस्य रूपस्याचाक्षुषत्वापत्तेः। एवं च नीरूपस्यापि कालस्य प्रत्यक्षप्रमाणजन्यानुभवविषयत्वाभ्युपगमेन धारावाहिकद्वितीयादि-बुद्धेरपि पूर्वपूर्वक्षणकालीनज्ञानाविषयतत्तदुत्तरक्षणविशेषविषयकत्वेन न धारा-वाहिकबुद्धिस्थलेऽव्याप्तिरिति भावः।

नन्वेवं तर्ह्याकाशे बलाकेति प्रतीतिबलादाकाशस्यापि प्रत्यक्षत्वंस्यात्, इष्टापत्तित्वस्वीकारे तज्ज्ञानाय शब्दलिङ्गकानुमानाननुसरणापत्तेः 'अप्रत्यक्षे ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति' इति भाष्यकृद्वचनविरोधाच्च। तस्मात्सुरभि चन्दनमित्यादि सौरभांशे परोक्षत्ववत्कालांशेऽपि परोक्षत्वमेवाभ्युपेयं न चाक्षुष-त्वम्। नीरूपस्य रूपस्य चाक्षुत्वं स्वद्रव्यत्वादविरुद्धम्। तथा च नीरूपस्य

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तत्तल्लक्षणस्याचाक्षुषत्वाद् धारावाहिकबुद्धिस्थलेऽव्याप्तिस्तद्वस्थैवेति चेन्न सिद्धान्ते तत्र ज्ञानभेदानङ्गीकारेण घटोऽयं घटोऽयमिति घटस्फुरणं यावद् घटाकारान्तःकरणवृत्तेरेकस्या एव स्वीकारात्, घटाद्याकारवृत्तेः स्वविरोधि पटाकारवृत्त्युत्पत्तिपर्यन्तं स्थायित्वाभ्युपगमात्। एतेन जागरणात् सुषुप्ति-पर्यन्तं लाघवादेकैव वृत्तिः कुतो नाभ्युपगम्यते इति परास्तम्, स्वविरोधिवृत्त्यु-त्पत्तिकाले तत्स्थितेरसम्भवेन न तस्यास्तावत्पर्यन्तं स्थायित्वमभ्युपगन्तुं शक्यते इति। एवं वृत्तिप्रतिफलितस्य चैतन्यस्य घटादिज्ञानत्वेन वृत्तेरेकत्वसिद्ध्या तत्प्रतिफलितचैतन्यरूपघटादिज्ञानस्यापि तत्रैकत्वं सिद्धतीति नाव्याप्ति शङ्कापि। किं च प्रमालक्षणेऽबाधितपदेन संसारदशायामबाधितत्वं विवक्षितम्। तेन सिद्धान्ते पारमार्थिकदृष्ट्या घटादेर्मिथ्यात्वेन बाधितत्वादपि व्यावहारिकदृष्ट्या संसारदशायामबाधितत्वान्न घटादिप्रमायामव्याप्तिरिति संक्षेपः।

प्रश्न ३—प्रत्यक्षस्थले भिन्नोपाधिसद्भावेऽपि कथं चैतन्याऽभेदः ?

उत्तर—अथ ब्रह्मचैतन्यमेव प्रत्यक्षप्रमा, तस्यानादित्वेऽपि चैतन्याभि व्यञ्जकवृत्त्युत्पत्तयेऽन्तःकरणस्य चक्षुरादिद्वारानिर्गमनसम्भवेन वृत्तिविशिष्टं चैतन्यमादिमत् इत्युच्यते। एवं प्रमातृप्रमाणविषयरूपोपाधिभेदेषु अस्ति, भाति, प्रिय इतिरूपेण सर्वत्रानुगतं चैतन्यं सर्वाधिष्ठानमेकमेव। तदेव प्रमातृचैतन्यं प्रमाण चैतन्यं विषय-चैतन्यं चेतिशब्दैर्व्यवह्रियते। यथा सत्यपि नभसोऽभिन्नत्वे घटमठाद्युपाधिभेदेन घटाकाशो मठाकाशो जलाकाशो महदाकाशश्चेति भेदव्यवहारः। किन्तु तेषामेवोपाधीनामेकदेशस्थत्वेन तदुपहितानामाकाशानां भेदाभावः, नहि मठान्तर्वर्ती घटो मठाकाशाद् घटाकाशं भिनत्ति। एवं देशभेदवत् कालभेदोऽप्युपधेयभेदप्रयोजकोऽवगन्तव्यः। तथा चायं घट इति प्रत्यक्षस्थले घटाकारवृत्तेर्घटसंयोगितया घटावच्छिन्नचैतन्यस्य घटाकारवृत्त्यवच्छि-न्नचैतन्यस्य चाभिन्नतया तत्र घटज्ञानस्य घटांशे प्रत्यक्षत्वमित्युक्तम्। न च प्रमाणचैतन्यस्य विषयचैतन्यस्य चोपाधिभेदेनभिन्नत्वात्कथं तयोरभिन्नत्वमिति वाच्यम् भिन्नदेशस्थितयोरुपाध्योरुपधेयभेदप्रयोजकतया तयोः समानदेशस्थ-त्वेन भेदाप्रयोजकत्वात्। यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारा-न्प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति एवं तैजसमन्तःशरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते। स एव परिणामो वृत्तिरित्युच्यते। तस्मादयं घट इत्यादिप्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहि-रेकत्र देशसमवधानात्तदुभयावच्छिन्नं चैतन्यमेकमेव न भिन्नम्, विभाजक-योरन्तःकरणवृत्तिघटादिविषययोरेकदेशस्थत्वेन भेदाजनकत्वादिति भावः।

प्रश्न ४—मनसः सावयवत्वमनिन्द्रियत्वञ्च साधयत।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

उत्तर—अथ सर्वेषामिन्द्रियाणां चक्षुरादीनां स्वस्वविषयैः सह सन्निकर्षसत्त्वेऽपि युगपज्ज्ञानानुत्पत्तिमनसोलिङ्गं नैयायिका मन्यते, तच्च मनो निरवयवत्वेनाकाशवदपरिणामि। एवं चान्तःकरणस्य परिणामात्मिकाया वृत्तेरवासम्भवेन वृत्तिविशिष्टं चैतन्यं ज्ञानं वेदान्तिभिः कथं वक्तुं शक्येत। तस्मादात्मभिन्नमेव ज्ञानमिन्द्रियार्थसन्निकर्षजन्यं प्रत्यक्षमिति चेन्न, अन्तःकरणं न निरवयवं सादिद्रव्यत्वाद् घटवदित्यनुमानेन भवदुक्तहेतोरसिद्धत्वेन सादिद्रव्यत्वहेतुना सिद्धेन सावयवत्वेन तत्परिणामित्वानुमानात्। एवं चान्तःकरणस्य परिणामरूपाया वृत्तेः सम्भवेन तादृशवृत्तिविशिष्टं चैतन्यमेव ज्ञानं, न तु तद्भिन्नमित्यदोषः। मनःसादित्वे 'तन्मनोऽसृजत' इति श्रुतिर्मानम्। वृत्तिरूपज्ञानस्य मनोधर्मत्वे 'कामः सङ्कल्पः·····धीर्भीरित्येतत्सर्वं मन एव' इति श्रुतिर्मानम्। तत्र धीशब्देन वृत्तिरूपज्ञानस्यैवाभिधानमस्ति। अतएव कामादेरपि मनोधर्मत्वम्। नन्वहमिच्छाम्यहं जानामीत्याद्यनुभवस्य कामादेरात्मधर्मत्वेनावगाहमानस्य विरोधात्तेषां कामादीनामन्तःकरणधर्मत्वं नोपपद्यते, श्रुतिस्तु आयुर्वैघृतमिति वद्गौणचरितार्थेति चेन्न, अयः पिण्डस्य दग्धृत्वाभावेऽपि दग्धृत्वाश्रयवह्नितादात्म्याध्यासेन अयोदहतीति व्यवहारवत्कामादीनामपि सुखाद्याकारपरिणाम्यन्तःकरणैक्याध्यासेनात्मधर्मत्वेनावगाहमानानां त्वदुक्तव्यवहारोपपत्त्याऽविरोधात् श्रुतेरुपचरितार्थत्वेमानाभावात् श्रुत्यन्तरविरोधाच्च। न चान्तःकरणमतीन्द्रियम् इन्द्रियत्वाच्चक्षुरादिवदित्यनुमानेनतस्यातीन्द्रियत्वात्कथमहमिति प्रत्यक्षविषयतेति वाच्यम् अन्तःकरणस्येन्द्रियत्वे प्रमाणाभावात् पक्षे हेतुस्वरूपासिद्ध्याऽतीन्द्रियत्वासिद्ध्या त्वदुक्तप्रत्यक्षविषयत्वाभावासिद्धेः। अनिन्द्रियेणापि मनसा इन्द्रियगतषट्त्वसंख्यापूरणाविरोधेन 'मनः षष्ठानीन्द्रियाणि' इतिभगवद्गीतावचनं न तत्र मानम्। नहीन्द्रियगतसंख्यापूरणमिन्द्रियेणैवेति नियमः, 'यजमानपञ्चमा एतां भक्षयन्ति' इत्यत्र, ऋत्विग्गतपञ्चत्वसंख्याया अनृत्विजापि यजमानेन पूरणदर्शनात्। 'वेदानध्यापयामास महाभारतपञ्चमानि' इत्यत्र वेदगतपञ्चत्वसंख्याया अवेदेनापि महाभारतेन पूरणदर्शनात्। 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः' इति श्रुत्या इन्द्रियपरार्थेभ्यः परत्वप्रतिपादनेन मनसोऽनिन्द्रियत्वबोधकत्वाच्च। न च मनसोऽनिन्द्रियत्वे प्रत्यक्षस्येन्द्रियजन्यत्वादनिन्द्रियरूप मनोजन्यसुखाद्युपलब्धेः प्रत्यक्षत्वं न स्यात्। तस्मात्तत्प्रत्यक्षत्वसिद्धये मनसोऽवश्यमिन्द्रियत्वमभ्युपेयमिति वाच्यम् इन्द्रियजन्यत्वेन प्रत्यक्षत्वाभ्युपगमेऽनुमित्यादेरपि त्वदभिमतमनोरूपेन्द्रियजन्यतया प्रत्यक्षत्वापत्तेः। न चेन्द्रियत्वेनेन्द्रियजन्यत्वमेव प्रत्यक्षत्वप्रयोजकमनुमित्यादेश्च मनस्त्वेन मनोजन्यत्वान्न तत्रातिव्याप्तिरितिवाच्यम्, ईश्वरज्ञानस्यानिन्द्रियजन्यतया तत्रप्रत्यक्षत्वलक्षणस्याव्याप्तेः।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तस्मान्मनसः सावयवत्वमनिन्द्रियत्वं चावश्यमभ्युगन्तव्यम् ।

प्रश्न ५—जातित्वोपाधित्वपरिभाषायः सकलप्रमाणागोचरतया अप्रामाणिकत्वादिति ग्रन्थस्याशयो विशदीकरणीयः ।

उत्तर—ननु वेदन्तपरिभाषायां ज्ञानगतप्रत्यक्षत्वप्रयोजकनिरूपणावसरे तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्यस्य तत्तद्विषयाकारान्तःकरणवृत्यवच्छिन्नचैतन्याभिन्नत्वं ज्ञानगतप्रत्यक्षत्वप्रयोजकमित्युक्तम् । तत्र दशमस्त्वमसीत्यादिवस्तुसन्निकृष्टविषये 'पर्वतो वह्निमानित्यादिस्थलेऽपि पर्वतांशे ज्ञानमपरोक्षमेव, पर्वताद्यवच्छिन्नचैतन्यस्य वह्निर्निः सृतान्तःकरणवृत्त्यवच्छिन्नचैतन्याभेदात्, केवलं वह्न्यंशे तज्ज्ञानं परोक्षं, तदंशेऽन्तःकरणवृत्तिनिर्गमनासम्भवेन वह्न्यवच्छिन्नचैतन्यस्य प्रमाणचैतन्यस्य च परस्परं भेदात् । एवं चैकत्र ज्ञाने परोक्षत्वापरोक्षत्वयोरभ्युपगमे तयोर्जातिबाधकसांकर्यदोषग्रस्तत्वेन जातित्वं न स्यादिति चेन्न, इष्टापत्तेः । जातित्वोपाधित्वपरिभाषायाः सकल प्रमाणागोचरतयाऽप्रामाणिकत्वात् । तत्रायमाशयः नित्यत्वे सत्यनेकसमवेतत्वं जातित्वमिति तार्किकाः । अयं घटोऽयं घट इति निखिलेषु घटेष्वनुगतप्रतीत्या घटनिष्ठस्यासाधारणधर्मस्य घटत्वस्य जातित्वमवगम्यते । घटघटत्वयोर्धर्मधर्मिणोः सम्बन्धः समवायः इत्यादिकं बहुविधं जल्पन्ति । किन्तु विचारदृष्ट्या घटोऽयमित्यादि प्रत्यक्षं घटत्वादिसद्भावे मानं न तु तस्य जातित्वेऽपि प्रमाणम् । न च प्रत्यक्षप्रमाणाभावेऽपि घटत्वादिकं जातिः, उपाधिभिन्नसामान्यधर्मत्वात्सत्त्वादिवत्यनुमानं तत्र मानमिति वाच्यम् नित्यानेकसमवेतत्वलक्षणस्य जातित्वरूपसाध्यस्याप्रसिद्धौ तदधीनव्याप्तिज्ञानाद्यभावेनानुमानानुदयात् । समवायासिद्ध्या ब्रह्माभिन्ननिखिलप्रपञ्चस्यानित्यतया नित्यत्वसमवेतत्वघटितजातित्वस्य घटत्वादावसिद्धेश्च । तथा च रूपी घटः मृद् घट इति प्रत्ययस्य संयोगानवगाहित्वेन परिशेषात् समवायस्वीकारेपि स्वसमवायिभ्यां भिन्नस्य समवायस्य सम्बन्धाय सम्बन्धान्तरस्वीकारप्रसक्त्याऽनवस्थापातः । एवं प्रत्यक्षेण कार्यत्वब्रह्माभिन्नत्वादिलिङ्गकानुमानेन 'वाचारम्भणश्रुत्या च ब्रह्माभिन्ननिखिलप्रपञ्चस्यानित्यत्वेन घटत्वादौ जातित्वासिद्धेः । तथा नीलोऽयं घट इत्यादि प्रत्यक्षस्य नीलघटत्वसद्भावे प्रमाणतया तस्योपाधित्वेऽप्रमानत्वात्, उपाधित्वरूपसाध्याप्रसिद्धौ तत्साधकानुमानस्याप्यनवकाशादिति बोध्यम् ।

प्रश्न ६—विषयगतप्रत्यक्षत्वस्य किं प्रयोजकम् ?

उत्तर—अथ इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति स्वीकारेऽनुमित्यादेरपि मनोजन्यता साक्षात्त्वापत्तेः, ईश्वरज्ञानस्यानिन्द्रियजन्यस्य साक्षात्त्वानापत्तेश्चेत्यादियुक्त्या इन्द्रियार्थसन्निकर्षजन्यत्वं प्रत्यक्षत्वप्रयोजकंवेदान्तिभिर्निरस्तम् ।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सहि प्रत्यक्षत्वप्रयोजकं किमिति जिज्ञासायां ज्ञानगतप्रत्यक्षत्वप्रयोजकं विषयगतप्रत्यक्षत्वप्रयोजकं च विभज्य परिभाषायां प्रदर्शितम्। तत्र घटादेर्विषयस्य प्रत्यक्षत्वं = प्रत्यक्ष ज्ञानविषयत्वं नामप्रमातृचैतन्याभिन्नत्वमिति। ननु घटमहं पश्यामीति भेदानुभवविरोधेन घटावच्छिन्नचैतन्यस्य प्रमात्रभिन्नत्वं, जडत्वेन घटादेर्विषयस्य वा प्रमात्रभिन्नत्वं कथं सम्भवेदिति चेन्न तत्राभिन्नत्वपदेन प्रमातृसत्तारिरिक्तसत्ताकत्वाभावस्य विवक्षितत्वात्। तथा च घटादेः स्वावच्छिन्नचैतन्येऽध्यस्ततया विषयचैतन्यसत्तैवघटादिसत्ता, अधिष्ठानसत्तातिरिक्ताया आरोपितसत्ताया अनङ्गीकारात्। विषयचैतन्यस्य, तडागोदकस्य कुल्यात्मना निर्गमनरीत्याऽन्तःकरणस्य निर्गमनसम्भवेन तदवच्छिन्नचैतन्याभिन्नत्वमेवेति प्रमातृचैतन्यस्यैव घटाद्यधिष्ठानतया प्रमातृसत्तैव घटादिसत्ता नान्येति सिद्धं घटादेरपरोक्षत्वम्। अनुमित्यादिस्थले स्वन्तःकरणस्य वह्न्यादिदेशनिर्गमनाभावेन वह्न्यवच्छिन्नचैतन्यस्य प्रमातृसत्तानात्मकतया वह्न्यादिसत्ता प्रमातृसत्तातो भिन्नेति न तत्रातिव्याप्तिः। एतदर्थमेव चैतन्यपदं विहाय प्रमातृपदोपादानमिति। एवं धर्माधर्मादेरनुमित्यादिस्थले धर्मादीनां प्रत्यक्षत्वापत्तिवारणाय योग्यत्वस्यापि विषयाविशेषणत्वं देयम्। तथा च योग्य विषयस्य प्रमात्रभिन्नत्वलक्षणस्य प्रत्यक्षत्वस्य धर्मादावभावान्नातिव्याप्तिरितिभावः। नचैवं रूपी घट इति घटगतरूपप्रत्यक्षदशायां तद्गतपरिमाणादेरपि प्रत्यक्षत्वापत्तिः, घटगतरूपपरिमाणादीनां समानचैतन्याध्यस्तत्वेनैकतया रूपावच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेददशायां परिमाणाद्यवच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नत्वेन परिमाणादिसत्तायाः प्रमातृसत्तातिरिक्तत्वाभावादिति वाच्यम् तत्तदाकारवृत्त्युपहितत्वस्यापि प्रमातृविशेषणत्वात्। रूपाकारवृत्तिदशायां परिमाणाद्याकारवृत्त्यभावेन तत्र परिमाणाद्याकारवृत्त्युपहितप्रमातृसत्तातिरिक्तसत्ताशून्यत्वाभावान्नातिव्याप्तिः। एवं चानवस्थाभयेन वृत्तिगोचरवृत्त्यनङ्गीकारेऽपि 'घटमहं जानामीति वृत्तेर्वृत्त्यन्तरानपेक्षस्वरूपस्य स्वविषयत्वस्याभ्युपगमेन स्वविषयवृत्त्युपहितप्रमातृचैतन्यसत्ताऽभिन्नसत्ताकत्वस्य तत्रापि सत्वान्नाव्याप्तिः। न चान्तःकरणतद्धर्मादीनां वृत्तिविषयत्वाभ्युपगमे केवलसत्त्विविषयत्वाभ्युपगमविरोधः इतिवाच्यम् केवलपदं न वृत्तिनिरासार्थमपि तु इन्द्रियानुमानादिनप्रमाणव्यापरनिवृत्त्यर्थमिति स्वीकारे विरोधाभावात्। अतः एवाहंकारटीकायामाचार्यप्रकाशात्मयतिभिरहंवृत्त्यवच्छिन्नमेवान्तःकरणं चैतन्यविषयभावमापद्यते इत्यादिनाहमाकारान्तःकरणवृत्तिरङ्गीकृता। अतः एव प्रातिभासिकरजतस्थले रजताकाराविद्यावृत्तिः सर्वज्ञमुनिप्रमुखैः साम्प्रदायिकैरङ्गीकृता। तस्माद् घटादिविषयाकारवृत्त्युपहितप्रमातृचैतन्यसत्तातिरिक्तसत्ताकत्वशून्यत्वे सति योग्यत्वं विषयस्य प्रत्यक्षत्वम्। तत्र संयोगादिसन्निकर्षाणां चैतन्याभिव्यञ्जकवृत्तिजनने विनियोगः इति फलितम्।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

प्रश्न ७—जीवसाक्षीश्वरसाक्षिणोः स्वरूपं निरूप्य विशेषणोपाधिलक्षणोदाहरणप्रदर्शन-पूर्वकं मायाया एकत्वं समर्थयत ?

उत्तर—अथ प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्येनाभिन्नात्मकम् ज्ञानं संसर्गावगाहित्वानवगाहित्वभेदेऽपि चैतन्यरूपमेकमेव सद् जीवेश्वरसाक्षिभेदेन द्विविधम्। तत्र जीवो नामान्तःकरणावच्छिन्नं चैतन्यम् जीवसाक्षि तु अन्तःकरणोपहितं चैतन्यम्। अतःकरणस्य विशेषणत्वे चैतन्यस्य जीवत्वम्, तस्योपाधित्वे चैतन्यस्य जीवसाक्षित्वमिति तयोर्भेदः। कार्यान्वयित्वे सति वर्तमानत्वे सति व्यावर्तकत्वं विशेषणत्वं, कार्यानन्वयित्वे सति वर्तमानत्वे सति व्यावर्तकत्वमुपाधित्वमिति। एवं च रूपविशिष्टो घटोऽनित्य इत्यत्र रूपस्य कार्यान्वयित्वादिसत्त्वाद्विशेषणत्वम्। कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रमित्यत्र कर्णशष्कुल्याः कार्यानन्वयित्वादिविद्यमानत्वादुपाधित्वम्। प्रकृते चान्तःकरणस्य जडतया विषयप्रकाशत्वायोगात् नानावृत्त्यवच्छिन्नेन नानाचैतन्येन समस्तविषयानुसन्धातृत्वानुपपत्तेः प्रमात्रा चासहायेन विषयानुसन्धानं न स्यात्। अतः प्रमात्रन्वितो ब्रह्माभिन्नोऽन्तःकरणोपहितः साक्षी स्वीकार्यः। तथा चान्तःकरणस्य जीवसाक्षि चैतन्योपाधित्वमावश्यकमिति भावः।

एवं मायावच्छिन्नं चैतन्यमीश्वरः तदुपहितं चेश्वरसाक्षीति ईश्वरत्वतत्साक्षित्वयोर्भेदः न तु धर्मिणोरीश्वरतत्साक्षिणोः। अयमत्रविशेषः मैत्रावगते चैत्रस्याप्यनुसन्धानप्रसङ्गोमाभूत् एतदर्थं जीवसाक्षी प्रतिशरीरं नाना, किन्तु ईश्वरोपाधिभूतमायाया एकत्वेनेश्वरसाक्षि मायोपहितं चैतन्यमेकमेव। ननु मायाया एकत्वे 'इन्द्रो मायाभिरिति श्रुतिविरोध इति चेन्न तत्र बहुवचनस्य मायागतशक्तिविशेषाभिप्रायतया मायागतसत्त्वरजस्तमोगुणाभिप्रायतया वोपपत्तेः। न च मुख्यार्थपरित्यागे कारणाभाव इति वाच्यम् "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" "अजामेकां लोहितशुक्लकृष्णाम्" "अविद्यायामन्तरे वर्तमानाः" "तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते। योगी माया ममेयाय तस्मै विद्यात्मने नमः" "मम माया दुरत्यया" इत्यादिश्रुतिस्मृतिषु एकवचनबलेन लाघवानुगृहीतेन मायाया एकत्वनिश्चयात्। तस्या अनादित्वेनैकत्वेन च तदुपहितस्येश्वरसाक्षिणोऽनादित्वमेकत्वं च निश्चीयते इति।

प्रश्न ८—उपाधिविशेषणयोः परिणामविवर्तयोश्चकिमन्तरम् ?

उत्तर—अथ प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभिन्नत्वरूपस्य ज्ञानगतप्रत्यक्षत्वप्रयोजकस्य स्वरूपमवधार्य्य सविकल्पकनिर्विकल्पकभेदेन प्रत्यक्षं विभज्य जीवसाक्षीश्वरसाक्षिभेदेनप्रत्यक्षस्य द्वैविध्यं प्रदर्शितम् परिभाषायाम्, तत्रैकमेव चैतन्यं विशेषणयुक्तं विशिष्टमुपाधिसहितमुपहितं चाभिधीयते।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तयोः कार्यान्वयि वर्तमानं व्यावर्तकं चेति विशेषणम्, तथा कार्यानन्वयि वर्तमानं व्यावर्तकं चेत्युपाधिः। यथा रूपविशिष्टो घटोऽनित्यः इत्यत्र घटात्मके कार्ये रूपस्यान्वयित्वादिसत्त्वाद्विशेषणत्वम्। कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रमित्यत्र नभोरूपश्रोत्रात्मकोद्देश्यानन्वयित्वादिसत्त्वात् कर्णशष्कुल्याः श्रोत्रस्य उपाधित्वम्। एतयोर्विशेषणोपाध्योः कार्यान्वयित्वानन्वयित्वाभ्यां भेद इत्यवसेयम्।

अथ शुक्तिरजतभ्रमस्थले लोकसिद्धसामग्री रजतावयवात्मिका न प्रातिभासिकरजतोत्पादिका, किन्तु विलक्षणैव। तथाहि काचादिदोषदूषितलोचनस्य पुरोवर्त्तिद्रव्यसंयोगावसरे चक्षुरादिद्वारानिर्गतस्यान्तःकरणस्येदमाकारावृत्तौ सत्यामिदमवच्छिन्नं चैतन्यं वृत्त्यवच्छिन्नं चैतन्यं प्रमातृ चैतन्यं चाभिन्नं भवति। ततश्च प्रमातृचैतन्याभिन्नविषयचैतन्यनिष्ठा शुक्तित्वप्रकारिकाऽविद्या प्रातिभासिकरजताकारेण रजताकारवृत्तिरूपेण च परिणमते। तत्र किंनाम परिणामः किं च विवर्त्त इति जिज्ञासायां परिणामो नाम उपादानसमसत्ताकार्यापत्तिः। विवर्त्तो नाम उपादानविषमसत्ताकार्यापत्तिः। तत्रायमाशयः यदभिन्नं कार्यमुत्पद्यते, तदुपादानकारणम्। तेन समा सत्ता यस्य कार्यस्य तथाभूतकार्याकारेणोद्भवः। यथा व्यावहारिकसत्ताकदुग्धे दुग्धसमसत्ताकदधिरूपकार्यापत्तिर्दुग्धस्य परिणामरूपं कार्यं दधीति। तद्वत् प्रातिभासिकं रजतमनिर्वचनीयमनिर्वचनीयाविद्यासमसत्ताकं कार्यमित्यविद्यापेक्षया रजतं परिणामः किन्तु त्रिकालाबाध्यत्वपारमार्थिकचैतन्यसत्तापेक्षया विषमसत्ताकत्वेन प्रातिभासिकं रजतं चैतन्यस्य विवर्त इत्युच्यते। अविद्यापरिणामरूपं च तद्रजतं स्वोपादानभूताविद्याधिष्ठाने इदमवच्छिन्नचैतन्येऽध्यस्ततया वर्तते। अस्मन्मते सर्वस्यापि कार्यस्य स्वोपादानाविद्याधिष्ठानाश्रितत्वनियमात्। अतः परिणामोपादानयोः स्वोपादानसमसत्ताकत्वविषमसत्ताकत्वभेदेन भेदः। अत एवैकस्यैव प्रातिभासिकरजतादेः व्यावहारिकप्रपञ्चस्य च परिणाम्युपादानमविद्या विवर्त्तोपादानं च स्वोपादानाविद्याधिष्ठानं चैतन्यमिति सिद्धान्तः।

प्रश्न ९—शुक्तिरजतस्य साक्षिण्यध्यासेऽहं रजतमितिरजतवानिति वा प्रतीत्यापत्तिं निरस्य रजतगोचराविद्यावृत्तेः प्रयोजनं सुस्पष्टत ?

उत्तर—अथ इदं रजतमिति भ्रमस्थले प्रमातृचैतन्याभिन्नविषयचैतन्यनिष्ठायाः शुक्तित्वप्रकारिकाविद्याया रजतं रजतज्ञानाभासश्च परिणामः तथाऽविद्याधिष्ठानस्येदमवच्छिन्नचैतन्यस्य विवर्त्तः इति वेदान्तिभिः स्वीक्रियते। तत्रेयं शङ्का जागर्ति यत्किल भूतलस्थतन्तुषु विद्यमानस्य पटस्य प्रत्यक्षकाले इहेदानीं पट इति प्रत्ययो यथा, तथा चैतन्यनिष्ठाविद्यायां वर्त्तमानस्य शुक्तिरजतस्य चैतन्ये रजतमिति प्रत्ययो भवेत्, नत्विह रजतमिति। सर्वव्यापिनः चैतन्यस्ये

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

हेति प्रादेशिकत्वायोगादिति चेन्न न्यायमते ब्राह्मणोऽहं सुखी मम देहः सुखीत्येवमात्मनिष्ठस्यापि सुखादेः शरीरस्य सुखाद्यधिकरणतावच्छेदकतया शरीरनिष्ठत्वेनोपलम्भस्तथा इदमश्चैतन्ये रजताध्यासस्याधिष्ठानतावच्छेदकत्वेन रजतस्य पुरोवर्तिसंसर्गप्रत्ययोपपत्तेः। एवं विषयचैतन्यस्य तदन्तःकरणोपहित-चैतन्याभिन्नतया विषयचैतन्येऽध्यस्तमपि रजतं साक्षिण्यध्यस्तं केवलसाक्षिवेद्यं सुखादिवदनन्यवेद्यमिति चोच्यते। ननु न सर्वदा सुखादीनामवच्छेदकशरीर निष्ठत्वेनोपलम्भः अहं सुखीत्यात्मनिष्ठत्वेनाप्युपलम्भदर्शनात्। तथा रजतादेरप्यन्तःसाक्षिण्यध्यस्तत्वाभ्युपगमेन अहं मनुष्य इतिवदहं रजतमहं सुखीति वदहं रजतवानिति वा प्रत्ययः कदापि कुतो न भवतीति चेन्न सुखादीनां घटादिवत् शुद्धचैतन्ये एवाध्यासात्। तत्तदाकारानुभवाहितसंस्कार सहकृताविद्या-कार्यत्वस्य तत्तदाकारानुभवविषयत्वनियामकत्वात्। तथा चेदमाकारानुभवाहित-संस्कारसहकृताविद्याकार्यत्वेन घटादेरिदमाकारानुभवविषयत्वम्। अहमाकार-ानुभवाहितसंस्कारसहिताविद्याकार्यत्वादन्तःकरणादेरहमाकारानुभवविषयत्वम्। शरीरेन्द्रियादेरिदं शरीरमहं देहः इदं चक्षुरहं काण इत्यादिनोभय विधत्वं स्पष्टम्। प्रकृते च प्रातिभासिकरजतस्य प्रमातृचैतन्यांभिन्नेदमंशावच्छिन्नचैतन्यनिष्ठा-विद्याकार्यत्वेऽपि इदंरजतमिति सत्यस्थलीयेदमंशाकारानुभवाहितसंस्कारजन्यत्वा-दिदमाकारानुभवविषयता, न त्वहं रजतमित्यहमाकारानुभवविषयतेरतिभावः। न चैवं शुक्तिरजतस्येदमाकारानुभवविषयत्वेऽपि न तद्विषयाऽविद्यावृत्तिराश्रय-णीया, तस्य बाधादनावृत्तसाक्षिसम्बन्धितयाऽपरोक्षभानसम्भवादिति वाच्यम् स्वगोचरवृत्त्युपहितचैतन्यभिन्नसत्ताकत्वाभावस्य विषयापरोक्षरूपतया रजतस्या-परोक्षत्वसिद्धयेऽविद्यावृत्तेरवश्यमभ्युपेयत्वात् इति संक्षेपः।

प्रश्न १०—भ्रमस्थले प्रातिभासिकसत्तास्वीकारेऽपि त्रैकालिकनिषेधं सौपत्तिकं प्रदर्शयत।

उत्तर—ननु शुक्तिरजतस्याविद्याकार्यतया प्रतिभाससमये प्रातिभासिकसत्त्वाभ्यु-पगमे नेदं रजतमिति त्रैकालिकनिषेधज्ञानं न स्यात् किन्तु इदानीं घटः श्यामो नेतिवदिदानीमिदं न रजतमिति प्रत्ययः इति चेन्न विषयभेदेन विरोधाभावात्। तथाहि भ्रमस्थले रजतमिदमित्यत्राविद्याकार्यस्य तत्कालो-त्पन्नस्य रजतस्य प्रातिभासिकसत्त्वस्वीकारेऽपि नेदं रजतमिति निषेधज्ञानं न रजतत्वावच्छिन्नप्रतियोगिताकाभावविषयकं किन्तु व्यावहारिकत्वावच्छिन्न प्रातिभासिकरजतनिष्ठप्रतियोगिताकाभावविषयकं, तत्रहि व्यधिकरणधर्मा-वच्छिन्नप्रतियोगिताकाभावस्याभ्युपगमात्। न च प्रातिभासिके रजते व्यधि-करणधर्मस्यव्यावहारिकत्वस्यानवगमेप्रतिथागितावच्छेदकव्यावहारिकत्वावच्छिन्न-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

रजततत्त्वस्य ज्ञानाभावात्तत्प्रत्यक्षानुपपत्तिः, तस्यावगमे चापरोक्षावभासस्य तत्कालीनविषयसत्तानियतत्वात् प्रातिभासिके रजते तन्निष्ठप्रतियोगितावच्छेदकं व्यावहारिकत्वमपि रजतवदेवानिर्वचनीयमुत्पन्नमिति व्यावहारिकत्वावच्छिन्नरजतसत्त्वे तस्य व्यावहारिकत्वावच्छिन्नप्रतियोगिताकाभावस्तत्र कथं वर्तेतेति चेन्न रजताधिष्ठाननिष्ठस्य व्यावहारिकत्वस्य शुक्तिरजते प्रतिभासम्भवेन प्रातिभासिकरजतनिष्ठपारमार्थिकत्वोत्पत्त्यनभ्युपगमात्। यत्रारोप्यमसन्निकृष्टं तत्रैव प्रातिभासिकवस्तूत्पत्तिरङ्गीक्रियते। आरोप्यसन्निकृष्टतया जपाकुसुमगतलौहित्यस्य स्फटिके भानसम्भवेन स्फटिके नानिर्वचनीयलौहित्योत्पत्तिरभ्युपेयते। तत्रैव द्रव्यान्तरव्यवधाने लौहित्यादि—प्रतीतिसत्त्वेऽनिर्वचनीयलौहित्योत्पत्तेरिष्टत्वात्। तस्माद्व्यधिकरणधर्मावच्छिन्नप्रातियोगिताकाभावस्य केवलान्वयितया सर्वत्र विद्यमानत्वेन भ्रमस्थलेऽपि नेदं रजतमिति त्रैकालिकनिषेधधीविषयत्वस्वीकारेणादोषादिति दिक्।

प्रश्न ११—अनिर्वचनीयरजतोत्पत्तिं समर्थ्य मिथ्यात्वलक्षणोदाहरणप्रदर्शनपूर्वकं तदनुमाने सन् घट इति प्रत्यक्षबाधमुद्धरत ?

उत्तर—अथ शुक्तिरजतभ्रमस्थलेऽन्यथाख्यातिवादिनो नैयायिका मन्वते, यस्किल विसंवादिप्रवृत्त्या भ्रान्तिज्ञानं सिध्यति, तच्च विषयं विनाऽनुपपन्नं सत् स्वविषयं साधयति, किन्तु स विषयः प्रातिभासिकस्तत्कालोत्पन्न इत्यत्र नास्ति प्रमाणम्। तस्मात्स्वलृप्तं देशान्तरीयरजतमेव तद्भ्रमज्ञानस्य विषयः स्वीकार्यः इति चेन्न, देशान्तरीयरजतस्यासन्निकृष्टस्य प्रत्यक्षविषयत्वायोगेन भ्रमे भानानुपपत्तेः। न च ज्ञानलक्षणयाऽलौकिकप्रत्यासत्त्या तद्भानमिति वाच्यम् ज्ञानस्य प्रत्यासत्तित्वे तेनैव वह्न्यादेः प्रत्यक्षत्वापत्तावनुमानाद्युच्छेदापत्तेः।

ननु रजतोपादकानां रजतावयवानामभावे वेदान्त राद्धान्तेऽपि कथं रजतोत्पत्तिरिति चेन्न लोकसिद्धसामग्रीतो विलक्षणसामग्र्याः प्रातिभासिकरजतोत्पादकत्वाभ्युपगमात्। तथाहि-काचकामलादिदोषदूषितलोचनस्य पुरोवर्त्तिद्रव्यसंयोगादिदमाकारा चाकचिक्याकारा काचिदन्तःकरणवृत्तिरुदेति, तस्यां च वृत्ताविदमवच्छिन्नं चैतन्यं प्रतिबिम्बते। एवं च तडागोदकनिर्गमनरीत्या वृत्तेर्निगमनेनेदमवच्छिन्नं चैतन्यं वृत्त्यवच्छिन्नं चैतन्यं प्रमातृ चैतन्यं चाभिन्नं भवति। ततश्च प्रमातृचैतन्याभिन्नविषयचैतन्यनिष्ठा शुक्तित्वप्रकारिकाऽविद्या चाकचिक्यादिसादृश्यसन्दर्शनसमुद्बोधितरजतसंस्कार सहकृता काचादिदोषसमवहिता रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमते।

अथ ब्रह्मभिन्नं सर्वं मिथ्या, ब्रह्मभिन्नत्वाद् यदेवं तदेवं यथा शुक्तिरजतम् इत्यत्र मिथ्यात्वं नाम स्वाश्रयत्वेनाभिमतयावन्निष्ठात्यन्ताभावप्रतियोगित्वमिति।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

त्वम् = शुक्ति रजतम् तस्य वस्तुतोऽनाश्रयेऽपि तदाश्रयत्वेनाभिमते शुक्त्यादौ वर्तमानो रजतं नास्तीत्याकारकोऽत्यन्ताभावस्तत्प्रतियोगित्वं शुक्तिरूप्यादेरस्तीति-लक्षणसमन्वयः। तत्राभिमतपदमसम्भववारणायावश्यकम्, अन्यथा यावति स्वाश्रये स्वात्यन्ताभावासम्भवः स्यात्। एवं यावत्पदाभावे कपिसंयोगाश्रयत्वे-नाभिमते वृक्षे मूलावच्छेदेन वर्तमानस्यात्यन्ताभावस्य प्रतियोगित्वं शाखा-वच्छेदेन स्थितस्य कपिसंयोगस्यास्तीति सामानाधिकरण्यरूपार्थान्तरं स्याद्, तद्वारणाय यावत्पदमावश्यकम्। तदुक्तम् तत्त्वप्रदीपिकायाम्—सर्वेषामेव भावानां स्वाश्रयत्वेनासम्मते। प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता॥ इति। न चोक्तानुमाने घटादेर्मिथ्यात्वे सन् घट इति प्रत्यक्षेण बाधप्रसङ्ग इति वाच्यम् तदधिष्ठानब्रह्मसत्तायास्तत्र विषयतया घटादेः सत्यत्वासिद्धेः। न च रूपादि-हीनस्य ब्रह्मणश्चाक्षुषादिज्ञानविषयत्वमनुपपन्नमिति वाच्यम् नीरूपस्यापि रूपादेः प्रत्यक्षविषयत्ववन्नीरूपस्य ब्रह्मणश्चाक्षुषविषयत्वाविरोधात्। न च नीरूपस्य द्रव्यस्य चक्षुराद्ययोग्यत्वमिति नियमः, मन्मते ब्रह्मणो द्रव्यत्वासिद्धेः। गुणाश्रयत्वं समवायिकारणत्वं वा त्वदभिमतं द्रव्यत्वं निर्गुणस्य ब्रह्मणोऽसम्भवम् कथञ्चिद् ब्रह्मणो द्रव्यत्वस्वीकारेऽपि 'इदानीं घटो नास्तीत्यत्र नीरूपस्य कालस्येव ब्रह्मण-श्चाक्षुषज्ञानविषयत्वेऽपि न विरोधः। यद्वा त्रिविधसत्तावादपक्षे 'सन् घटः इति प्रत्यक्षस्य व्यावहारिकसत्त्वविषयत्वेन प्रामाण्यं स्वीकार्यम्। एवं च मिथ्यात्व लक्षणं स्वाश्रयत्वेनाभिमतयावन्निष्ठपारमार्थिकत्वावच्छिन्नप्रतियोगिताकात्यन्ता-भावप्रतियोगित्वमित्यवसेयम्॥

प्रश्न १२—द्विविधकार्यविनाशो विशदं विविच्यताम्?

उत्तर—अथ वेदान्तसिद्धान्ते प्रातिभासिकरजतादीनां व्यावहारिकघटा-दीनां च सद्रूपेण प्रकाशमानं चैतन्यमेवाधिष्ठानम्। एवं स्वप्ने स्वप्नगजादीनां स्वप्नोपलब्धरथादीनामपि चैतन्यमेवाधिष्ठानम्: तत्रायं नियमः अध्यस्तपदार्थानां स्वाधिष्ठानसाक्षात्कारेणैव निवृत्तिः। स्वप्नगजादयः शुद्धचैतन्येऽध्यस्ताः, तेषां स्वाधिष्ठानसाक्षात्कारभावेन जागरणेऽपि अनुवृत्तिप्रसङ्गः इतिचेन्न कार्यविना-शस्य द्वैविध्यस्वीकारात्। तथाहि स्वोपादानेन सह कार्यविनाशः, विद्यमाने एवोपादाने कार्यविनाशश्च। तत्राद्यस्य नाम बाधो द्वितीयस्य निवृत्तिः। तयो राद्यस्य कारणमधिष्ठानतत्त्वसाक्षात्कारः तेन विना तदुपादानभूताया अविद्यायः अनिवृत्तेः। द्वितीयस्य कारणं विरोधिवृत्त्युत्पत्तिर्दोषनिवृत्तिश्च। तत्र—यद्यप्य-धिष्ठानसाक्षात्कारमन्तरेणाध्यस्तस्य बाधो न सम्भवति, तथापि तेन विनापि तत्राध्यस्तस्य निवृत्तिसम्भवात् नाध्यस्तानुवृत्तिप्रसङ्गो दोषः। यथोपादान-सत्त्वेऽपि मुसलप्रहारेण घटादीनां स्वकारणे विलयरूपानिवृत्तिर्भवति तथा

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

विरोधिवृत्त्युदयेन स्वप्नगजादीनां स्वकारणाविद्यायां विलयरूपनिवृत्तिस्वीकारे कोविशेषः ? अतः शुक्तिरजतस्य शुक्त्यवच्छिन्नचैतन्यनिष्ठतूलाविद्याकार्यत्वपक्षे शुक्तिरित्यधिष्ठानज्ञानेन शुक्तित्वप्रकारकतूलाज्ञानेन सह रजतस्य बाधो भवति, मूलाविद्याकार्यत्वपक्षे तु मूलाविद्याया ब्रह्मतत्त्वसाक्षात्कारमात्रनिवर्त्यतया शुक्तित्वप्रकारकज्ञानेन तस्या अनिवर्त्यतया पूर्वोक्तस्य प्रातिभासिकरजतस्य तत्र शुक्तित्वप्रकारकज्ञानेन स्वकारणाविद्यायां विलयरूपं निवृत्तिमात्रं मुसलप्रहारेण घटस्येव भवतीति। न चास्मिन्पक्षे शुक्तिरूप्यज्ञाने प्रमात्वप्रसक्तिः संसारदशायामबाधितत्वघटितस्य प्रमालक्षणस्य तत्रापि सत्त्वादिति वाच्यम्, अबाधितपदेनागन्तुकदोषाजन्यत्वस्य विवक्षितत्वात्। तत्र त्वागन्तुकदोषजन्यत्वसम्भवात् प्रमालक्षणाभावेनादोषात्। एवम् द्विविधकार्यविनाशस्य वैशद्यं वर्णितम्।

प्रश्न १३—प्रातिभासिकरूप्यादेर्व्यावहारिकरूप्यादितो वैलक्षण्ये को हेतुः ? व्याप्तिस्वरूपं किं ? कश्चन्यायपदार्थः ?

उत्तर—ननु शुक्तिरूप्यभ्रमस्थले देशान्तरीयरजताद्वैलक्षण्यसिध्यर्थम् महता प्रयासेन शुक्तिरूप्यस्याविद्याकार्यत्वेनाध्यस्तत्वं साधितम्। तच्च न सम्भवति, वेदान्तसिद्धान्ते देशान्तरीयरजतादेरप्यविद्याकार्यत्वेनाध्यस्तत्वाभ्युपगमात् तथा चोपलभ्यमानवैलक्षण्ये को हेतुरिति चेन्न न्यायमते सत्यत्वाविशेषेऽपि शब्दज्ञानेच्छादीनां क्षणिकत्वं घटादीनां स्थायित्वमितिवत् स्वभावविशेषस्यैव व्यावहारिकरूप्यादितः प्रातिभासिकरूप्यादेर्वैलक्षण्यनियामकत्वाभ्युपगमात्। किञ्च घटाद्यध्यासेऽविद्यैव दोषत्वेन हेतुः, शुक्तिरूप्याद्यध्यासे तु काचादयो दोषा अपीति विशेषः। तथा चागन्तुकदोषजन्यत्वं प्रातिभासिकत्वे प्रयोजकमिति भावः।

अथानुमितिकरणं व्याप्तिज्ञानं तत्र व्याप्तिज्ञानविषयीभूतोव्याप्तिपदार्थः क इत्याकांक्षायां व्याप्तिलक्षणमाह परिभाषाकारः अशेषसाधनाश्रयाश्रितसाध्यसामान्याधिकरण्यरूपा व्याप्तिः, साधनतावच्छेदकावच्छिन्नसाधनाश्रयाश्रितसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यरूपेति यावत्। एवं च यत्किञ्चिद्वह्न्यादिसाधनाश्रयाश्रितं यत्किञ्चिद्धूमादिसाध्यसामानाधिकरण्यमादाय पर्वतो धूमवान् वह्नेरित्याद्यशद्धेतौ नातिव्याप्तिः। सा च व्यभिचारादर्शने सति सहचारदर्शनेन गृह्यते। तच्च सहचारदर्शनं भूयो दर्शनं सकृद्दर्शनं वेति विशेषो नादरणीयः। सहचारदर्शनस्यैव प्रयोजकत्वात्'। तच्चानुमानमन्वयिरूपमेकमेव स्वार्थपरार्थभेदेन द्विविधम्। तत्र परार्थं न्यायसाध्यम् न्यायो नामावयवसमुदायः। तथा चानुमानप्रयोजकवाक्यार्थज्ञानजनकवाक्यत्वं न्यायत्वं, तादृशन्यायजन्यज्ञानप्रयोज्यं व्याप्तिज्ञानं परार्थानुमानमित्यर्थः। अवयवाश्च त्रय एव प्रसिद्धाः प्रतिज्ञाहेतूदाहरणरूपाः,

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

उदाहरणोपनयनिगमनरूपा वा। तथा चाह भट्टपादः तत्र पञ्चतयं केचिद्, द्वयमन्ये वयं त्रयम्। उदाहरणपर्यन्तं यद्वोदाहरणादिकम्॥ अतः अवयवत्रयेणैव व्याप्तिपक्षधर्मतयोरुपदर्शनसम्भवेनाधिकावयवद्वयस्य वैयर्थ्यम्। पञ्चावयवानां स्वरूपमिदम्—पर्वतो वह्निमान् इति प्रतिज्ञा, धूमादिति हेतुः, यो यो धूमवान् स स वह्निमान् यथा महानसमित्युदाहरणम्, तथा चायम् (वह्निव्याप्यधूमवानयम्) उपनयः, तस्मात्तथा (वह्निव्याप्यधूमवत्त्वाद् वह्निमान् पर्वतः) इति निगमनम् इति दिक्।

प्रश्न १४—अनुमानस्वरूपं मतान्तरनिरसनपूर्वकं लिङ्गार्थानुमानर्थापत्तिनिरूपणयोर्ब्रह्मज्ञानोपयोगं निर्वहत ?

उत्तर—अथानुमितिकरणमनुमानमित्यत्रानुमितिप्रमाया व्यापारवदसाधारणकारणात्मकं करणमनुमानस्य लक्षणम्। तत्रानुमितिजनने व्याप्तिज्ञानमेवासाधारणकारणरूपं करणमस्ति, एवं व्याप्तिज्ञानजन्यसंस्कारोऽवान्तरो व्यापारः। अतोऽनुमितौ व्याप्तिज्ञानजन्यसंस्काररूपावान्तरव्यापारवदसाधारणकारणं व्याप्तिज्ञानम्। ननु व्याप्तिज्ञानेऽनुमितिजनकत्ववद्व्याप्तिज्ञानजन्यानामनुव्यवसायस्मृतिशाब्दज्ञानादीनामपि जनकतया तत्र व्याप्तिज्ञानजन्यानुमितिलक्षणस्यातिव्याप्तिरितिचेन्न विषयत्वसमानविषयानुभवत्वपदार्थज्ञानत्वादिनानुव्यवसायादिषु व्याप्तिज्ञानजन्यत्वसत्त्वेऽपि व्याप्तिज्ञानत्वेन तज्जन्यत्वाभावेन तेष्वनुमितित्वाभावात्। न च महानसादौ व्याप्तिग्रहानन्तरं पर्वतादौ पक्षधर्मताज्ञानेन व्याप्तिं स्मृत्वा वह्निव्याप्यधूमवानयं पर्वतः इत्याकारकं तृतीयलिङ्गपरामर्शात्मकं ज्ञानमेवानुमितिकरणमभ्युपेयमितिवाच्यम् पक्षधर्मताज्ञानोद्बुद्धेसति व्याप्तिज्ञानजन्यसंस्कारेऽन्वयव्यतिरेकाभ्यां व्याप्तिज्ञानस्यानुमितिजनकत्वाभ्युपगमस्यावश्यकतया तद्रहितस्य तृतीयलिङ्गपरामर्शस्यानुमितिहेतुत्वासिद्धया तत्करणत्वस्य दूरनिरस्तत्वात्। न च संस्कारजन्यत्वेनानुमितौ स्मृतित्वापत्तिरिति वाच्यम् स्मृतिप्रागभावजन्यं ज्ञानं स्मृतिः, संस्कारमात्रजन्यं ज्ञानं वा स्मृतिरितिस्मृतिलक्षणे सति संस्कारध्वंसासाधारणसंस्कारजन्यानुमितौ स्मृतित्वापत्त्यभावात्। नच व्याप्तिस्मरणादनुमितिस्थलेसंस्कारजन्यत्वं व्यभिचरितं, तत्र व्याप्तिस्मृत्या संस्कारनाशादितिवाच्यम् तत्रापि व्याप्तिस्मृत्या संस्कारनाशानभ्युपगमेन व्याप्तिसंस्कारस्यानुमितिहेतुत्वेऽव्यभिचारात्। नहि स्मृतेः संस्कारनाशकत्वनियमः, स्मृतिधारादर्शनेन स्मृतेः संस्कारदार्ढ्यप्रयोजकत्वात्। न चानुद्बुद्धसंस्कारादप्यनुमित्यापत्तिरिति वाच्यम्, पक्षधर्मताज्ञानजन्यस्य संस्कारोद्बोधास्याप्यनुमितिजनने संस्कारसहकारित्वात्। एवं चाय धूमवानिति पक्षधर्मताज्ञानेन, धूमोवह्निव्याप्य इत्यनुभवाहितसंस्कारोद्बोधेसति पर्वतो वह्निमानित्यनुमितिर्भवति, न तु मध्ये व्याप्तिस्मरणं तज्जन्यवह्नि

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

व्याप्यधूमवानित्यादिविशेषणविशिष्टं ज्ञानं हेतुत्वेन कल्पनीयं, गौरवात्मानाभावाच्च। तच्चानुमानमन्वयिरूपमेकमेव, न स्वत्यन्ताभावाप्रतियोगिसाध्यकं केवलान्वयि। 'नेह नानास्ति किञ्चिन' इत्यादिश्रुत्या सर्वस्य प्रपञ्चस्य ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वावधारणेन तथाभूतकेवलान्वित्वासिद्धेः। नाप्यनुमानस्य व्यतिरेकिरूपत्वं साध्याभावव्यापकीभूतसाधनाभावप्रतियोगित्वरूपव्यातिरेकिव्याप्तिज्ञानस्य साधनेन साध्यानुमितावनुपयोगात्। न चान्वयव्याप्तिज्ञानरहितस्य पुरुषस्य व्यतिरेकिव्याप्तिज्ञानात्कथं भवन्मतेऽनुमितिरुपपद्यते इति वाच्यम्, अर्थापत्तिप्रमाणस्यावश्यकतया व्यतिरेक्यनुमानस्य तदन्तर्भावसम्भवे तत्पृथग्व्यतिरेक्यनुमानस्यानभ्युपगमात्। एवं व्यतिरेकिव्याप्तिज्ञानस्यानुमित्यजनकत्वेऽनुमानस्यान्वयव्यतिरेकिरूपत्वमपि नास्ति। तच्चानुमानं स्वार्थं परार्थं चेति द्विविधम्। स्वविवादगोचरार्थसाधकं स्वार्थानुमानं व्यभिचारादर्शने सति सकृत्सहचारदर्शनमात्रेणापि व्याप्तिज्ञानं भवति। परार्थानुमानं तु न्यायसाध्यम्। न्यायो, नामावयवसमुदायः। अवयवांश्च प्रतिज्ञाहेतूदाहरणरूपाः, उदाहरणोपनय निगमनरूपा वा त्रय एव प्रसिद्धाः; न तु पञ्चावयवाः। अवयवत्रयेणैव व्याप्तिपक्षधर्मतयोरुपदर्शनसम्भवेनाधिकावयवद्वयस्य निष्प्रयोजनत्वात्।

एवं निरूपितादनुमानाद् ब्रह्मभिन्ननिखिलप्रपञ्चस्य मिथ्यात्वसिद्धिः। तथाहि ब्रह्मभिन्नं सर्वं मिथ्या, ब्रह्मभिन्नत्वाद्, यदेवं तदेवं, यथा शुक्तिरूप्यम्। न च शुक्तिरजतादिषु मिथ्यात्वे प्रमाणाभावाद् दृष्टान्तासिद्धिरिति वाच्यम् ब्रह्मणि निखिलप्रपञ्चस्याविद्ययाऽध्यस्तत्वेन मिथ्यात्वोपपत्तेः। एवमविद्यादावपि मिथ्यात्वसिद्धये लाघवादेकस्यैव ब्रह्मभिन्नत्वस्य मिथ्यात्वप्रयोजकाभ्युपगमे न व्यभिचारशङ्कावकाशः। अतोऽनुमानेन ब्रह्मभिन्ननिखिलप्रपञ्चस्यमिथ्यात्वसिद्धेर्ब्रह्मात्मैक्यज्ञानं निर्बाधं भवतीति ब्रह्मज्ञानेऽनुमानस्यैवमुपयोगो बोध्यः। एवमर्थापत्ति-प्रमाणस्यापि प्रपञ्चे मिथ्यात्वावगमपुरःसरं ब्रह्मज्ञाने उपयोगोऽस्ति। यथा-तरतिशोकमात्मविदित्यत्र श्रुतस्य शोकशब्दवाच्यबन्धजातस्य ज्ञाननिवर्त्यत्वान्यथानुपपत्त्या बन्धस्य मिथ्यात्वं कल्प्यते। ततो बन्धस्य मिथ्यात्वकल्पनया ब्रह्मात्मैक्यापरोक्षावगमो निर्बाधो भवतीति बोध्यम्।

प्रश्न १५—वेदान्तपरिभाषामनुस्मृत्याकाँक्षास्वरूपं सूपपादयत।

उत्तर—यस्य वाक्यस्य तात्पर्यविषयीभूतः संसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम्। एतादृशवाक्यजन्यज्ञाने आकाँक्षायोग्यताऽसत्तयस्तात्पर्यज्ञानं चेति चत्वारि कारणानि। तत्र पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वमाकाँक्षा। यथा आनयेति क्रियावाचकपदश्रवणेन क्रियार्थबोधे घटमिति कारकस्य श्रोतृनिष्ठजिज्ञासाविषयत्वं, कारकस्य घटमिति पदस्य श्रवणेन कर्मकारकपदार्थबोधे

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

आनयेति क्रियायाः जिज्ञासाविषयत्वं, 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति श्रवणेन यागनिष्ठस्वर्गकरणत्वबोधे 'समिधो यजती' त्यादीतिकर्तव्यतायास्तच्छ्रवणेनेतिकर्तव्यताबोधे करणस्य जिज्ञासाविषयत्वं चास्तीति। तत्र व्युत्पन्नस्य जिज्ञासारहितस्यापि पुरुषस्य वाक्यश्रवणेन वाक्यार्थबोधसम्भवात्तत्र पदार्थानां परस्परजिज्ञासाविषयभावाभावादाकाँक्षालक्षणस्याव्याप्तिस्तद्वारणाययोग्यत्वपदमुपात्तम् एतादृशयोग्यतावच्छेदकं क्रियात्वकारकत्वादिकं विवक्षितम्। तेन गौरश्वः इत्यादौ क्रियाजनकत्वरूपकारकत्वाभावेन न तत्रातिव्याप्तिः।

ननु गौरश्व इत्यादिष्वतिव्याप्तिवारणाय योग्यत्वावच्छेदकस्य क्रियात्वादेर्विवक्षायां 'सोऽयं देवदत्तः' 'तत्त्वमसी'त्यादिवाक्येषु क्रियात्वाद्यभावात्तत्राव्याप्तिरिति चेन्न समानविभक्तिकपदप्रतिपाद्यत्वरूपस्य तदवच्छेदकस्य तत्रापि सत्त्वेनाव्याप्त्यभावात्। न चैवं गौरश्वः इत्यादौ समानविभक्तिकपदप्रतिपाद्यत्वस्य विद्यमानत्वेनातिव्याप्तिस्तदवस्थैवेति वाच्यम् गवाश्वादेरभेदस्य प्रत्यक्षबाधितत्वेनाभेदस्थले एव समानविभक्तिकपदप्रतिपाद्यत्वस्योक्तयोग्यत्वावच्छेदकत्वाभ्युपगमेनातिव्याप्त्यभावात्। न चैवं योग्यत्वावच्छेदकस्य तत्रतत्र भिन्नरूपेण स्वीकारे योग्यतावच्छेदकेऽननुगमो दोषः स्यादिति वाच्यम् अवच्छेद्ययोग्यतालक्षणाकाँक्षाया अनुगतत्वेन तदवच्छेदकेऽननुगमे दोषाभावात्। न च नैयायिकाभिमतान्वयबोधाभावरूपैवाऽकाँक्षा कुतो नाभ्युपेयते, तस्याः प्रागभावात्मकतया शाब्दबोधकारणत्वेन क्लृप्तत्वादिति वाच्यम्; मीमांसादर्शनासम्मतत्वेन तदनभ्युपगमात्। तथाहि—मीमांसादर्शनस्य बलाबलाधिकरणे श्रुतिवाक्यविरोधे तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्र विश्वेदेवदेवताऽमिक्षयोर्द्रव्यदेवतयोः परस्पराकाँक्षावत्त्वेन तद्धितश्रुत्या वैश्वदेवयागस्यामिक्षाऽन्वितत्वेन शान्ताकाँक्षायां विश्वेदेवदेवतायां न वाजिनद्रव्यस्य सम्बन्धः। न च तत्रापि वाजिनस्य तादृशजिज्ञासाऽविषयत्वेऽपि प्रदेयद्रव्यत्वस्य यागनिरूपितजिज्ञासाविषयतावच्छेदकतया तद्योग्यत्वमस्त्येवेति वाच्यं, स्वसमानजातीयपदार्थान्वयबोधविरहसहकृतप्रदेयद्रव्यत्वस्यैव तदवच्छेदकत्वात्। तथाहि-वाजिनद्रव्यस्य सम्बन्धविचारावसरे स्वपदेन वाजिनं गृह्यतां तत्समानजातीयः आमिक्षापदार्थस्तस्य तद्धितश्रुत्या वैश्वदेवयोगेऽन्वितत्वेन स्वसमानजातीयपदार्थान्वयबोधविरहरूपस्य विशेषणस्य तत्राभावात् प्रदेय द्रव्यत्वरूपं विशेष्यमात्रं न तादृशयोग्यतावच्छेदकमिति न वाजिनस्य तत्रान्वय इति भावः।

प्रश्न १६—लक्षणाभेदान् सोदाहरणं प्रदर्श्य, 'तत्त्वमसी'त्यादि' वाक्येष्वाचार्याणां लक्षणोक्तिरभ्युपगमवादेन इत्युक्ति समर्थयत।

उत्तर—अथ शब्दे वृत्तिद्वयमस्ति शक्तिर्लक्षणा चेति। तत्र शक्तिर्नामपदा-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

नामर्थेषु मुख्या वृत्तिः । यथा घटपदस्य कम्बुग्रीवाद्याकृतिविशिष्टेशक्तिः । कार्यजननानुकूलं कारणनिष्ठं सामर्थ्यं शक्तिः । सा च शब्दे तत्तत्पदजन्यपदार्थज्ञानरूपकार्य्यानुमेया, तादृशशक्तिविषयत्वं शक्यत्वम् । एवं शक्यसम्बन्धो लक्षणा, लक्षणाविषयत्वं लक्ष्यत्वम् सा च लक्षणा जहत्, अजहत्, जहदजहच्चेति त्रिविधा । तत्र शक्यसम्बन्धिमात्रविषयाऽद्या, शक्यार्थविशिष्टविषया द्वितीया तथा विशिष्टार्थवाचकपदस्य शक्यैकदेशमात्रवृत्तिः तृतीया । यथा सोऽयं देवदत्तः इत्यत्र पदद्वयवाच्ययोस्तदेतद्देशकालविशिष्टयोरैक्यानुपपत्त्या जहदजहल्लक्षणया विशेष्यदेवदत्तपिण्डमात्रपरत्वम् । यथा च तत्त्वमसीत्यादौ तत्पदवाच्यस्य सर्वज्ञत्वादिविशिष्टस्येश्वरस्य त्वंपदवाच्येनान्तःकरणविशिष्टेन जीवेनैक्यायोगादैक्यसिद्ध्यर्थं स्वरूपे चैतन्यमात्रे तत्त्वंपदयोः जहदजहल्लक्षणाभ्युपेयते इति प्राञ्चः । परिभाषाकृतस्तु 'सोऽयं देवदत्तः' 'तत्त्वमसी' त्यादौ लक्षणां विनैवैक्यं साधयन्ति । तथा हि शक्तिवृत्त्योपस्थितयोर्विशिष्टयोरभेदान्वयानुपपत्तौ सत्यामपि शक्त्योपस्थितयोर्विशेष्ययोरेवाभेदान्वये न विरोधः । यथा घटोऽनित्य इत्यत्र घटपदवाच्यैकदेशघटत्वस्यानित्यत्वेन सहान्वयाऽयोग्यत्वेऽपि स्वातन्त्र्येण शक्त्योपस्थितस्यान्वययोग्यस्य घटस्यानित्यत्वेन सह भवतु अन्वयः किमर्थमत्र लक्षणास्वीकारः । यत्रपदार्थैकदेशस्य विशेषणतयोपस्थितिः, तत्रैव तस्य स्वातन्त्र्येणोपस्थितयेलक्षणा स्वीक्रियते । यथा घटो नित्यः इत्यत्र घटपदाद्घटत्वस्य शक्त्या स्वातन्त्र्येणानुपस्थित्या घटत्वस्य स्वातन्त्र्येणोपस्थित्यर्थं घटपदस्य घटत्वे लक्षणा स्वीकार्या । एवमेव 'तत्त्वमसीत्यादिवाक्येऽपिनलक्षणा । शक्त्या स्वातन्त्र्येणोपस्थितयोस्तत्त्वंपदार्थैकदेशविशेष्ययोश्चैतन्ययोरभेदान्वये बाधकाभावात् । तस्माद् तत्त्वमसीत्यादिवाक्येषु लक्षणोक्तिराचार्याणामभ्युपगमवादेन बोध्या । वादिबलपरीक्षणार्थमनिष्टस्वीकारोऽभ्युपगमवादः । जहदजहल्लक्षणोदाहरणं तुकाकेभ्यो दधि रक्ष्यतामित्यादौ स्वीकार्यम् । जहदजहल्लक्षणात्वं च शक्याशक्ययोः साधारण्येन प्रत्यायकत्वमिति लक्षणमत्रापि संघटते । शक्यकाकत्वपरित्यागेनाशक्यदध्युपघातकत्वपुरस्कारेण काकेऽकाकेऽपि काकशब्दस्य प्रवृत्तेः ।

मुख्यार्थान्वयबाधो लक्षणाबीजमित्यालङ्कारिकाः । वस्तुतस्तु तात्पर्यानुपपत्तिरेवलक्षणा बीजम् । काकेभ्योदधि रक्ष्यतामित्यत्रान्वयानुपपत्तेरभावात् । गङ्गायां घोष इत्यादौ तात्पर्यानुपपत्तेरपि सम्भवात् ।

प्रश्न १७—लक्षणास्वरूपम् परिभाषाकाराभिमतं सयुक्तिकं निरूप्य तस्यां वाक्यवृत्तितां समर्थयत ?

उत्तर—अथ लक्षणा, पदमात्र वृत्तिः, वृत्तित्वात् शक्तिवदिति नैयायिकानुमाने शक्तित्वमुपाधिः । यतोहि शक्तौ दृष्टान्ते पदमात्रवृत्तित्वं

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

साध्यमस्ति तत्रशक्तित्वमुपाधिरप्यस्तीति साध्यव्यापकत्वं पक्षे लक्षणायां साधनमस्ति, किन्तु शक्तित्वमुपाधिर्नास्तीति साधनाव्यापकत्वम्। अतः साध्यव्यापकत्वे सति साधनाव्यापकत्वात्तत्र शक्तित्वमुपाधिः। तस्माल्लक्षणा न पदमात्रवृत्तिः किन्तु वाक्यवृत्तिरपीत्याह परिभाषाकारः। किञ्च गम्भीरायां नद्यां घोष इत्यत्र नद्यादिपदमात्रे लक्षणायां विनिगमकाभावेन गम्भीरायां नद्यामिति पदसमुदायस्य तीरेऽर्थे लक्षणायास्त्वयाप्यवश्यमङ्गीकर्तव्यत्वात्पदमात्रवृत्तित्वे वृत्तित्वं न नियामकमपितु शक्तित्वे सति वृत्तित्वम्, तच्च शक्तावेव, न तु लक्षणायां, तत्र पदभिन्नवृत्तित्वरूपं शक्तिवृत्तित्वमस्तीति सिद्धम। ननु वाक्ये लक्षणाऽभ्युपगमे शक्यसम्बन्धो लक्षणेति सिद्धान्तहानिः स्यात्, वाक्यार्थस्याशक्यत्वादिति चेन्न पदवृत्तितया शक्त्या यद्वस्तु ज्ञाप्यते, तत्सम्बन्धो लक्षणा। शक्तिवृत्त्या पदार्थज्ञानद्वारापदार्थवद् वाक्यार्थोऽपि परम्परया ज्ञाप्यते। अतः पदार्थस्येव वाक्यार्थस्यापि शक्तिज्ञाप्यत्वरूपशक्यत्वात् तत्सम्बन्धरूपा लक्षणा स्वीकारे न काचिदनुपपत्तिः। एवं लोकवद्वेदेऽपि 'वायुर्वै क्षेपिष्ठा देवता' इत्यादिप्रशंसारूपाणामर्थवादवाक्यानां पदसमुदायानामेव पशुयागप्राशस्त्ये लक्षणा। 'सोऽरोदीदि' त्यादिनिन्दार्थकवाक्यानां पदसमुदायानां च निन्दितत्वे लक्षणा। अन्यथा एकेन पदेन प्रशस्त्याद्यर्थोपस्थितिसम्भवे पदान्तरवैयर्थ्यं स्यात्। एवं च विध्यपेक्षितप्राशस्त्यादिरूपपदार्थबोधकत्वेनार्थवादपदसमुदायस्य पदरूपतया विधिवाक्येन सहैकवाक्यत्वं भवतीत्यर्थवादवाक्यानां पदैकवाक्यत्वम्।

यत्र प्रत्येकं भिन्नभिन्नसंसर्गप्रतिपादकयोर्वाक्ययोराकांक्षावशेन महावाक्यार्थबोधकत्वं, तत्र वाक्यैकवाक्यत्वं भवति। यथा—'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादिवाक्यानां 'समिधो यजती' त्यादि वाक्यानां च परस्परापेक्षिताङ्गाङ्गिभावबोधकवाक्यतयैकवाक्यता भवति। तदुक्तं भट्टाचार्यैः स्वार्थबोधे समासानामङ्गाङ्गित्वाद्यपेक्षया वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते; इत्यादि।

प्रश्न १८—तात्पर्यलक्षणं मतान्तरनिरसनपूर्वकं निरूपयत।

उत्तर—अथ वाक्यार्थज्ञाने आकाँक्षायोग्यताऽसत्त्वयस्तात्पर्यज्ञानं चेति चत्वारि कारणानि। तत्र नैयायिका मन्वते, तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्यस्यलक्षणमिति, विचार्यमाणे लक्षणमेतदयुक्तम् यतोहि-अर्थज्ञानशून्येन पुरुषेणोच्चरितात्वेदादर्थज्ञानाभावः प्रसज्जेत। न च तत्र तात्पर्यभ्रमेणार्थप्रतीतिरिति वाच्यम्, अयमध्यापकोऽव्युत्पन्न, इतिवक्तृनिष्ठव्युत्पत्त्यभावरूपविशेषदर्शनेन तात्पर्यभ्रमस्य वक्तुमशक्यत्वात्। न च तत्रैश्वरीयतात्पर्यज्ञानाच्छाब्दबोध इति वाच्यम्, ईश्वरानङ्गीकर्तुरपि सांख्यमीमांसकादेर्वैदिकवाक्यार्थज्ञानोपलम्भेः। तस्मात्सिद्धान्ते तत्प्रतीतिजननयोग्यत्वं तात्पर्यलक्षणम्। गेहे घट इति वाक्यं गेहे

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

घटसंसर्गप्रतीतिजननयोग्यतया गेहघटसंसर्गपरम्। न चोक्ततात्पर्यलक्षणस्य सैन्धव-मानयेत्याद्यनेकार्थपदप्रयोगेऽतिव्याप्तिः, लवणानयनप्रतीतीच्छया प्रयुक्तेऽपि तद्वाक्येऽश्वप्रतीतिजनने स्वरूपयोग्यत्वसत्त्वात्, लवणपरत्वज्ञानदशायामप्य-श्वादिसंसर्गप्रत्ययापत्तिरिति वाच्यम्; तदितरप्रतीतीच्छयाऽनुच्चरितत्वस्य तात्पर्यं प्रतिविशेषणत्वात्। एवं च 'सैन्धवमानये'तिवाक्यमश्वप्रतीतिजनन-योग्यमपि भोजनप्रकरणे प्रयुक्तत्वाल्लवणान्यप्रतीतीच्छयानुच्चरितत्वेन नाश्व-संसर्गज्ञानजनकमितिभावः। शुकादिवाक्येऽव्युत्पन्नोच्चरितवेदवाक्यादौ च तत्प्रतीतीच्छाया एवाभावेन सुतरां तदन्यप्रतीतीच्छयोच्चरितत्वाभावात् तात्पर्य-लक्षणस्य विद्यमानत्वान्नाव्याप्तिः। एवमुभयप्रतीतीच्छयोच्चरितेऽव्याप्तिवारणाय तत्प्रतीतीजननयोग्यत्वे सति तदन्यमात्रप्रतीतीच्छयाऽनुच्चरितत्वमिति तात्पर्यस्य निष्कृष्टलक्षणम्।

प्रश्न १९—तत्रभवतां श्रीधर्मराजाध्वरीन्द्राणां मतं वेदानां नित्यत्वमनित्य-त्वंवेति नैयायिकादिमतप्रतिपादन-पुरःसरं सम्यग्विवेचनीयम्?

उत्तर—अथ वेदानां नित्यसर्वज्ञपरमेश्वरप्रणीतत्वेन प्रामाण्यमिति नैया-यिकाः। वेदानामनित्यत्वाभ्युपगमे पुरुषप्रणीतत्वावश्यम्भवात्तत्प्रणेतुरीश्वरत्वेऽपि भक्तपक्षपातित्वादिसम्भवाद्वौधागमवद्वेदेऽपि दोषप्रसङ्गात्तस्य नित्यत्वेन निरस्त समस्तपुंदूषणतया प्रामाण्यमित्यध्वरमीमांसकाः। किन्तु वेदान्तिनांपरिभाषाकृतां मते वेदो न नित्यः, उत्पत्तिमत्त्वात् उत्पत्तिमत्त्वं च 'अस्य महतोभूतस्य निश्व-सितमेतद्यदृग्वेदोयजुर्वेदः' ऋचः सामानि जज्ञिरे' इत्यादिश्रुतेः। एवमनित्य-त्वेऽपि वेदानां नैयायिकाभिमतत्रिक्षणावस्थायित्वमस्माभिर्नाभ्युपेयते, य एव वेदो देवदत्तेनाधीतः, स एव वेदो मयाधीयते इति प्रत्यभिज्ञाविरोधात्। अतः सोऽयंगकार इति प्रत्यभिज्ञाविरोधादेव गकारादिवर्णानामपि क्षणिकत्वं नास्ति। तस्माद्वेदानां स्वरूपतो वर्णादिद्वारा च क्षणिकत्वाभावे सति, वर्णपदवाक्य समुदायस्य वेदस्य सृष्टिकालीनोत्पत्तिमत्त्वं प्रलयकालीनध्वंसप्रतियोगित्वं च स्वीक्रियते' न तु मध्ये वर्णानामुत्पत्तिविनाशौ स्तः, अनन्तगकारादिवर्णकल्पने गौरवात्। न चानुच्चारणदशायां वर्णानां श्रवणं कुतो न भवतीति वाच्यम् तदुच्चा-रणकर्तृरूपाभिव्यञ्जकाभावेनाविरोधात्। न चोत्पन्नोगकारो नष्टो गकार' इति प्रतीत्यामध्ये तदुत्पत्त्यादिकं कथं नाभ्युपयते इति वाच्यम 'सोऽयं गकार' इति प्रत्यभिज्ञाविरोधेन तत्प्रतीतेरप्रामाण्यात् 'श्यामो घटो नष्टः', रक्तो घटः उत्पन्न इति प्रतीतिवदुत्पत्तिविनाशशालीनध्वनिसम्बन्धादुक्तप्रतीतेः परम्परासम्बन्ध-विषयत्वेन प्रामाण्याद्वा। अतो न वेदानां क्षणिकत्वम्।

किं चास्माकं मते वेदानामुत्पत्तिमत्त्वेऽपि पौरुषेयत्वाभावान्नापसिद्धान्ता-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

पत्तिः, नहि पौरुषेयत्वं नाम पुरुषेणोच्चार्यमाणत्वम् अन्यथा गुरुमतेऽपि अध्यापक-परम्परया पौरुषेयत्वापत्तेः, मौनिलोकादेरपौरुषेयत्वापत्तेश्च । नापि पुरुषाधीनोत्पत्तिमत्त्वं पौरुषेयत्वं ? वेदाः पौरुषेयाः, वाक्यत्वात्, भारतादिवाक्यवदिति नैयायिकाभिमतपौरुषेयत्वानुमानेनास्मदाद्यभिमतपौरुषेयत्वसाधनादस्मदादिना सिद्धसाधनतापत्तेः । अतः सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं पौरुषेयत्वं सिद्धान्तेऽभ्युपेयते तस्मान्नास्ति पूर्वोक्तदोषः । तथा च सर्गाद्यकाले परमेश्वरः पूर्वसर्गसिद्धवेदानुपूर्वीसमानानुपूर्वीकं वेदं विरचितवान्, न तु तद्विजातीयमिति न सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं वेदानामस्ति, किन्तु भारतादीनां सजातीयोच्चारणमनपेक्ष्यैवोच्चारणमिति तेषां पौरुषेयत्वमस्त्येव इति भावः ।

प्रश्न २०—अर्थापत्तिभेदाः सलक्षणं सोदाहरणञ्च निरूपणीयाः ।

उत्तर—अथ प्रत्यक्षप्रमाणजन्यं ज्ञानं प्रत्यक्षमितिवदर्थापत्तिप्रमाणजन्यं ज्ञानमर्थापत्तिप्रमा । तत्रार्थापत्तिप्रमाकरणमर्थापत्तिप्रमाणम् । उपपादकफलपनाहेतुभूतोपपाद्यज्ञानमर्थापत्तिप्रमाणमित्यर्थः । उपपाद्यज्ञानेनोपपादकफलपनमर्थापत्तिप्रमेति—अर्थापतिप्रमाप्रमाणयोर्लक्षणम् । तत्रोपपाद्यज्ञानं करणम् । उपपादकज्ञानं फलम् । येन विना यदनुपपन्नं तत्तत्रोपपाद्यम्, यथा रात्रिभोजनेन विना दिवाभुञ्जानस्य पीनत्वमनुपपन्नमिति तादृशपीनत्वमुपपाद्यम् । एवं यस्याभावे यस्यानुपपत्तिस्तत्तत्रोपपादकम्, यथा रात्रिभोजनस्याभावे तादृशपीनत्वस्यानुपपत्तिरिति रात्रिभोजनमुपपादकम् ।

अर्थापत्तिशब्दस्य प्रमाप्रमाणयोः प्रयुक्तस्य प्रवृत्तिनिमित्तंभिन्नमस्ति । तथाहि—रात्रिभोजनकल्पनायां प्रमितावर्थस्य रात्रिभोजनस्योपपादकज्ञानस्यापत्तिः—कल्पनेति षष्ठी समासेनार्थापत्तिशब्दो वर्तते, कल्पनाकरणपीनत्वादिज्ञाने स्वर्थस्य रात्रिभोजनरूपस्योपपादकज्ञानस्यापत्तिः—कल्पना यस्माद्दिवाभोजनाभावविशिष्टपीनत्वज्ञानात्तदर्थापत्तिप्रमाणमिति बहुव्रीहिसमासेनार्थापत्तिशब्दो वर्तते । सा प्रमारूपार्थापत्तिर्द्विविधा—दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति । तत्राद्या दृश्यमानस्य पदार्थस्य दृष्टानुपपत्तिमुखेनार्थान्तरकल्पनम्, यथा इदं रजतमिति पुरोवर्तिनि प्रतिपन्नस्य रजतस्य सत्यत्वे नेदं रजतमिति तत्रैवनिषिध्यमानत्वमनुपपन्नंसद् रजतस्य सन्निन्नत्वं सत्यत्वात्यन्ताभाववत्त्वं वा मिथ्यात्वं कल्पयति । द्वितीया च यत्र श्रूयमाणवाक्यस्य स्वार्थानुपपत्तिमुखेनार्थान्तरकल्पनम्, यथा 'तरति शोकमात्मवित्' इत्यत्र श्रुतस्यशोकशब्दवाच्यबन्धजातस्य ज्ञाननिवर्त्यत्वस्यान्यथानुपपत्त्या बन्धस्य मिथ्यात्वं कल्प्यते यथा वा जीवो देवदत्तो गृहे नास्तीति वाक्यश्रवणानन्तरं जीविनो गृहासत्त्वं बहिः सत्त्वं कल्पयति । श्रुतार्थापत्तिरपि—अभिधानानुपपत्त्यभिहितानुपपत्तिभेदेनद्विविधा । यत्र वाक्यैकदेश-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

श्रवणेऽन्वयाभिधानानुपपत्त्यान्वयाभिधानोपयोगि पदान्तरं कल्प्यते, तत्राभिधानानुपपत्तिः । यथा 'द्वारमित्यत्र' 'पिधेहि' इत्यध्याहारः, यथा वा 'विश्वजिता यजेत्' इत्यत्र 'स्वर्गकाम' इत्यध्याहारः । अभिहितानुपपत्तिस्तु यत्र वाक्यावगतोऽर्थोऽनुपपत्त्वेन ज्ञातः सन्नर्थान्तरं कल्पयति, तत्र द्रष्टव्या । यथा 'स्वर्गकामोज्योतिष्टोमेन यजेत, इत्यत्र स्वर्गसाधनत्वस्य क्षणिकज्योतिष्टोमयागगतस्यानुपपत्त्या मध्यवर्त्यपूर्वं कल्प्यते । न चेयमर्थापत्तिः 'अयं रात्रिभोजी, दिवाऽभुञ्जानत्वे सति पीनत्वात्, यन्नैवं तन्नैवं यथा दिवाभोजीत्यनुमानेऽन्तर्भावतुमर्हतीति वाच्यम्, अन्वयव्याप्त्यज्ञानेनान्वयिन्यनन्तर्भावात् अनुमिनोमीत्यनुव्यवसायाभावेन व्यतिरेकिणोऽनुमानत्वस्य निरस्तत्वाच्च । अत एव तत्रानुमिनोमीति नानुव्यवसायरूपं, किन्तु अनेनेदं कल्पयामीति । एवमर्थापत्तेर्मानान्तरत्वसिद्धौ व्यतिरेकिनानुमानान्तरम् पृथिवीतरेभ्योभिद्यते इत्यादौ गन्धवत्त्वमितरभेदं विनाऽनुपपन्नमित्यादिज्ञानस्य करणत्वात् । अत एवात्र पृथिव्यामितरभेदं कल्पयामीत्यनुव्यवसायो न त्वनुमिनोमीत्यनुव्यवसाय इत्यपि बोध्यम् ।

प्रश्न २१—अनुपलब्धिसदलप्रयोजनं लक्षयित्वा तस्या अभावग्राहकतामुपपादयत ?

उत्तर—अथ ज्ञानकरणाजन्याभावानुभवासाधारणकारणमनुपलब्धिरूपं प्रमाणम् । तत्राजन्यान्तपदानुपादाने अनुमानजन्यातीन्द्रियाभावानुमितिहेतावनुमानादावतिव्याप्तिः स्यात्, तद्वारणायाजन्यांतंपदं दत्तम् । अदृष्टादौ साधारणकारणेऽतिव्याप्तिवारणायासाधारणेति पदम् । सर्वं कार्यं प्रति कारणतयाऽदृष्टादेः साधारणकारणत्वात् । अभावस्मृत्यसाधारणहेतुसंस्कारेऽतिव्याप्तिवारणानुभवेतिविशेषणम् ।

ननु सर्वेषामभावानामविशेषादतीन्द्रियाभावानुमितिस्थलेऽप्यनुपलब्धिप्रमाणेनैवाभावो गृह्यतामिति चेन्न धर्माद्यनुपलब्धिसत्त्वेऽपि तदभावानिश्चयेन योग्यानुपलब्धेरेवाभावग्राहकत्वात् । योग्या चासत्त्वनुपलब्धिश्चेति कर्मधारयसमासाश्रयणेनानुपलब्धेर्योग्यता तत्प्रतियोगिसत्त्वप्रसञ्जित प्रतियोगिकत्वरूपा । तथाहि स्फीतालोकवति भूतले यदि घटः स्यात्तर्हि घटोपलम्भः स्यादित्यापादनसम्भवात्तादृशभूतले घटाभावोऽनुपलब्धिगम्यः, अन्धकारे तु तादृशापादनासम्भवात्तानुपलब्धिगम्यता । अतएव तादृशापादनसम्भवात् स्तम्भे पिशाचसत्त्वे स्तम्भवत्तस्यापि प्रत्यक्षतापत्त्या तदभावोऽनुपलब्धिगम्यः आत्मनि धर्मादिसत्त्वेऽप्यस्यातीन्द्रियतया तादृशोपलम्भापादनासम्भवान्ने तदभावास्यानुपलब्धिप्रमाणगम्यत्वम् ।

न चोक्तरीत्याऽधिकरणेन्द्रियसन्निकर्षस्थले बलुप्तेन्द्रियमेवाभावाकारवृत्तावपि कारणम्; इन्द्रियत्वेऽभावज्ञानं तदभावेऽभावज्ञानाभाव इतीन्द्रियान्वय-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

व्यतिरेकानुविधानादिति वाच्यम्, अभावप्रतियोग्यनुपलब्धेरप्यभावग्रहे कारणत्वेन कल्पितया तत्र करणत्वमात्रस्य कल्पनात्, इन्द्रियस्य चाभावेन सह सन्निकर्षाभावेनाभावग्रहाहेतुत्वात्। इन्द्रियान्वयव्यतिरेकयोस्तु अभावाधिकरणज्ञानाद्युपक्षीणत्वेनान्यथासिद्धेः। किं च भूतले घटो नास्तीत्यभावानुभवस्थले भूतलाकारवृत्तिरिन्द्रियजन्या तन्निष्ठाभावाकारवृत्तिस्तु नेन्द्रियजन्या, तेन सहेन्द्रियसन्निकर्षाभावात् किन्तु घटानुपलब्धिरूपमानान्तरजन्येति भवत्यनुपलब्धेः प्रमाणान्तरत्वम्। उभयप्रमाणजन्यान्तःकरणवृत्तौ प्रतिफलितं चैतन्यं प्रत्यक्षप्रमाणं सिद्धान्तेऽभीष्टमेवेति न काप्यनुपपत्तिः तस्मादनुपलब्धेः प्रमाणान्तरत्वं तत्राभावग्राहकत्वं च युक्तिसिद्धम्

प्रश्न २२—प्रमाणानाम् (प्रमाणां) प्रामाण्यम् (प्रमात्वं) स्वत एव उत्पद्यते, ज्ञायते च परतो वेति सुविशदं निरूप्यताम् ?

उत्तर—अथ वेदान्ताभिमतषट्प्रमाणैर्जायमानाः षोढाः प्रमाः यथार्थाः सन्त्ययथार्था वेति प्रमागतप्रमात्वग्राहकेषु विप्रतिपत्तयः सन्ति। तत्र परतः प्रामाण्यवादिनो नैयायिका वदन्ति प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः। अर्थात् प्रमात्वं स्वतो ग्राह्यं नास्ति, अन्यथा ज्ञानोत्पत्त्यनन्तरमिदं ज्ञानं प्रमानवा इत्याकारकः संशयो नोपपद्यते। तस्मात् ज्ञानजनकसामान्यसामग्रीभिन्नगुणादिरूपकारणप्रयोज्यत्वं परतस्त्वं प्रमात्वोत्पत्तौ। ज्ञप्तौ च परतस्त्वम् इदं ज्ञानं, प्रमा, सफलप्रवृत्तिजनकत्वात् व्यतिरेकेणाप्रमावदिति स्वीकार्यमिति चेन्न स्मृत्यनुभवसाधारणं संवादिप्रवृत्त्यनुकूलं तद्वति तत्प्रकारकज्ञानत्वं प्रमात्वम् आत्ममनःसंयोग (साक्षि) रूपज्ञानसामान्यसामग्रीप्रयोज्यं न स्वविकं गुणसमसाधारणकारणरूपेणापेक्ष्यते, प्रमामात्रेऽनुगतगुणसत्त्वे प्रमाणाभावात्। नापि भूयोऽवयवैः सहेन्द्रियसन्निकर्षरूपोगुणः प्रत्यक्षत्वावच्छिन्नप्रमायां सम्भवति, रूपस्यात्मनश्चावयवाभावेन तयोः प्रत्यक्षेऽव्याप्तेः, सत्यपि अवयवे पीतः शंखः इति भ्रमप्रत्ययेऽतिव्याप्तेश्च।

एवमन्वयव्यतिरेकव्यभिचारादेव उत्पत्तिकालावच्छिन्नघटादौ गन्धवत्पृथिवीत्ववानयमिति सल्लिङ्गपरामर्शे सत्यपि गन्धवान् घटोऽयमित्यनुमितेर्प्रमात्वेन, वह्निमान् प्रमेयत्वदित्यादावसल्लिङ्गपरामर्शस्थले विषयस्य वह्निसाधनानुमित्यादेः प्रमात्वात् अनुमितित्वाद्यवच्छिन्नप्रमायां सल्लिङ्गपरामर्शादिकं न गुणः। नच भ्रमस्यापि तादृशसामग्रीप्रयोज्यत्वाविशेषेणाप्रमापि प्रमा स्यादिति वाच्यम् प्रतिबन्धकाभावस्य कार्यं प्रति हेतुत्वेन प्रमायां दोषाभावस्यापि हेतुत्वाङ्गीकारात्। न चैवं परतस्त्वमिति वाच्यम्, आगन्तुकभावकारणापेक्षायामेव परतस्त्वात्।

उक्तं प्रमात्वं स्वतश्च ज्ञायते। स्वतो ग्राह्यत्वं नाम दोषाभावे सति याव-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

प्रमात्वाश्रयग्राहकसामग्रीग्राह्यत्वम् । अर्थात् प्रमात्वाश्रयो वृत्तिज्ञानं तद्ग्राहकं साक्षिज्ञानं तेनापि प्रमागतं प्रमात्वं गृह्यते एव । न चैवं प्रामाण्यसंशयानुपपत्तिरिति वाच्यमुतादृशस्थले संशयानुरोधेन दोषस्यापि सत्त्वेन दोषाभावघटित प्रमात्वाश्रयग्राहकाभावेन तत्र प्रमाण्यस्यैवाग्रहात् ।

यद्वा यावत्त्वाश्रयग्राहकसामग्रीग्राह्यत्वयोग्यत्वं ज्ञप्तौस्वतस्त्वम् । अस्मिन् लक्षणे संशयस्थले प्रमात्वस्य पूर्वोक्तयोग्यताऽसत्त्वेऽपि दोषवशेन प्रमात्वस्याग्रहान्न संशयानुपपत्तिरूपोऽदोषः संगच्छते इति दिक् ।

प्रश्न २३—ब्रह्मणो लक्षणमुभयविधमपि विशदं वर्ण्यताम् ?

उत्तर—अथ वाक्यार्थज्ञाने पदार्थज्ञानं कारणमिति तत्त्वमसीतिमहावाक्यार्थज्ञानमपि तत्त्वंपदार्थज्ञानाधीनमिति । तत्र प्रथमोपात्तत्वात्प्रत्यक्षाद्यगोचरत्वेनाभ्यर्हितत्वाच्चादौ लक्षणप्रमाणाभ्यां तत्पदार्थो निरूप्यते । असाधारणधर्मो लक्षणं, तच्च स्वरूपतटस्थभेदेन द्विविधम् । तत्रापि मुख्यत्वात् स्वरूपं सद्व्यावर्तकं स्वरूपलक्षणमितिपूर्वं निरुप्यते । यथा 'सत्यं ज्ञानमनन्तं ब्रह्म' 'आनन्दो ब्रह्मेति व्यजानात्' इत्यादिश्रुत्या सच्चिदानन्दात्मकं ब्रह्मणः स्वरूपत्वे सति व्यावर्तकत्वेन स्वरूपलक्षणम्, स्वस्यैव स्वापेक्षया धर्मधर्मिभावकल्पनया लक्ष्यलक्षणत्वसम्भवात् । तदुक्तं पद्मपादाचार्यैः 'आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्मा । अपृथक्त्वेऽपि चैतन्यात्पृथगिवावभासन्ते इति । यावल्लक्ष्यकालमनवस्थितत्वे सति लक्ष्येतरव्यावर्तकमिति तटस्थलक्षणम्, यथा गन्धवत्त्वं पृथिवीलक्षणम् महाप्रलये परमाणुषु, उत्पत्तिकाले घटादिषु गन्धाभावात् । प्रकृत कार्यजातं प्रति जन्मादिकर्तृत्वरूपं कारणत्वं ब्रह्मणस्तटस्थलक्षणम् । कर्तृत्वं च तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम् । परमेश्वरस्य तादृशकृतिमत्त्वसद्भावे यः, सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः । इत्यादि श्रुतिर्मानम् । तादृशचिकीर्षासद्भावे 'सोऽकामयत बहुस्यां प्रजायेय' इत्यादि श्रुतिर्मानम्, एवं तादृशकृतौ 'तन्मनोऽकुरुत' 'स प्राणमसृजत' इत्यादि श्रुतिः प्रमाणम् ।

ज्ञानेच्छाकृतीनां मध्येऽन्यतमगर्भलक्षणत्रितयमिदं विवक्षितम्, एकलक्षणविवक्षणे विशेषणव्यर्थत्वापत्तेः । अतएव जन्मस्थितिध्वंसानामन्यतमस्यैव लक्षणे प्रवेशः । एवं च प्रकृते नव लक्षणानि सम्पद्यन्ते । ब्रह्मणो जगज्जन्मादिहेतुत्वेत्यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति, इत्यादिश्रुतिर्मानम् । ननु त्रिभिरस्योपादानत्वसूचनादेकैकस्य लक्षणप्रवेशे तादृशोपादानत्वं न सिध्यतीत्यरुच्याह लक्षणान्तरम्—निखिलकार्याभिन्नात्मकं तदुपादानं ब्रह्मणो लक्षणम् । उपादानत्वं च जगदध्यासाधिष्ठानत्वम् । एवं च कल्पितविकारसम्बन्धस्य वास्तवनिर्विकारत्वाविरोधादुपादा-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

नत्वेऽपि विकारशून्यत्वमेव ब्रह्मणः । अथवा जगदाकारेण विपरिणममानमायाधिष्ठानत्वं ब्रह्मणो लक्षणम् । न च श्रुतिषु जगद्ब्रह्मणोस्तादात्म्यव्यपदेशाज्जगदाकारेण विपरिणममानत्वमुपादानत्वमितितल्लक्षणं कुतोनाभ्युपेयते इतिवाच्यम् चेतनस्य जडाकारेण परिणामायोगात् कूटस्थनित्यत्वश्रुतिविरोधाच्च । यतो हि 'इदं सर्वं यदयमात्मा' 'सच्चत्यच्चाभवत्' 'बहुस्यां प्रजायेय' 'मायां तु प्रकृतिं विद्यात्' 'मयाध्यक्षेण प्रकृतिः सूयते' इत्यादिश्रुतिस्मृतिषु एतादृशोपादानत्वाभिप्रायेणैव ब्रह्मप्रपञ्चयोस्तादात्म्यव्यपदेशः कृतः । घटः सन् घटो भाति घट इष्टः इत्यादिलौकिकव्यपदेशोऽपि घटादीनां सच्चिदानन्दैक्याध्यासादेव घटादिष्विष्टत्वव्यवहारदर्शनादानन्दाध्यासस्तत्र वर्ण्यते, दुःखादौ सच्चिदंशाध्यासेऽपि तादृशेष्टत्वव्यवहारादर्शनात्तत्रानन्दाध्यासो नाभ्युपेयते इति बोध्यम् ।

प्रश्न २४—जगतो जन्मक्रमं प्रदर्श्य ब्रह्मणः स्वरूपतटस्थलक्षणे लिखत ।

उत्तर—अथ वाक्यार्थज्ञाने पदार्थज्ञानं कारणमितिनियमेन तत्त्वमस्यादिमहावाक्यजन्यज्ञानमपि तत्त्वंपदार्थज्ञानाधीनमितिपूर्वं तत्पदार्थो लक्षणप्रमाणाभ्यां निरूपणीयः । तत्रासाधारणधर्मो लक्षणं स्वरूपतटस्थभेदेन द्विविधम् । तयोः स्वरूपलक्षणं स्वरूपं सद्व्यावर्तकम् 'सत्यज्ञानमनन्तं ब्रह्म' 'आनन्दो ब्रह्मेति व्यजानादिति श्रुतिसिद्धं सच्चिदानन्दात्मकम् । स्वस्यैव स्वापेक्षया धर्मिधर्मभावकल्पनया लक्ष्यलक्षणात्वमपि सम्भवम् । तदुक्तं पद्मपादाचार्यैः—'आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः । अपृथक्त्वेऽपि चैतन्यात्पृथगिवावभासन्ते' इति । तटस्थ लक्षणं तु यावल्लक्ष्यकालमनपस्थितत्वे सति तद्व्यावर्तकं यथा गन्धवत्त्वं पृथिव्या लक्षणम् । महाप्रलये परमाणुषु उत्पत्तिकालावाच्छिन्नघटादिषु गन्धाभावात् । प्रकृते ब्रह्मणि कार्यजातं प्रति जन्मादिकारणत्वम् । कारणत्वेन कर्तृत्वं विवक्षितमिति नाविद्यादावतिव्याप्तिः ।

एवं स्वरूपतटस्थलक्षणाभ्यां तत्पदार्थं लक्षयित्वा जगतो जन्मक्रमोनिरूपणीयः । तत्र सर्गाद्यकाले सृज्यमानप्रपञ्चवैचित्र्यहेतुप्राणिकर्मसहकृतोऽनन्तशक्तिविशिष्टमायासहितः सन्नामरूपात्मकनिखिलप्रपञ्चं प्रथमं बुद्धावाकलय्येदं करिष्यामीतिसंकल्पयति 'तदैक्षत बहुस्यां प्रजायेय' इति श्रुतेः । ततः क्रमेणाकाशादीनि पञ्चमहाभूतानि अपञ्चीकृतानि जायन्ते । 'तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः आकाशाद्वायुर्वायोरग्निरग्नेरापः इत्यादि, श्रुतेः । न च शब्दस्याकाशमात्रगुणत्वम्, वाय्वादावपि तदुपलम्भात् । न चासौ भ्रमः, लौकिकभ्रमस्य संसारदशायामेव बाधावश्यम्भावेन वाय्यादौ शब्दस्य बाधाभावेन भ्रमत्वाभावात् । इमानि भूतानि त्रिगुणमाया कार्यत्वेन त्रिगुणानि । गुणास्सत्त्वरजस्तमांसि । एतैश्च सत्त्वगुणोपेतैः पञ्चभूतैर्व्यस्तैः पृथक् पृथक्-क्रमेण श्रोत्रादिपञ्चज्ञानेन्द्रियाणि

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

जायन्ते। एतेभ्यः पुनराकाशादिगतसात्विकांशेभ्योमिलितेभ्यो मनोबुद्ध्यहंकार-चित्तानि जायन्ते। श्रोत्रादिपञ्चानां मन आदि चतुर्णां क्रमेण तत्तदधिष्ठातृ-देवा भवन्तीति। एतैरेव रजोगुणोपेतैर्व्यस्तैः पञ्चभूतैर्यथाक्रमं वागादिपञ्चकर्मे-न्द्रियाणि तद्देवताश्च जायन्ते। एवं रजोगुणोपेतैरेवमिलितैः पञ्चप्राणादयो जायन्ते। तेरेव तमोगुणोपेतैरपञ्चीकृतभूतैः पञ्चीकृतानि भूतानि जायन्ते। 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' इति श्रुतेः पञ्चीकरणोपलक्षणार्थत्वात्। पञ्ची-करणं च प्रत्येकमाकाशादौ द्विधाविभज्य तयोरेकैकं पुनश्चतुर्धाविभज्य तेषां चतुर्णामंशानां स्वांशंविहायान्यत्रसंयोजनम्। स्वांशाधिक्यात्पृथिव्यादिव्यवहारे वैशेष्यात्तु तद्वादस्तद्वादः इति प्रमाणम्। पूर्वोक्तैरपञ्चीकृतैः सप्तदशतत्वात्मकस्म-दादिलिङ्गशरीरं परलोकयात्रानिर्वाहकमोक्षपर्यन्तं स्थिरं, हिरण्यगर्भलिङ्गशरीरं च जायते। पुनः भूम्यादिचतुर्दशलोकाः तत्रोचितं स्थूलशरीरं भोग्यं च जायते इति।

प्रश्न २५—लिङ्गशरीरोत्पत्तिं समासेन निरूप्य प्रलयस्य चातुर्विध्यं प्रदर्शयत।

उत्तर—अथ सर्गादौ सृज्यमानप्रपञ्चवैचित्र्यहेतुप्राणिकर्मसहकृतादनन्त-शक्तियुक्तमायाविशिष्टात्परमेश्वराज्जायमानैरपञ्चीकृतैराकादिपञ्चभूतैः स त्विकां-शोपेतैः क्रमशः श्रोत्रादिपञ्चज्ञानेन्द्रियाणि, तैरेवमिलितैश्च मनोबुद्ध्यादिरूपमन्तः-करणं पुनारजोगुणोपेतैः पृथक्-पृथक् पञ्चभूतैर्यथाक्रमं वागादिकर्मेन्द्रियाणि पञ्चप्रा-णादयो वायवश्च जायन्ते। एतत्सप्तदशतत्त्वात्मकं लिङ्ग शरीरं परलोकयात्रानिर्वाहकं मोक्षपर्यन्तं स्थायि परापरभेदेन जायते। तत्र परं हिरण्यगर्भलिङ्गशरीरम्, अपर-मस्मदादिलिङ्गशरीरम्। तत्रापि हिरण्यगर्भलिङ्गशरीरं महत्तत्वम्, अस्मदादि-लिङ्गशरीरमहंकार उच्यते।

त्रैलोक्यनाशात्मकः प्रलयश्चतुर्विधः नित्यः प्राकृतोनैमित्तिक आत्यन्तिक-श्चेति। तत्रनित्यः प्रलयः प्रतिदिनं प्रविलयात्मकः सुषुप्तिः, 'सुषुप्तिकालेसकलि-विलीने' इतिश्रुत्या तस्याः सकलकार्यप्रलयरूपत्वात्। न चैवं सुखादिहेतोर्धर्मादेः-स्मृतिहेतोः संस्कारस्य च प्रविलयादुत्थितस्य कथं सुखादिभेदभोगः पूर्वपदार्थ-स्मरणं चेतिवाच्यम्, धर्माधर्मपूर्वसंस्काराणां कारणात्मनाऽवस्थानेन तदुपपत्तेः। न च सुषुप्तावन्तःकरणस्य विनाशे तदधीनप्राणादिक्रियानुपपत्तिरिति वाच्यम्, सुषुप्तदृष्ट्या शरीराभावेऽपि तदुपलब्धिवत् वस्तुतः श्वासाद्यभावेऽपि पुरुषान्तर विभ्रममात्रत्वात्। न चैवं सुप्तस्य मृतादविशेषः, सुप्तस्य लिङ्गशरीरं संस्कारात्म-नाऽत्रैवास्ति, मृतस्य तु लोकान्तरे यातीति वैलक्षण्यात्। यद्वाज्ञानक्रियाशक्ति-विशिष्टस्यान्तःकरणस्य ज्ञानशक्तिविशिष्टात्मनासुप्तौ विनाशेऽपि क्रियाशक्ति-विशिष्टरूपेणविनाशादविरुद्धम्। 'यदा सुप्तः कञ्चन न पश्यति' 'सता सोम्य तदा सम्पन्नो भवति' इत्यादिश्रुतिस्तत्रप्रमाणम्। = प्राकृतप्रलयस्तु कार्यब्रह्मविनाश-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

निमित्तकः सकलकार्यनाशः। यदा तु प्रागेवोत्पन्नब्रह्मसाक्षात्कारस्य कार्यब्रह्मणो-ब्रह्माण्डाधिकारलक्षणप्रारब्धकर्मसमाप्तौ विदेहकैवल्यात्मिका परा मुक्तिः, तदा तल्लोकवासिनामप्युत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणा सहविदेहकैवल्यम् एवं तदधिष्ठित-ब्रह्माण्डतदन्तर्वर्त्तिनिखिललोकतदन्तर्वर्त्तिस्थावरादीनां भौतिकानांभूतानां च प्रकृतौमायायां च लयेनप्राकृतलयइत्युच्यते। कार्यब्रह्मणो दिवसावसाननिमित्तकस्त्रै-लोक्यमात्रनाशोनैमित्तिकप्रलयः। तद्दिवसश्चतुर्युगसहस्रपरिमितकालः 'चतुर्युग सहस्राणिब्रह्मणोदिनमुच्यते इतिवचनात्। रात्रिकालस्य दिवसकालतुल्यत्वात् प्रल-यकालो दिवसकालपरिमितः। उभयप्रलययोः पुराणवचनानि प्रमाणम्। तुरीय-प्रलयस्तुब्रह्मसाक्षात्कारनिमित्तकः सर्वमोक्षः। स चैकजीववादे युगपदेव, नाना-जीववादे तु—क्रमेण। 'सर्वं एकीभवन्ति' 'यत्रत्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' इतिश्रुतिस्तत्रमानम्। तत्राद्यास्त्रयोऽपिलयाः कर्मोपरतिनिमित्ताः चतुर्थस्तुज्ञानोदयनिमित्तोलयोज्ञानेनसहैवेतिविशेषः। तत्रोपादाननाशेनकार्य-नाशःइतिनैयायिकाः। कार्यनाशसमये कार्याणामाश्रयान्तराभावेनावस्थानानुपपत्त्या सृष्टिक्रमविपरीतक्रमेण कार्यनाश इतिवेदान्तिनः। तत्तत्कार्यनाशेतत्तत्कार्य-जनकादृष्टनाशस्यैव प्रयोजकतया तदुपादाननाशस्याप्रयोजकत्वात्। अन्यथा न्यायमतेमहाप्रलयेपृथिवीपरमाणुगतरूपरसादेरविनाशापत्तेः। तथा पृथिव्याअप्सु इत्यादि-क्रमेणजीवाहंकारस्य हिरण्यगर्भाहंकारे, तस्यचाविद्यायामित्येवंरूपाःप्रलया विष्णुपुराणेप्रदर्शिताः॥

प्रश्न २६—सृष्टिवाक्यानामुपासनादिवाक्यानां च तात्पर्यं निरूपयत।

उत्तर—ननु तत्त्वमसीति वाक्यस्थस्य तत्पदस्य वाच्यार्थनिरूपणावसरेजग-ज्जन्मादिकारणं तत्पदार्थस्य लक्षणमाभहितम्। तल्लक्षणस्य यथार्थत्वे ब्रह्मणः सप्र-पञ्चतापत्तिः, अयथार्थत्वे तत्प्रतिपादकश्रुतिवाक्यानामप्रामाण्यापत्तिरिति चेन्न सृष्टिप्रतिपादने तात्पर्याभावात् अद्वैतब्रह्मावगमे तेषां तात्पर्याच्च। तथाहि सृष्टिमनुक्त्वा यदि ब्रह्मणि प्रपञ्चस्य निषेधः प्रतिपाद्यते, तर्हि वायौ प्रतिषिद्धस्य रूपस्येव ब्रह्मणि प्रतिषिद्धस्य प्रपञ्चस्य ततोऽन्यत्रावस्थानशङ्कायां न निःसन्दिग्धम-द्वितीयत्वं प्रतिपादितं स्यात्। अतः सृष्टिवाक्यात्प्रपञ्चस्य ब्रह्मोपादेयत्वज्ञाने सत्यु। पादानमन्तरेण कार्यस्यान्यत्र सद्भावशङ्कायां निरस्तायां नेति नेतित्यादिवाक्यै-र्ब्रह्मण्यपि तस्यासत्वोपपादने प्रपञ्चस्य मिथ्यात्वज्ञानेनिरस्ताखिलद्वैतविभ्रममखण्डं सच्चिदानन्दैकरसमद्वितीयं ब्रह्मसिद्ध्यतीति परम्परा सृष्टिवाक्यानामपिब्रह्मण्येवा-द्वितीये तात्पर्यमवसितम्।

न चैवमपि सगुणवाक्यानां विद्यमानत्वे कथमद्वैतसिद्धिरिति वाच्यम् 'स एषोऽन्तरादित्ये हिरण्मयः पुरुषः' इत्याद्युपासनाप्रकरणपठितसगुणब्रह्मवाक्या-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

नामुपासनाविध्यपेक्षितगुणारोपमात्रपरत्वेन गुणप्रतिपादने तात्पर्याभावात् 'मूर्तं चामूर्तं चे' त्यादिसगुणवाक्यानां निर्गुणप्रकरणपठितानां 'अथाह आदेशो नेतिनेति' इत्यादिनिषेधवाक्यापेक्षितनिषेध्यसम्पादकत्वेन विनियोगाच्च। अतो न केषाञ्चित श्रुतिवाक्यानमद्वैतप्रतिपादने विरोधः, अपि तु पूर्वोक्तद्विविधसगुण-श्रुतिवाक्यानां चित्तैकाग्र्यद्वारा निषेध्यगुणसम्पादकत्वेन चाद्वैतब्रह्मावबोधने एव तात्पर्यं निश्चेयमिति भावः।

प्रश्न २७—जीवेश्वरचैतन्ययोर्मतभेदान् सयुक्तिकं दर्शयत।

उत्तर—'अथ सत्यं ज्ञानमनन्तं ब्रह्म' 'आनन्दो ब्रह्मेति व्यजानात्' इत्यादि श्रुतिमनुसृत्य स्वरूपलक्षणेन, 'यतो वा इमानि भूतानि जायन्ते' 'इत्यादि श्रुत्या तटस्थलक्षणेन तत्पदार्थो लक्षितः तथा अवस्थात्रयवत्त्वेन त्वं पदार्थोऽपि लक्षितः। तयोरविद्यात्मिकायां मायायां प्रतिबिम्बितं चैतन्यमीश्वरः अन्तःकरणेषु प्रतिबिम्बितं चैतन्यं जीवः। 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वर' श्रुतेः। एमन्मते जलाशयगतशरावगतसूर्यप्रतिबिम्बयोरिव जीवेश्वरयोर्भेदः, अविद्यान्तःकरणोपध्यो र्व्यापकत्वपरिच्छिन्नत्वाभ्यामीश्वरजीवयोर्यथापथं व्यापकत्वं परिच्छिन्नत्वं च बोध्यम्। एतन्मतेऽविद्याकृतदोषा जीव एव परमेश्वरेऽति स्वरूपाधः प्रतिबिम्ब-पक्षपातित्वादित्यरूचे : एकमेवं चैतन्यं बिम्बत्वाक्रान्तमीश्वरः प्रतिबिम्बत्वाक्रान्तं जीवचैतन्यमिति बिम्बात्मकमीश्वरचैतन्यमेवेत्यपरे। तत्रापि बिम्बप्रतिबिम्ब कल्पनोपाधिरेकजीववादेऽविद्या, अनेक जीववादे त्वन्तःकरणान्येव। औपाधिक-दोषाश्च जीव एव, नत्वीश्वरे, उपाधेःप्रतिबिम्बपक्षपातित्वात्। एतन्मते गगन-स्थसूर्यस्य जलादौ प्रतिभासमानप्रतिबिम्बसूर्यस्येव जीवेश्वरयोर्भेदः।

ननु ग्रीवास्यमुखस्य दर्पणप्रदेशेऽभाववद् बिम्बचैतन्यस्य परमेश्वरस्य जीव-प्रदेशेऽभावात्कथं तस्य सर्वान्तर्यामित्वमिति चेन्न, साभ्रनक्षत्रस्य नभसो जलादौ प्रतिबिम्बितत्वे बिम्बभूतमहाकाशस्यापि जलादिप्रदेशसम्बन्धदर्शनेन परिच्छिन्न-मुखादिबिम्बस्य प्रतिबिम्बदेशासम्बन्धित्वेऽपि व्यापकब्रह्मबिम्बस्य प्रतिबिम्बदेश-सम्बन्धाविरोधात्। न च रूपवत एव प्रतिबिम्बदर्शनेन रूपविहीनस्य ब्रह्मणो न प्रतिबिम्बसम्भव इति वाच्यम् नीरूपस्यापि रूपस्य प्रतिबिम्बदर्शनेन विरोधाभावात्। न च नीरूपस्य द्रव्यस्य प्रतिबिम्बाभावनियमोऽस्तीति वाच्यम् निर्गुणत्वात्समवाया-सिद्धेश्चगुणाश्रयत्वस्य समवायिकारणत्वस्य वा द्रव्यत्वस्यात्मनो वक्तुमशक्यत्वात्। न च ब्रह्म न प्रतिबिम्बतुमर्हति, अचाक्षुषत्वाद्, गन्धादिवादित्यनुमानं तत्प्रति बिम्बाभावे प्रमाणमिति वाच्यम् 'एकधा बहुधा चैव दृश्यते जलचन्द्रवत्' 'यथा ह्ययं विवस्वानपोभिन्नं बहुधैकोऽनुगच्छन्' 'आभास एव च' 'अत एव चोपमा

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सूर्यकादिवदिति श्रुतिसूत्रवाक्यप्रमाणेन ब्रह्मप्रतिबिम्बाभावानुमानस्य बाधितत्वात्। तस्मादुक्तरीत्या जीवेश्वरचैतन्ययोः स्वरूपं संग्रहेण निरूपितम्।

प्रश्न २८—साधन सहितं मोक्षस्वरूपं विविच्यताम्? मोक्षस्य कृतकत्वेनाऽनित्यत्वे तल्लाभानन्तरमपि कथं नाऽनर्थपुनरावृत्तिः?

उत्तर—अथ धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परम प्रयोजनतया परमपुरुषार्थः। तथा च यज्ज्ञातं सन्नमेदं स्यादिति स्वसम्बन्धितयेष्यते तत्प्रयोजनम्। तच्च द्विविधम्, मुख्यं गौणंचेति। तत्र सुखं दुःखाभावश्च मुख्यं, तदन्यतरसाधनं च गौणं प्रयोजनम्। तत्र सातिशयनिरतिशयभेदेन मुख्यं प्रयोजनमपिद्विविधम्। तयोर्निरतिशयं सुखं दुःखाभावश्च ब्रह्मस्वरूपसंस्थितिरेव मोक्षः, 'आनन्दो ब्रह्मेति व्यजानात्' 'ब्रह्मवेद ब्रह्मैव भवति' 'तरति शोकमात्मवित्' इत्यादि श्रुतेः, न तु लोकान्तरावाप्तिः, तज्जन्यवैषयिकानन्दो वा मोक्षः। तस्य कृतकत्वेनानित्यत्वे मुक्तस्य पुनरावृत्तिप्रसङ्गात्। ननुत्वदभिमतस्य मोक्षस्य सादित्वे कृतकत्वेनानित्यत्वान्मुक्तस्य पुनरावृत्तिलक्षणो दोषस्तुल्य एव, अनादित्वे श्रवणादिवैयर्थ्यमितिचेन्न सिद्धस्यैव ब्रह्मस्वरूपस्य मोक्षस्यासिद्धत्वभ्रमेण तत्साधनस्य श्रवणादेरवैयर्थ्यात्। अनर्थनिवृत्तिरप्यधिष्ठानभूत ब्रह्मस्वरूपतया सिद्धैव। एवं लोके हस्तगतविस्मृतसुवर्णादेर्यथा प्राप्तिः, यथा वा वलयितचरणायां रज्ज्वां नित्यनिवृत्तस्य सर्पस्याप्तवाक्यात् पुनरपिनिवृत्तिर्दृष्टा, तथैव प्राप्तस्याप्यानन्दस्य प्राप्तिः परिहृतस्याप्यनर्थस्यनिवृत्तिर्मोक्षः प्रयोजनम्। स च मोक्षः 'तमेव विदित्वातिमृत्युमेति' इत्यादिश्रुत्या ब्रह्मात्मैक्यगोचरापरोक्षज्ञानैकसाध्यः, परोक्षत्वेऽपरोक्षभ्रमनिवर्तकत्वानुपपत्तेः। तच्चापरोक्षज्ञानं तत्त्वमस्यादिवाक्यादितिपद्मपादाचार्याः। मननिदिध्यासन संस्कृतान्तःकरणादिति वाचस्पतिमिश्राः। निष्कामनया सत्कर्मानुष्ठानात्परम्परया कर्मणामपि ज्ञाने विनियोगः। अत एव 'तमेवं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन' इत्यादि श्रुतिः, कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते' इत्यादि स्मृतिश्च संगच्छते। एवं श्रवणमननिदिध्यासनान्यपि ज्ञानसाधनानि। बृहदारण्यके मैत्रेयीब्राह्मणे 'आत्मा वा अरेद्रष्टव्यः' इति दर्शनमनूद्य तत्साधनत्वेन श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रवणादीनां विधानात्। तत्र-श्रवणं नामोपक्रमोपसंहारादिषड्लिंगैर्वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूला मानसी क्रिया। मननं नाम शब्दावधारितेऽर्थे मानान्तरविरोधशंकायां तन्निराकरणानुकूलस्तर्कात्मको ज्ञानजनको मानसो व्यापारः। निदिध्यासनं नामानादिदुर्वासनया विषयेष्वाकृष्यमाणचित्तस्य विषयेभ्योऽपकृष्यात्मविषयकस्थैर्यानुकूलो मानसो व्यापारः। तत्र निदिध्यासनं ब्रह्मसाक्षात्कारे साक्षात्सा-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

वनम् 'ते ध्यानयोगानुगता अपश्यन्' 'ततस्तुतं पश्यति निष्कलं ध्यायमान' इत्यादि श्रुतेः। तत्र च मननंहेतुः अकृतमननस्यार्थदार्ढ्याभावेन तद्विषये निदिध्यासनायोगात्। मनने च श्रवणं हेतुः, श्रवणाभावे तात्पर्यनिश्चयेन शाब्दज्ञानाभावेन श्रुतार्थविषयकयुक्तत्वायुक्तत्वनिश्चयानुकूलमननायोगात्। एतानि त्रीण्यपि ज्ञानोत्पत्तौ कारणानीति वाचस्पतिमिश्राः विवरणाचार्यास्तु श्रवणं प्रधानं, मननिदिध्यासनयोस्तु श्रवणादनन्तरभाविनोस्तत्फलनिर्वर्तकतयाऽऽराद्उपकारकाङ्गत्वमिति। श्रवणादिषु मुमुक्षूणामधिकारः, मुमुक्षायां च नित्यानित्यवस्तुविवेकस्येहामुत्रार्थफलभोगविरागस्य शमदमोपरतितितिक्षाश्रद्धासमाधानानां च विनियोगः। सगुणोपासनमपि चित्तैकाग्र्यद्वारा निर्विशेषब्रह्मसाक्षात्कारेहेतुः। एवंसाधनंमोक्षस्यस्वरूपंतन्नित्यत्वंचसंग्रहेण निरूपितमिति।

प्रश्न २९—अपरोक्षज्ञाने मतभेदनिरूपणपूर्वकं श्रीमत्पद्मपादाचार्याणां श्रीमदाचार्यवाचस्पति मिश्राणाञ्चाशयौ स्फुटीक्रियेयाताम्।

उत्तर—अथ सकारणानर्थनिवृत्तिपरमानन्दावाप्तिरूपो मोक्षो ब्रह्मात्मैक्यज्ञानसाध्यः 'तमेव विदित्वातिमृत्युमेति' 'तदात्मानमेवावेदहंब्रह्मास्मि' इति श्रुतेः 'तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनमिति नारदीयवचनाच्च। तच्च ज्ञानमपरोक्षरूपमेव मोक्षसाधनम्; परोक्षज्ञाने हि अपरोक्षभ्रमनिवर्तकत्वं नोपपद्यते। तच्च ब्रह्मात्मैक्यापरोक्षज्ञानं तत्त्वमस्यादिमहावाक्याद्भवतीति पद्मपादाचार्याः। यतोहि संविदापरोक्ष्यं न करणविशेषनिबन्धनम्, अपितु प्रमेयविशेषनिबन्धनम्। एवं च जीवगोचरज्ञानवत्प्रमातृजीवाभिन्नब्रह्मविषयकमपि शब्दजन्यं ज्ञानं सन्निकृष्टविषयमपरोक्षमेवेति प्रत्यक्षपरिच्छेदेऽपि परिभाषाकृद्भिः प्रतिपादितम्। अत एव शब्दजन्यज्ञानस्यापरोक्षत्वादेव प्रतर्दनाधिकरणे इन्द्रप्रतर्दनसंवादविचारावसरे 'शास्त्रदृष्ट्यातूपदेशो वामदेववत्' इति सूत्रे तत्त्वमस्यादिमहावाक्यजन्यज्ञानमहंब्रह्मेतिरूपमेव शास्त्रदृष्टिशब्देनाभिहितमिति बहुधा प्रपञ्चितम्।

वाचस्पतिमिश्रास्तु प्रत्यक्षज्ञानं करणविशेषनिबन्धनमेवेति स्वीकृत्य मननिदिध्यासनसंस्कृतान्तःकरणादेव ब्रह्मात्मैक्यापरोक्षज्ञानं मन्वते, एकस्मिन्नेव हि सूक्ष्मवस्तुनि रूपादौ पटुकरणापटुकरणयोः प्रत्यक्षत्वाप्रत्यक्षत्वव्यवहारो दृश्यते। एवं च संवित्प्रत्यक्षत्वे इन्द्रियत्वेनेन्द्रियजन्यत्वस्यैव प्रयोजकतया शब्दजन्यब्रह्मज्ञानस्य नापरोक्षत्वम्। ब्रह्मसाक्षात्कारे मननिदिध्यासनसंस्कृतान्तःकरणमेवेत्यत्र 'मनसैवानुद्रष्टव्यः' 'दृश्यते त्वग्र्या बुद्ध्या' इति श्रुतिर्मानम्। न च 'यतोवाचो निवर्तन्ते' इत्यादिश्रुतेः का गतिरिति वाच्यम्, असंस्कृतमनोविषयकत्वेनाविरोधात्। न च 'तं त्वौपनिषदं पुरुषं पृच्छामी'ति श्रुतिबोधितमुपनिषन्मात्रगम्यत्वं तद्विरुद्धमिति वाच्यम्; अस्मदुक्तमनसो वेदजन्यज्ञानानन्तरमेव प्रवृत्ततया

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

वेदोपजीवित्वेनविरोधाभावात् । वेदानुपजीविमानान्तरगम्यत्वस्यैव वेदगम्यत्व-विरोधित्वात् । न च शास्त्रदृष्टिसूत्रेण विरोध इतिवाच्यम् ; तत्र शास्त्रदृष्टिपदेन ब्रह्मविषयकमानसप्रत्यक्षस्य शास्त्रप्रयोज्यत्वोपपादनात् ।

किं च वाचस्पतिमिश्रमते 'अपि संराधने सूत्राच्छास्त्रार्थध्यानजा प्रमा । शास्त्र-दृष्टिर्मता तां तु वेत्ति वाचस्पतिः परः ॥' इति कल्पतरुकारसम्मतिरपि प्रमाणम् ।

प्रश्न ३०—वृत्तिप्रयोजनादि संक्षेपतः प्रतिपादयत ?

प्रश्न—अथ तत्त्वमसीति वाक्यस्थस्य 'त्वं' पदार्थस्य निरूपणावसरे जाग्र-त्स्वप्नसुषुप्त्यवस्थात्रयवत्त्वं जीवत्वमित्युक्तम् । तत्र जाग्रन्नामेन्द्रियजन्यज्ञाना-वस्था, स्वप्नसुषुप्त्योरिन्द्रियाभावान्नातिव्याप्तिः स्वरूपज्ञानस्यानादित्वादिन्द्रिय जन्यज्ञानमन्तःकरणवृत्तिरूपमेवाभ्युपगन्तव्यम् । ननु सर्वदा सिद्धेन स्वरूपज्ञाने-नैव विषयप्रकाशसिद्धौ अन्तःकरणजन्या वृत्तिः किमर्थेति चेन्न आवरणाभिभवार्थं, विषयप्रकाशकेन चैतन्येन सह विषयाणां सम्बन्धार्थं वा तज्जन्यवृत्तेरभ्युपगमात् । तथाहि-अविद्योपहितस्य चैतन्यस्य जीवत्वपक्षे घटाद्यधिष्ठानचैतन्यस्यैव जीवरूपतया सदा घटादिभानप्रसक्तिवारणायावरणरूपमूलाज्ञानस्य शक्तिविशेषस्यावश्यकत्वे तद्भङ्गं विना कदापि भानं न स्यादतस्तद्भङ्ग आवश्यकः । तद्भङ्गकं न चैतन्य-मात्रम्, आवरणाभासकस्यावरणनिवर्तकत्वायोगात् । नापि वृत्त्युपहितं चैतन्यं, तद्भासकं, परोक्षस्थलेऽपि तन्निवृत्त्यापत्तेरिति परोक्षभिन्नवृत्तिविशेषस्य विषयाकारस्य तदुपहितचैतन्यस्य वाऽवरणभङ्गप्रयोजकत्वमित्यावरणाभिभवार्थावृत्तिरित्येकं मतम् ।

सम्बन्धार्था वृत्तिरित्यपरं मतम् । तत्राप्यविद्योपहितोऽपरिच्छिन्नो जीवो घटादिविषयदेशे विद्यमानोऽपि विषयाकारापरोक्षवृत्तिविरहदशायां न घटादिकमव-भासयति, तस्य जीवस्यापरिच्छिन्नत्वेन घटादिना सह सामान्यसम्बन्धस्य सत्त्वे-ऽपि घटादिभानप्रयोजकस्य सम्बन्धविशेषस्य तत्राभावात्—तदाकारापरोक्षवृत्ति दशायां तु तादृशसम्बन्धस्य सत्त्वात्प्रकाशयति । स च सम्बन्धविशेषो विषयजीवचै-तन्ययोर्व्यङ्ग्यव्यञ्जकभावलक्षणः कादाचित्कः तत्तदाकारवृत्तिनिबन्धनः । तत्र तैजसस्यान्तःकरणस्य स्वच्छद्रव्यत्वेन स्वत एव जीवचैतन्याभिव्यञ्जनसामर्थ्यम्; किन्तु घटादीनामस्वच्छद्रव्यत्वान्न तथा, स्वाकारवृत्तिसंयोगदशायां तु वृत्त्य भिभूतजाड्यधर्मकतया वृत्त्युत्पादितचैतन्याभिव्यञ्जनयोग्यताश्रयतया च वृत्त्युत्थानानन्तरं घटादिकं स्वावच्छिन्नं जीवचैतन्यमभिव्यनक्ति । कुड्यादेर्जलादि संयोगदशायां मुखादिप्रतिबिम्बग्राहित्ववद् घटादेरभिव्यञ्जकत्वमपि तत्प्रति-बिम्बग्राहित्वं चैतन्याभिव्यञ्जकत्वं च तत्प्रतिबिम्बित्वम् । एतादृशाभिव्यञ्जकत्वसिद्ध-[illegible] वृत्तेर्बाह्यनिर्गमनस्वीकारः । इत्यलम् ॥

इति परीक्षाग्रिम सन्तरणी ॥

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सुबोधिनीव्याख्याकार की अन्य कृतियाँ

१— श्रीमच्छङ्करवचनामृतम् 'हिन्दी टीका'

२ – ईशादि उपनिषद् शाङ्करभाष्य की 'भाष्यार्थदीपिका' अप्रकाशित। इसमें भाष्य के गूढ़ आशय को सुस्पष्ट करने के लिये सरल, सुबोध, प्राञ्जल हिन्दी भाषामें भाष्यकी विस्तृत व्याख्या की गयी है।

३— ब्रह्मसूत्र की 'विद्यानन्दवृत्ति' संस्कृत अप्रकाशित। इसमें सुविस्तृत-शाङ्करभाष्य के आशय को संक्षेप रूपसे सरल संस्कृत में अभिव्यक्त किया गया है। जो परीक्षार्थी तथा अन्य जिज्ञासुओं के लिये अत्यन्त उपयोगी है।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection